अध्यूढ *a.* [अधि उपरि ऊढः] 1 Raised, exalted, elevated, hanging over. एतस्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते Ch. Up. 1. 6. 1. –2 Abundant, increased, copious. –3 Rich, affluent. –**ढः** 1 Śiva. –2 The son of a woman pregnant before marriage ; अध्यूढश्च तथाऽपरः Mb. 13. 49. 4. –**ढा** A wife whose husband has married another wife and thus superseded her (= अधिविन्ना q. v.). अध्यूढायाश्च यद् दुःखं साक्षिभिर्विहितस्य च Mb. 2. 68. 83.

अध्यूध्नी [अधिकम् ऊधो यस्याः अनङ् ङीप् च] 1 A cow with full and fat udders. –2 The vessel (in the body) above the udder or above the scrotum ; perhaps urethra (?).

अध्यूह् 1 U. 1 To overlay, place on or upon. –2 To raise above.

अध्यूहनम् Putting of a layer (of ashes &c.).

अध्येषणम् [अधि-इष् प्रेरणे-ल्युट्] Causing one to do a thing, especially a preceptor &c. as an honorific duty. –**णा** [अधिका एषणा प्रार्थना] Solicitation, entreaty.

अध्रि *a.* [न-धृ-क्रि] Not restrained, irresistible. –**Comp.** –**गु-गू** *a.* [अध्रि-गम्-कृ-डिन् ऊत्वादेशो वा] of irresistible motion or course (अधृतगमन), impetuous ; यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना Rv. 8. 22. 11 also तुभ्यं श्चोतन्ति अध्रिगो Ait. Br. 2. 12. (–**गुः** N. of a heavenly killer of sacrificial victims, or the name formula itself ending with an invocation of Agni. –**ज** *a.* [अध्रि जनयति, जन्–ड] making irresistible. इति चिन्मन्युमध्रिजः Rv. 5. 7. 10. –**पुष्पिका** the betelnut plant. (Mar. पानवेल).

अध्रियमाण *a.* 1 Not held, not to be got hold of ; not forthcoming. –2 Not surviving, dead.

अध्रुव *a.* Uncertain, doubtful. –2 Unsteady, moving, not fixed or permanent ; स्वाङ्गेऽध्रुवे P. III. 4. 54 ; separable (which can be severed or detached without fatal or disastrous effects) (येन विना न जीवनं सोऽध्रुवः Sk.) –**वम्** An uncertainty ; यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते । ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च H. 1. 184. cf. the English phrase 'A bird in the hand is worth two in the bush.'

अध्रुषः Quinsy ; a kind of disease attended with fever arising from the affection of blood ; शोथः स्थूलस्तोदादाहप्रकाशो रक्ताज्ज्ञेयः सोऽध्रुषो रुग्ज्वराढ्यः Suśr. (Mar. गळसटें, घटसर्प.)

अध्वन् *m.* [अत्ति बलं ; अद्–क्वनिप् धादेशः Uṇ. 4. 115 ; perhaps from अन् also] 1 (*a*) A way, road ; passage, orbit (of planets &c.) ; मुक्ताध्वानं ये लङ्घयेयुर्भवन्तम् Me. 54. (*b*) Distance, space (traversed or to be traversed) ; पञ्चदशयोजनमात्रमध्वानं जगाम K. 119, 120 ; कियत्यध्वनि सा उज्जयिनी 207 ; Dk. 13 ; अपि लङ्घितमध्वानं बुबुधे न बुधोपमः R. 1. 47 ; उल्लङ्घिताध्वा Me. 45 ; कालाध्वनोरत्यन्तसंयोगे &c. (*c*) Journey, travel, course, march ; नैकः प्रपद्येताध्वानम् Ms. 4. 60 undertake a journey ; अध्वसु त्रिषु विसृष्टमैथिलः R. 11. 57 after three marches ; परिक्रान्तः किलाध्वना Ki. 11. 2 way-worn ; अध्वश्रमपरिगतम् Me. 17. 40 ; अध्वा वर्णकफस्थौल्यसौकुमार्यविनाशनः Suśr. –2 A recension of the Vedas and the school upholding it (शाखा, अवयव) एकविंशत्यध्वयुक्तमृग्वेदमृषयो विदुः । सहस्राध्वा सामवेदो यजुरेकशताध्वकम् ॥ अध्वा देवगतिः शाखा इति पर्यायवाचकाः । –3 Time (Kāla), time personified, (being the eater of all) दुर्मरं पुरुषेणेह मन्ये ह्यध्वन्यनागते Mb. 14. 80. 24. –4 Air ; sky, atmosphere. –5 Place. प्रस्थितं दीर्घमध्वानं स्वबन्धुमिव बान्धवाः Rām. 5. 1. 45. –6 Means, resource ; method. –7 Attack (अधिकदुरारोहणम्). अध्वन् is changed to अध्व after prepositions ; प्राध्वः, व्यध्वः &c. –**Comp.** –**अतिः** [अध्वानमतति, अत्–इ] 1 a traveller. –2 an intelligent person. –**अधिपः,–ईशः** [ष. त.] an officer in charge of the public roads. –**अयनम्** [अध्वन्ययनम्] journey, travel. –**गः** 1 one who travels ; a traveller, way-farer ; Av. 13. 1. 36. सन्तानकतरुच्छायासुप्तविद्याधराध्वगम् Ku. 6. 46 (°गामिन्). –2 a camel. –3 a mule. –4 the sun ; °भोग्यः N. of a tree, Spondias Mangifera (आम्रातकवृक्ष) अध्वगैः अयत्नलभ्यफलत्वात् भोग्यः (Mar. आंबाडा). (–**गा**) the Ganges. –**गत्** *m.* [अध्वानं गच्छति; गम्–क्विप् P. VI. 4. 40] a traveller. –**गत्यन्तः –गन्तव्यः** [ष. त.] measure of length applicable to roads ; कालमाबा-

ध्वगन्तव्यः Mbh. Vārt. on P. 1. 4. 51. -जा [अध्वनि जायते; जन्-ड] A plant (स्वर्णुली or स्वर्णपुष्पी). -पतिः 1 the sun (दिवैव पथिकानां गमनात् रात्रौ च गमननिषेधात् सूर्यस्य अध्वपालकत्वम् or अध्वनः आकाशस्य पतिः). -2 inspector of the road. -रथः [अध्वने हितः पर्याप्तो रथः शाक. त.] 1 a travelling coach. -2 [अध्वैव रथो यस्य] a messenger skilled in travelling (पथि प्रज्ञो दूतः). -शल्यः [अध्वनि शल्यमिव आचरतीति क्विप्-अच् Tv.] N. of a tree (अपामार्ग) (अध्वगानां पादवस्त्रादौ शल्यवद्वेधकारकत्वात् तथात्वम्) (Mar. आघाडा).

अध्वनीन, अध्वन्य *a.* [अध्वानम् अलं गच्छति; अध्वन्-ख-यत् वा; अध्वनो यत्खौ P. V. 2. 16] Able to undertake a journey, speeding on a journey; क्षिप्रं ततोऽध्वन्यतुरङ्गयायी Bk. 2. 44. -नः -न्यः A traveller going fast, way-farer.

अध्वर *a.* [न ध्वरति कुटिलो न भवति ध्वृ-अच्. न. त.; ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपातः अहिंस्रः Nir.] 1 Not crooked, not broken, uninterrupted; इमं यज्ञमवतामध्वरं नः Yv. 27. 17 (अध्वरम् = अकुटिलं शास्त्रोक्तम्). -2 Intent, attentive. -3 Durable, sound. -4 Not injuring; ततोऽध्वरजटः स्थाणुर्वेदाध्वरपतिः शिवः Mb. 12. 256. 19. -रः [अध्वानं सत्पथं राति ददाति फलत्वेन, रा-क] A sacrifice, a religious ceremony; also a Soma sacrifice; तमध्वरे विश्वजिति R. 5. 1. -रः -रम् 1 Sky or air (आकाश). -2 The second of the 8 Vasus. -Comp. -कल्पा an optional sacrifice (काम्येष्टि). -काण्डम् [ष. त.] part of the शतपथब्राह्मण which treats of sacrifices. -ग [अध्वरं गच्छति] intended for a sacrifice. -दीक्षणीया [ष. त.] consecration connected with an Adhvara; so °प्रायश्चित्तिः an expiation &c. -मीमांसा [ष. त.] N. of Jaimini's Pūrvamīmāṁsā. -श्रीः [ष. त.] glory of the Adhvara. -समिष्टयजुः *n.* N. of an aggregate of libations connected with a sacrifice. -स्थ *a.* Engaged in a sacrifice; य उदृचि यज्ञे अध्वरेष्ठाः । Rv. 10. 77. 7.

अध्वरीयति, अध्वर्यति Den. P. To desire to have a sacrifice performed; or to perform one.

अध्वर्युः [अध्वरमधीते Nir.; अध्वर-क्यच्-युच् ततोऽन्त्याकारलोपः Tv.] 1 Any officiating priest, technically distinguished from होतृ, उद्गातृ and ब्रह्मन्. His duty was "to measure the ground, build the altar, prepare sacrificial vessels, to fetch wood and water, to light the fire, to bring the animal and immolate it," and while doing this to repeat the Yajurveda; होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयति Sk. See अच्छावाक also. -2 The Yajurveda itself. -pl. Adherents of that Veda. - Comp. -काण्डम् N. of a book of mantras or prayers intended for Adhvaryu priests. -क्रतुः Sacrificial act performed by the Adhvaryu (Pāṇini II. 4. 4.) -वेदः Yajurveda.

अध्वस्मन् *a.* [ध्वंस् मनिन् किच्च न. त.] Imperishable; bright. (?).

अध्वान *a.* (न. ब.) Dumb, taciturn; अक्षद्यूतजितो युधिष्ठिर इवाध्वानं गतः कोकिलः Mk. 5. 6.

अध्वान्तम् [न. त.] Twilight, gloom, slight darkness, shade. -न्तः [ष. त.] End of the journey. -Comp. -शाबः [अध्वान्तस्य मार्गसीमायाः शाब इव Tv.] A plant (श्योनाक) Cassia Fistula or Bignonia Indica (blossoming in shade). (Mar. बाहवा, पाडळ).

अन् 2 P. [अनिति, आन-नी-त्, आन, अनितुम्, अनित] 1 To breathe; आनीदवातं स्वधया तदेकम् Rv. 10. 129. 2. -2 To move, go about, live; को ह्येवान्यात् यदेष आकाश आनन्दो न स्यात् Taitt. Up. -3 To gasp, pant with thirst (Ved.). -*Caus.* आनयति; *desid.* अनिनिषति. -4 A. To live. -10 P. आनयति. also 1 P. अनति, to worship.

अन् *m.* [क्विप्] The soul; विश्वे चनेदना Rv. 4. 30. 3.

अनः [अन्-अच्] Breath, respiration; प्राणोऽपानो व्यान उदानः समानोऽनः इत्येतत्सर्वं प्राण इति Br. Up. 1. 5. 3. [cf. L. *animus*, Gr. *anemos*]. अनः प्राणयुतेऽपि स्यात्। Nm.

अननम् [अन् ल्युट्] Act of breathing, living &c.

अनंश *a.* [न. ब.] 1 Not entitled to a share in the inheritance; °शौ क्लीबपतितौ जात्यन्धबधिरौ तथा। उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः॥ Ms. 9. 201. Other persons are also mentioned by Devala, Baudhāyana, Kātyāyana and Nārada. -2 Without parts, undivided, portionless; an epithet of the sky or the Supreme Being.

अनंशुमत्फला [न अंशुमत् मोचकाभ्यन्तरस्थत्वात् फलं यस्याः] The plantain tree.

अनक् *a.* Blind. व्यनगचष्ट Rv. 2. 15. 7.

अनक *a.* Mean, base; See अणक.

अनक्ष् *a.* [न अक्ष्णोति व्याप्नोति विषयमिन्द्रियेण, अक्ष्-क्विप् न. त.] Without sight, blind.

अनक्ष *a.* 1 Without an axle-tree. -2 Sightless, blind. यस्यानक्षा दुहिता Rv. 10. 27. 11.

अनकदुन्दुभिः = आनकदुन्दुभि q. v.

अनकस्मात् *ind.* [न. त.] Not causelessly, not suddenly or accidentally.

अनक्षर *a.* [न. ब.] 1 Unable to speak, mute, dumb, unlettered; मुखमनक्षरं स्वाकृतेः Bh. 2. 56. -2 Unfit to be uttered. -रम् [अप्रशस्तान्यक्षराणि यत्र] Abusive language, foul or abusive words, censure. -*adv.* Without the use of words, not expressed by words, mutely, dumbly; °रं पप्रच्छ K. 219, 143; °व्यञ्जितदोहदेन R. 14. 26.

अनक्षि *n.* [अप्रशस्तम् अक्षि] A bad eye, weak eye.

अनगार *a.* [न. ब.] Houseless. -रः A vagrant ascetic.

अनगारिका The houseless state of a vagrant ascetic.

अनग्नि [न. त.] 1 Non-fire, substance other than fire; यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनमाविव शुष्कैधो न तज्ज्वलति कर्हिचित् Nir. -2 Absence of fire. *a.* 1 Not requiring fire, dispensing with fire, without the use of fire; विदधे विधिमस्य नैष्ठिकं यतिभिः सार्धमनग्निमग्निचित् R. 8. 25; said of a sacrifice also (अग्निचयनरहितो यज्ञः). -2 Not maintaining the sacred fire; अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः Ms. 6. 25,

43: irreligious, impious. -3 Dyspeptic. -4 Unmarried. -Comp. -त्र-त्रा a. Ved. not maintaining the sacred fire, sinful, irreligious अग्ने त्वमस्मद् युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः Rv. 1. 189. 3. -दग्ध a. Not burnt with fire or on the funeral pile, ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते Rv. 10. 15. 14. (श्मशानकर्म न प्राप्ताः); a class of Manes Ms. 3. 199.

अनघ a. [न. ब.] 1 Sinless, innocent; अवैमि चैनामनघेति R. 14. 40. -2 Free from blame, faultless, handsome; अखण्डं पुण्यानां फलमिव च तद् रूपमनघम् Ś. 2. 10; यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः Ak.; °सर्वगात्री Dk. 123. -3 Without mishap or accident, free from danger, calamity &c.; safe, unhurt; यास्त्वामनघमद्राक्ष्म Dk. 108; कच्चिन्मृगीणामनघा प्रसूतिः R. 5. 7; मृगवधूर्यदा अनघप्रसवा भवति Ś. 4 safely delivered or brought to bed; °प्रसूतेः R. 14. 75. -4 Without grief or sorrow; दयालुमनघस्पृष्टम् R. 10. 19. -5 Free from dirt, impurities &c., pure, spotless; R. 10. 80; 13. 65; Śi 3. 31. -6 Tireless, not exhausted; Bhāg. 2. 7. 32. -घः 1 White mustard. -2 N. of Visṇu; अनघो विजयो जेता; V. Sah. 16. also of Śiva and of several other persons, a Gandharva, Sādhya &c.-Comp.-अष्टमी N. of the eighth day (spoken of in the fiftyfifth Adhyāya of Bhavisyottara Purāṇa)

अनङ्कुश a. [अङ्कुशेन न-वश्यः] 1 Ungovernable, unruly. -2 Taking license (as a poet.).

अनङ्ग a. [न. ब.] 1 Bodiless, without a body; formless, incorporeal; त्वमनङ्गः कथमक्षता रतिः Ku. 4. 9. -2 Different from the body. -3 Without a supplement or auxiliary. -ङ्गः 1 Cupid (the bodiless one; so called from his having been reduced to ashes by Śiva with the fire of his third eye, when he tried to seduce the God's mind towards Pārvatī for the birth of a deliverer of the Gods from Tāraka.) -2 Wind. -3 A goblin. -4 A shadow, cf. अनङ्गे मन्मथे वायौ पिशाचच्छाययोरपि Nm. -ङ्गम् 1 Sky, air, ether. -2 The mind (आकाशस्य निरवयवत्वात् न्यायवैशेषिकमते चित्तस्य अगुणत्वेन तस्य तथात्वम्). -Comp.. -आपीडः N. of a king of Kashmir. -क्रीडा [तृ. त.] 1 amorous sports. -2 N. of a metre of two lines, the first with 16 long, and second with 32 short, syllables. -द a. [उप. स.] inspiring love; °दे तनुभूते ते भुंजलते K. 220. (also without Angada); बाह्योरनङ्गदत्वस्य बाले ते कारणे उभे Bhar. Ch. -देवी N. of a queen of Kashmir. -द्वादशी N. of the 83rd chapter of भविष्योत्तरपुराण; °त्रयोदशीव्रतम्, see under व्रत. -पालः N. of a king's chamberlain at Kashmir. -लेखः (मदनलेखः) a love letter; °लेखक्रियोपयोगं (व्रजन्ति) Ku. 1. 7. -रङ्गः N. of an erotic work describing the several postures (आसन) pertaining to sexual intercourse. -लेखा 1 A love letter. -2 N. of a queen of Kashmir. -शत्रुः, -असुहृत् &c. N. of Śiva. -शेखरः N. of a metre of four lines, each with 15 iambic feet.

अनङ्गकम् The mind.

अनङ्गुरि-लि a. [न. ब.] Destitute of fingers.

अनच्छ a. Not clear, dirty.

अनजका, अनजिका [अप्रशस्ता अजा] A miserable or small goat.

अनञ्जन a. [न. ब.] 1 Without collyrium, pigment or paint; नेत्रे दूरमनञ्जने S. D. -2 Faultless, taintless. -3 Without any connection (निःसम्बन्ध). -नम् 1 The sky, atmosphere. -2 The Supreme Spirit (परब्रह्म), Visṇu or Nārāyaṇa. यदा विसृष्टस्त्वमनञ्जनेन वै बलं प्रविष्टोऽजितदैत्यदानवम् Bhāg 9. 5. 8.

अनडुह् m. [अनः शकटं वहति] (अनड्वान्, °ड्वाहौ, °डुद्भ्याम् &c.) 1 An ox, bull. -2 The sign Taurus. वृषभराशि. -ही or अनड्वाही A cow. -Comp. -जिह्वा [अनडुहो जिह्वेव पत्राणि यस्याः सा] a plant (गोजिह्वा, अनन्तमूल). -द a. [उप. स.] a giver of oxen.

अनडुत्क a. Having oxen.

अनडुहः N. of a sage.

अनणु a. [न. त.] Not small or minute or fine, coarse. -णुः Coarse grain, peas &c.

अनति ind. Not very much; compounds beginning with अनति may be analysed by referring to अति; e. g. अनतिक्रमः moderation; अनतिक्रमणीय not to be transgressed, inviolable; अनतिदृश्य opaque; अनतिद्भुत unsurpassed, real, true, proper, ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता Rv. 8. 90. 3. अनतिव्याध्य invulnerable; अनत्यन्तगति P. V. 4. 4 sense of diminutive words; अनत्यय imperishable, undecaying &c.; अनतिप्रश्न्य not to be asked to excess; अनतिविलम्बिता absence of delay; fluency as a speaker's qualification, one of the 35 Vāgguṇas, q. v.

अनद्धा ind. [न. त.] Ved. Not truly or clearly, not certainly or definitely. -Comp. -पुरुषः not a true man; one who is not of use, either to gods, men or the manes.

अनद्यः [न अद्यः भक्ष्यः अप्राशस्त्ये नञ्] White mustard.

अनद्यतन a. (-नी f.) [न. त.] Not pertaining to this or the current day; a term used by Pāṇini to denote the sense of the Imperfect or the Periphrastic future P. III. 2. 111, III. 3. 15; °भूते लङ्-अपचत्; °ने भविष्यति लुट्-पक्ता; परोक्षानद्यतने लिट्-पपाच. -नः Not the current day; अतीतायाः रात्रेः पश्चार्धेन आगामिन्या रात्रेः पूर्वार्धेन सहितो दिवसोऽद्यतनः Sk., तद्भिन्नः कालः.

अनधिक a. [न. त.] 1 Not more or excessive. -2 Boundless; perfect. -3 Not capable of being enlarged or surpassed.

अनधिकारः [न. त.] Absence of authority, right, claim &c. -Comp. -चर्चा intermeddling, officiousness.

अनधिकारिन् a. Not entitled to.

अनधिगत a. [न. त.] Not obtained, acquired or studied. -Comp. -मनोरथ a. foiled in one s expectations. -शास्त्र a. who has not learnt the Śāstras.

अनधीन *a.* [न. त.] Independent. **–नः, –नकः** [संज्ञायां कन्] An independent carpenter working on his own account (कौटतक्षः); स हि कुर्व्यां वसन् न कस्यचिदधीनः.

अनध्यक्ष *a.* [न. त.] 1 Not perceptible or observable, invisible; मनोऽपि न तथाज्ञानादनध्यक्षं तदा भवेत्। Bhāṣā P. –2 Without controller or ruler &c.

अनध्यायः अनध्ययनम् [न. त.] Not studying, intermission of study; the time when there is or ought to be such intermission, a holiday (°दिवसः); अद्य शिष्टानध्यायः U. 4 a holiday (given) in honour of distinguished guests. See Ms. 2. 105-6; 4. 103-4; 105-8, 117-8, 126 &c.

अननुभावुक *a.* Unable to comprehend; °ता non-comprehension, unintelligibility.

अननुभाषणम् 1 Not repeating a statement or proposition. –2 Tacit assent.

अनन्त *a.* [नास्ति अन्तो यस्य] Endless, infinite, eternal, boundless, inexhaustible; °रत्नप्रभवस्य यस्य Ku. 1. 3. **–न्तः** 1 N. of Viṣṇu; गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः। नान्तं गुणानां जानन्ति (नास्यान्तमधिगच्छन्ति) तेनानन्तोऽयमुच्यते ॥; also of Viṣṇu's couch, the serpent Śeṣa; of Kriṣṇa and his brother; of Śiva, the 14th Arhat; Vāsuki, the lord of serpents अनन्तश्चास्मि नागानाम् Bg. 10. 29. –2 A cloud. –3 Talc. –4 N. of a plant (सिन्दुवार) Vitex Trifolia (Mar. निरगुडी). –5 The asterism श्रवण. –6 A silken cord with 14 knots tied round the right arm on the अनन्तचतुर्दशी day. –7 The letter आ. **–न्ता** 1 The earth (the endless). –2 The number one. –3 Names of various females; N. of Pārvatī. –4 Names of various plants; शारिवा, अनन्तमूल (a very medicinal plant) दूर्वा, आमलकी, गुडूची, अग्निमन्थ, कणा, लाङ्गली, दुरालभा, हरीतकी, अग्निशिखा, श्यामलता, पिप्पली. **–न्ती** A small silken cord tied round the left arm of a woman. **–न्तम्** 1 The sky, atmosphere. –2 Infinity, eternity. –3 Absolution, final beatitude; तदनन्ताय कल्पते Pt. 2. 72. –4 The Supreme Spirit, Brahman (परब्रह्म,); सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतिः। न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः। न वस्तुतोऽपि सर्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा ॥ –5 A sloping and a projecting member of the entablature representing a continued pent-roof; अनन्तं चान्तरिक्षं च प्रस्तरं चाष्टधा लुपाः। Māna. 18. 174-175. cf. अनन्तः शेषविष्ण्वोश्चानवधौ क्लीबमम्बरे। स्त्रियां स्याच्छारिवादूर्वाविशल्यालाङ्गलीषु च। हैमवत्यां गळूच्यां च...। Nm. **–Comp. –आत्मन्** *m.* the Supreme Spirit; **–कर** *a.* magnifying to any extent; P. III. 2. 21. **–ग** *a.* moving forever. **–गुण** *a.* possessed of endless merits; of countless or infinite number; प्लवङ्गानामनन्तगुणैर्धते Mv. 6. 55. **–चतुर्दशी, –°व्रतम्** [अनन्तस्य आराधनं यस्यां सा चतुर्दशी] the 14th day of the bright half of Bhādrapada when Ananta is worshipped. **–चरित्रः** N. of a Bodhisattva. **–जित्** (अनन्तानि भूतानि जितवान्) 1 N. of Vāsudeva, the conqueror of all. –2 N. of an Arhat deity. **–तान** *a.* of endless width, extensive. **–तीर्थकृत्** *m.* 1 one who visits many places of pilgrimage. –2 a Jaina deity. **–तृतीया** the third day of the bright half of भाद्रपद, मार्गशीर्ष or वैशाख; नभस्ये वाथ वैशाखे मार्गशीर्षेऽथवा पुनः। शुक्लपक्षतृतीयायां...उक्तानन्ततृतीयैषा सुतानन्दफलप्रदा. **–दृष्टिः** [अनन्ता दृष्टयो नेत्राणि यस्य] N. of Śiva, or of Indra. **–देवः** [अनन्तो देव इव] 1 the serpent Śeṣa. –2 [अनन्ते दीव्यति; दिव्-अच्] N. of Nārāyaṇa who sleeps on Śeṣa. –3 N. of the king of Kashmir. **–नेमिः** N. of the king of Mālava, a contemporary of शाक्यमुनि. **–पार** *a.* of endless width, boundless; °रं किल शब्दशास्त्रम् Pt. 1. **–पालः** N. of a warrior-chief in Kashmir. **–मतिः** N. of a Bodhisattva. **–मायिन्** *a.* of endless tricks, endlessly deceitful. **–मूलः** a medicinal plant (शारिवा). **–राशिः** an infinite quantity. **–रूप** *a.* of innumerable forms or shapes; epithet of Viṣṇu. **–वातः** a disease of the head, resembling tetanus. **–विक्रमिन्** N. of a Bodhisattva. **–विजयः** [अनन्तान् विजयते ध्वनिद्वारा अनेन] N. of Yudhiṣṭhira's conchshell. अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः Bg. 1. 16. **–वीर्यः** N. of the 23 rd Jaina Arhat of a future age. **–व्रतम्** 1 See अनन्तचतुर्दशी above. –2 N. of the 102 nd Adhyāya of the Bhaviṣyottara-Purāṇa. **–शक्ति** *a.* of boundless power, omnipotent, epithet of the Supreme Being. **–शयनम्** Travancore; Śrīraṅgapaṭṭana (because there are temples of Viṣṇu reclining on अनन्त Serpent). **–शीर्ष** N. of Viṣṇu or the Supreme Being. (**–र्षा**) N. of the wife of Vāsuki. **–शुष्म** *a.* Ved. possessing endless strength; endlessly blowing. **–श्री** *a.* of boundless magnificence, an epithet of the Supreme Being.

अनन्तक *a.* [स्वार्थे कन्] Endless, eternal &c. **–कम्** The Eternal or Infinite (among the Jainas).

अनन्त्य *a.* [अनन्तस्य इदं-यत्] Endless, eternal, infinite. **–न्त्यम्** 1 Eternity, infinity. –2 The foot of हिरण्यगर्भ.

अनन्तवत् *a.* [अस्त्यर्थे मतुप्] Endless, eternal. *m.* One of Brahman's four feet; earth, intermediate region, heaven, and ocean. पृथिवी कलान्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्य चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम। Ch. Up. 4. 6. 3.

अनन्तर *a.* [नास्ति अन्तरं व्यवधानं, मध्यः, अवकाशः &c. यस्य] 1 Having no interior or interior space, limitless; तदेतत् ब्रह्म अपूर्वमनन्तरं अबाह्यम् Bṛ. Up. 2. 5. 19. –2 Having no interval or interstice or pause (of space or time); compact, close; हलोऽनन्तराः संयोगः P. I. 1. 7, See संयोग. –3 (*a*) Contiguous, neighbouring, adjoining; Rām. 4.21. 14; अनयत् प्रभुशक्तिसंपदा वशमेको नृपतीननन्तरान् R. 8.19; भारतवर्षादुत्तरेण अनन्तरे किंपुरुषनाम्नि वर्षे K. 136; immediately adjoining; Ki. 2. 53, R. 7. 21; not distant from (with abl.); आत्मनोऽनन्तरममात्यपदं ग्राहितः Mu. 4; ब्रह्मावर्तादनन्तरः Ms. 2. 19 (Kull. अनन्तरः किंचिदूनः); अरेः अनन्तरं मित्रम् 7. 158; or in comp.; विषयानन्तरो राजा शत्रुः Ak. who is an immediate neighbour. –4 Immediately before or after; Rām. 4.

20. 31. तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम् Ku. 4. 32 soon after, just afterwards; अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः Chand. M. having characteristics mentioned just before. -5 Following, coming close upon (in comp.); शङ्खस्वनानन्तरपुष्पवृष्टि Ku. 1. 23; 2. 53; °करणीयम् S. 4 the next duty, what should be done next. -6 Belonging to the caste immediately following; पुत्रा येऽनन्तरस्त्रीजाः Ms. 10. 14. -7 Uninterrupted, unbroken, continuous. सुखदुःखान्विते लोके नेहास्त्येकमनन्तरम् Mb. 12. 153. 89. -8 Straight, direct (साक्षात्). अथवाऽनन्तरकृतं किंचिदेव निदर्शनम् Mb. 12. 305. 9. -रम् [न. त.] 1 Contiguity, proximity; अनन्तरविहिते चास्यासने K. 93. -2 Brahman, the supreme soul (as being of one entire essence). -रम् *ind.* [Strictly it is acc. of time कालात्यन्तसंयोगः; नास्ति अन्तरं यथा स्यात्तथा] 1 Immediately after, afterwards. -2 (with a prepositional force) After (with abl.); पुराणपत्त्रापगमादनन्तरम् R. 3. 7; त्यागाच्छान्तिरनन्तरम् Bg. 12. 12; गोदानविधेरनन्तरम् R. 3. 33, 36.; 2. 71; स्वामिनोऽनन्तरं भृत्याः Pt. 1; rarely with gen.; अङ्गदं चाधिरूढस्तु लक्ष्मणोऽनन्तरं मम Rām.; or in comp.; घनोदयाः प्राक् तदनन्तरं पयः S. 7. 30.; R. 4. 2.; Ms. 3. 252, Y. 2. 41; वचनानन्तरमेव K. 78 immediately after those words. -Comp. -जः or जा [अनन्तरस्या अनन्तरवर्णाया मातुः जायते] 1 the child of a Kṣatriyā or Vaiśyā mother, by a father belonging to the caste immediately above the mother's, स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान्। सदृशानेव तानाहुर्मातृदोषविगर्हितान्॥ Ms. 10. 6. -2 born immediately before or after; a younger or elder brother. Legitimate son (औरसः); आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः Mb. 13. 49. 3. (-जा) a younger or elder sister; अनुष्ठितानन्तरजाविवाहः R. 7. 32.; so °जात.

अनन्तरीय *a.* Next in succession.

अनन्तरयः [अन्तरयः दूरीकरणं, न. त.] Not leaving, non-abandonment.

अनन्तराय *a.* [न. ब.] Uninterrupted, without a break.

अनन्तर्गर्भिन् *m.* [अनन्तर्गर्भो यस्य; अस्त्यर्थे इनि, न. त.] N. of Kuśa grass used for the पवित्र, q. v.

अनन्द *a.* [न नन्दयति; नन्द्-णिच् अच्] Joyless, cheerless. -न्दः N. of a purgatory.

अनन्नम् Not food, that which is undeserving of being eaten. अनद्यमानो यदनन्नमत्ति Ch. Up.

अनन्य *a.* 1 Not different, identical, same, not other than, self; अनन्या राघवस्याहं भास्करस्य प्रभा यथा। सा हि सत्याभिसन्धाना तथानन्या च भर्तरि Rām. cf. Rām. 5. 21. 15. -2 Sole, unique, without a second. -3 [नास्ति अन्यः विषयो यस्य] Undivided, undistracted (mind &c.); having no other object or person to think of &c.; अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते Bg. 9. 22. In comp. अनन्य may be translated by 'not by another', 'directed or devoted to no one else', 'having no other object'. -4 unopposed; अनन्यां पृथिवीं भुंक्ते सर्वभूतहिते रतः Kau. A. -Comp. -अर्थ *a.* not subservient to any other object, principal. -आश्रित *a.* independent, not resorting to another. (-तम्) unencumbered estate (in law). -गतिः *f.* sole resort or resource. -गतिक *a.* [न. ब.] having no other resource or help, having no other resource left; अनन्यगतिके जने विगतपातके चातके Udb. -गुरु *a.* than which nothing is greater. अनन्यगुर्वास्तव केन केवलः पुराणमूर्तेर्महिमावगम्यते Śi. 1. 35. -चित्त, -चिन्त, -चेतस्, -मनस्, -मानस, -हृदय *a.* giving one's undivided thought or attention to, with undivided mind; विचिन्तयन्ती यमनन्यमानसा S. 4. 1; K. 75. -जः, -जन्मन् *m.* [नान्यस्मात् जन्म यस्य; आत्मभूश्चित्तभू इत्यादि तस्य व्यपदेशत्वात् or नास्ति अन्यद्यस्मात्सोऽनन्यः, विष्णुः; तस्माजातः] Cupid, the god of love; मा मूमुहत्खलु भवन्तमनन्यजन्मा Māl. 1. 32. -दृष्टि *a.* gazing intently or steadfastly at; °ष्टिः सविनारमैक्षत Ku. 5. 20. -देव *a.* having no other (superior) God, epithet of the Supreme Being. -परता exclusive devotion or attachment; पुरश्चक्षूरागस्तदनु मनसोऽनन्यपरता Māl. 6. 15. -परायण *a.* devoted to no other (woman); S. 3. 18. -पूर्वः [नान्या पूर्वा यस्य] having no other wife; वरस्यानन्यपूर्वस्य विशोकामकरोद्गुणैः Ku. 6. 92. (-र्वा) [न अन्यः पूर्वो यस्याः सा] a virgin (who never before belonged to another), a woman having no other husband; मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः। तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा॥ R. 4. 7. -भाज् *a.* [न अन्यम् अन्यां वा भजते] not devoted to any other person; अनन्यभाजं पतिमाप्नुहि Ku. 3.63. -विषय *a.* not applicable or belonging to any one else, exclusively applicable; यस्मिन्नीश्वर इत्यनन्यविषयः शब्दः V 1. 1; Mv. 1. 25. -वृत्ति *a.* 1 of the same nature. -2 having no other means of livelihood. -3 closely attentive. -शासन *a.* not ruled over by any one else; अनन्यशासनामुर्वी शशासैकपुरीमिव R. 1. 30; Dk. 2. -सामान्य, -साधारण *a.* not common to any one else, uncommon, exclusively devoted, applicable or belonging to one; अनन्यनारीसामान्यो दासस्त्वस्याः पुरूरवाः V. 3. 18; °राजशब्दः R. 6. 38; M. 5; 4. 10; not capable of being performed by any one else, Ku. 3. 19. -सदृश *a.* (-शी *f.*) having no equal, matchless, peerless यथैतानानन्यसदृशान् विद्धासि Pt. 1.

अनन्यता, -त्वम् Identity, sameness.

अनन्यादृश *a.* (-शी *f.*) Not like others, singular.

अनन्वयः [न. त.] 1 Want of connection. -2 (Rhet.) A figure of speech in which a thing is compared to itself, the object being to show that it is matchless and can have no other उपमान; उपमानोपमेयत्वं यदेकस्यैव वस्तुनः। इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः॥ गगनं गगनाकारं सागरः सागरोपमः। रामरावणयोर्युद्धं रामरावणयोरिव॥.

अनन्वित a. [न. त.] Unconnected. -2 Irregular, desultory; irrelevant, incoherent. -3 Not attended with, devoid of; as पुत्र°, भार्या° &c.

अनप *a.* [न सन्ति आधिक्येन आपो यत्र] Destitute of much water (as a puddle)

अनपकरणम्, -कर्मन्, -क्रिया 1 Not injuring. -2 Non-delivery. -3 (In law) Non-payment; दत्तस्यानपकर्म च Ms. 8. 4; दत्तस्य or वेतनस्य °क्रिया 214.

अनपकारः Harmlessness. **-कारिन्** *a.* Harmless, innocent.

अनपग *a.* Firm भवत्यनपगान्सर्वांस्तान्गुणान् Mb. 12. 287. 5.

अनपजय्य *a.* Ved. Whose victorious character cannot be reversed.

अनपत्य *a.* 1 Without issue, childless, without heir; °त्यश्च किल तपस्वी Ś. 6; K. 59, 63. -2 Not propitious or favourable to children; causing fall (पतनकारण) युयोत नो अनपत्यानि गन्तोः Rv. 3. 54. 18. °ता, -°त्वम् childlessness; नूनमनपत्यता मां वत्सलयति Ś. 7.

अनपत्रप *a.* Impudent, shameless.

अनपनिहित *a.* Ved. Not mutilated or curtailed.

अनपभ्रंशः Not a corrupt word; a properly formed word.

अनपयति *ind.* Very early (before the sun starts on his journey).

अनपर *a.* Having no other or second, having no follower, sole; तदेतद् ब्रह्मापूर्वमनपरम् Bṛ. Up. 2. 5. 19.

अनपराध, -धिन् *a.* Innocent, guiltless, harmless. **-धः** Innocence.

अनपवाचन *a.* Ved. Impossible to be talked away or wished away.

अनपवृक्त *a.* Not relinquishd or abandoned; न ह्युपेतमनपवृक्तं सच्छक्यमुपेतुम् । ŚB. on MS. 12. 1. 21.

अनपव्ययत् *a.* Ved. Not letting go; able.

अनपसर *a.* Having no egress or passage to creep out of, unjustifiable, inexcusable; निरन्वयोऽनपसरः Ms. 8. 198 (अपसरः प्रतिग्रहक्रयादिः) **-रः** -An usurper.

अनपस्पृश् *a.* Not obstinate.

अनपस्फुर्-र,-रत् *a.* (of a cow) Not refusing to be milked. स्रजश्वमनपस्फुराम् Rv. 6. 48. 11; तां धेनुम्...अनपस्फुरन्तीम् Rv. 4. 42. 10.

अनपाय *a.* 1 Free from loss or decay. -2 Imperishable, undiminished, undecaying; प्रणमन्त्यनपायमुत्थितम् (चन्द्रम्) Ki. 2. 11. **-यः** 1 Imperishable nature, freedom from decay or wear and tear; permanence. -2 N. of Śiva.

अनपायिन् *a.* Imperishable, firm, steady, unfailing, constant, durable, not transient; प्रसादाभिमुखे तस्मिश्र्श्रीरासीदनपायिनी R. 8. 17; 17. 46.; अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी Ku. 4. 31; चलेष्वर्थेषु लुब्धेन न यशःस्वनपायिषु Mu. 5. 14; Ki. 14. 37, 2. 43; Śi. 8. 50, 14. 65, 17. 26.

अनपार्थ *a.* With a genuine cause, rightly; सुखप्रिये धर्महीनेऽनपार्थे Mb. 5. 32. 12.

अनपावृत् [न. ब.] Not returning or coming back, non-recurrent (पुनरावृत्तिशून्य); unremitting (?).

अनपेक्ष,-क्षिन् *a.* [न. त.] 1 Regardless. -2 Careless, not minding or heeding, indifferent. -3 Independent or irrespective (of another), not requiring any other thing. -4 Impartial. -5 Irrelevant, unconnected, unconcerned. **-क्षा** Disregard, indifference, carelessness. **-क्षम्** *adv.* Without regard to, independently or irrespectively of; carelessly, accidentally; °त्वात् since it has no reference to.

अनपेत *a.* 1 Not gone off, not past; अनपेतकालं कथयांबभूवुः Ki. 6. 30 without loss of time, without delay. -2 Not deviating from, faithful to, not leaving (with abl.); अर्थादनपेतम् अर्थ्यम् Sk.; धर्मपथ्यर्थन्यायादनपेते P. IV. 4. 92. See अपेत also. -3 Not devoid of, possessed of; ऐश्वर्यादनपेतमीश्वरमयं लोकोऽर्थतः सेवते Mu. 1. 14.

अनप्त *a.* Ved. [न आप्तः, वेदे पृषो० ह्रस्वः] 1 Not seized or overcome by the enemy (शत्रुभिरनाप्त); -2 not watery (?) अनप्तमप्सु दुष्टरं सोमं पवित्रे आ सृज Rv. 9. 16. 3.

अनप्रस् *a.* [नास्ति अप्रः रूपं यस्य] Ved. Destitute of form or shape, shapeless, actionless (कर्महीन).

अनप्सरस्,-रा *f.* Not an Apsaras, unworthy of a celestial nymph; अनप्सरेव प्रतिभासि V. 2.

अनफा (Astrol.) A particular configuration of planets; रविवर्जं द्वादशगैरनफा; सच्छीलं सुखान्वितं प्रभुं ख्यातियुक्तमनफायाम् Dīpikā.

अनभिज्ञ *a.* Ignorant of, unacquainted with, unused to, (usually with gen.); °ज्ञः कैतवस्य Ś. 5; वृत्तान्तानामनभिज्ञास्मि K. 236; °ज्ञः परमेश्वरगृहाचारस्य Mv. 2; अनभिज्ञास्तमिस्राणां दुर्दिनेष्वभिसारिकाः Ku. 6. 43.

अनभिधानम् 1 Absence of the expression of the desired meaning (वार्त्तिक 2. 2. 24. 16). -2 A word not in standard use though grammatically correct.

अनभिम्लात *a.* [न. त.] Not faded. **-Comp. -वर्ण** *a.* Ved. of unfaded or undiminished lustre, resplendent. सो अपां नपादनभिम्लातवर्णः Rv. 2. 35. 13.

अनभिलक्षितः An impostor.

अनभिलाष *a.* Free from desire. **-षः** 1 Want of appetite or desire. -2 Non-relish.

अनभिवादक *a.* Opposed, not agreeing with. न खलु भवान् अस्मत्संकल्पानभिवादकः । Avimāraka I.

अनभिशस्त,-स्ति,-स्त्य *a.* Ved. Blameless, faultless; °शस्तेन्य Yv. 5. 5 leading to perfection or to heaven.

अनभिसन्धानम् Absence of design or purpose; so अनभिसन्धिः; °कृत done undesignedly.

अनभिहित *a.* 1 Not named or asserted; see अभिहित under अभिधा. -2 Not fastened (Ved.). **-तः** N. of the chief of a Gotra.

अनभ्यन्तर *a.* Unacquainted, ignorant; अनभ्यन्तरे खल्वावां मदनगतस्य वृत्तान्तस्य Ś. 3.

अनभ्यावृत्तिः *f.* Non-repetition; मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी Si. 2. 43.

अनभ्याश,-स *a.* Not near, distant &c.; °समित्य *a.* to be shunned from afar, Sk.

अनभ्र *a.* Cloudless; इयमनभ्रा वृष्टिः this is (like) a shower from a cloudless sky, *i. e.* something quite unexpected or sudden. कथमनभ्रा वृष्टिः Nag. 5.

अनभ्रि *a.* Ved. Epithet of rainwater; requiring no shovel (?).

अनमः [न नमति अन्यान्] A Brāhmaṇa (one who does not bow down to others and returns salutations made to him by others with a blessing).

अनमितंपच (=मितंपच) *a.* 'Not cooking what has not been first measured.' Miserly, niggardly.

अनमित्र *a.* Having no enemies. **-त्रम्** A state of having no enemies.

अनमीव *a.* Ved. [नास्ति अमीवो रोगो यस्य न. ब.] Well, happy, free from disease; comfortable, salubrious, sinless. **-वम्** Good or comfortable state, happiness, prosperity. स्वति चास्मा अनमीवं च धेहि Rv. 10. 14. 11.

अनम्बर *a.* Wearing no garment. **-रः** A Buddhist mendicant.

अनम्र *a.* Not humble, haughty, proud; अनम्राणां समुद्धर्तुः R. 4. 35.

अनयः [अप्रशस्तो नयः] 1 Bad management or conduct; injustice; unfairness; समृद्धिरनयाद्विनश्यति Pt. 1. 169; Bh. 2.42. -2 Bad policy or course of conduct, evil course; अनयो नयसंकाशो हृदयान्नापसर्पति Pt. 3.184. -3 Adversity, calamity, distress; जीवेदेतेन राजन्यः सर्वेष्वप्यनयं गतः Ms. 10. 95 reduced to straits; 102. -4 [अयः शुभावहो विधिस्तदन्यः अनयः] Misfortune, adversity; ill-luck. cf. अनयो व्यसने दैवे चाशुभे चापदि स्मृतः । Nm. -5 A variety of dice-play, gambling पतञ्जलि on P. V. 2. 9. शाराणां वामावर्तेन अभीष्टस्थानननयनम् -6 A deceit, fraud; एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ Rām. 6. 8. 18.

अनरण्यः N. of a king of the solar race, a descendant of Ikṣvāku and king of Ayodhyā, who was overthrown by Rāvaṇa.

अनराल *a.* straight; यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् U. 3. 16.

अनरुस् *a.* [न. ब.] Ved. Not wounded, healthy, sound.

अनर्गल *a.* [न. ब.] 1 Free from bar or obstruction, free to move, unrestrained, unhampered; तुरङ्गमुत्सृष्टमनर्गलम् R. 3. 39. -2 Unlocked.

अनर्घ *a.* [नास्ति अर्घो मूल्यं यस्य न. ब.] Invaluable, priceless, inestimable; अनर्घशीलः R. 5. 2; दत्तेऽर्घे महति महीभृतां पुरोऽपि त्रैलोक्ये मधुभिदभूदनर्घ एव॥ Si. 14. 88. **-र्घः** [न. त.] Wrong or improper value. **-Comp. -राघवम्** N. of a drama in 7 acts by Murāri Miśra; also called Murāri Nāṭaka after its author and supposed to have been written between the 12th and the 14th century.

अनर्घत्वम्, -ता Pricelessness, invaluable nature; H. Pr. 4.

अनर्घ्य *a.* Invaluable; unsurpassed in reverence due from others, highly respected; अनर्घ्यमर्घेण तमद्रिनाथः Ku. 1. 58.

अनर्घ्येय *a.* see अनर्घ; अनर्घ्येया महाराज द्विजा वर्णेषु चोत्तमाः Mb. 13. 51. 22.

अनर्थ *a.* [न. ब.] 1 Useless, worthless; शुनः पुच्छमिवानर्थं पाण्डित्यं धर्मवर्जितम् Pt. 3. 97. -2 Unfortunate, unhappy. -3 Harmful, disastrous, bad; वित्तज्ञानानुवर्तिनोऽनर्था अपि प्रियाः स्युः Dk. 160; wicked (opp. दक्षिण). -4 Not having that meaning (but another); having no meaning, nonsensical, meaningless. -5 Poor. **-र्थः** [न. त.] 1 Nonuse or value. -2 A worthless or useless object. -3 A reverse, evil, calamity, misfortune; R. 18. 14; रन्ध्रोपनिपातिनोऽनर्थाः Ś. 6; एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् H. 1; cf. छिद्रेष्वनर्था बहुलीभवन्ति &c.; Ms. 4. 193, H. 4. 92; harmful object, danger; अर्थमनर्थं भावय नित्यम् Moha M. 2. -4 Nonsense, want of sense. -5 N. of Viṣṇu (आप्तसर्वकामत्वात्तस्य तथात्वम्). **-Comp. -अन्तरम्** [न अर्थान्तरम्] sameness or identity. cf. आरम्भो व्यापारः क्रियेत्यनर्थान्तरम् ŚB. on MS. 11. 1. 10. **-कर** *a.* (**-री** *f.*) 1 doing useless or unprofitable things. -2 mischievous, harmful; unprofitable, productive of evil. **-नाशिन्** *m.* N. of Śiva (destroyer of calamities). **-भाव** *a.* malicious. **-लुप्त** *a.* [दृष्टार्थेन अलुप्तः] not devoid of the apparent meaning; free from all that is worthless. **-संशयः** [अनर्थकारी संशयः शाक. त.] 1 a great evil, hazardous adventure; प्रतिनिवर्ततामस्मादनर्थसंशयात् Māl. 5. 2. [न. त.] not a risk of one's money; safety of one's wealth,

अनर्थ्य, अनर्थक *a.* 1 Useless; meaningless; सर्वमप्येतदनर्थकम् Ve. 1; °आयास K. 108; not significant, as a particle used expletively. -2 Nonsensical. -3 Unprofitable. -4 Unfortunate. **-कम्** Nonsensical or incoherent talk.

अनर्व *a.* Ved. Not lax or loose (अशिथिल) त्रिनाभिचक्रमजरमनर्वम् Rv. 1. 164. 2.; free, unobstructed, permanent.

अनर्वन् *a.* [अर्व्-हिंसायां कनिन्, अर्वा सपत्नः न. त.] 1 Not inimical, not hostile or to be hated (अद्वेष्य); यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परिपातो अंहसः Rv. 1. 136. 5. -2 Having no horse.

अनर्विश् *m.* [अनसा शकटेन विशति प्राप्नोति; विश्-क्विप्, अहरा° रुः] 1 One who sits in a cart to fetch fuel &c. -2 [ऋ-कर्मणि विच्, अरं गन्तव्यं प्रति विशति, विश्-क्विप्, न. त.] One who is not able to reach the destination.

अनर्शराति *a.* [अनर्शाय अपापिष्ठाय रातिर्दानं यस्य] One who does not give to sinful persons, a sinless donor.

अनर्ह *a.* 1 Not deserving, not fit, not worthy of (with gen. or in comp.); अनर्हा गृहवासस्य Pt. 4.; नान् हव्यकव्ययोर्विप्राननर्हान् मनुरब्रवीत् Ms. 3. 150. –2 Inadequate, unsuitable. –3 Undeserving of reward or punishment.

अनलः [नास्ति अलः पर्याप्तिर्यस्य, बहुदाह्यदहनेऽपि तृप्तेरभावात् Tv.; cf. नाग्निस्तृप्यति काष्ठानाम्; said by some to be from अन् to breathe]. 1 Fire. –2 Agni or the god of fire. See अग्नि. –3 Digestive power, gastric juice; मन्दः संजायतेऽनलः Suśr. –4 Wind. –5 Bile. –6 One of the 8 Vasus, the fifth. –7 N. of Vāsudeva. –8 Names of various plants: चित्रक, रक्तचित्रक Plumbago Zeylanica and Rosea, भल्लातक the marking-nut tree. –9 The letter र्. –10 The number three. –11 (Astr.) The 50th year of Bṛhaspati's cycle. –12 The third lunar mansion कृत्तिका. –13 A variety of Pitrideva or manes (कव्यवाहोऽनलः सोमः). –14 [अनान् प्राणान् लाति आत्मत्वेन] The soul (जीव). –15 N. of Viṣṇu (न नलति गन्धं प्रकटयति न बध्यते वा नल्–अच्). –16 The Supreme Being. cf. अनलो राज्ञि नाले च पुंस्यग्न्यौषधिभेदयोः Nm. –17 Anger; करिणां मुदे सनलदानलदाः Ki. 5. 25. –Comp. –आत्मजः N. of Kārtikeya; Mb. 9. 44. 11. –आनन्दः N. of a Vedāntic writer, author of Vedānta-Kalpataru. –द *a.* [अनलं द्यति] 1 removing or destroying heat or fire; –2 = अग्निद q. v. –दीपन *a.* [अनलं दीपयति] promoting digestion, stomachic. –प्रभा [अनलस्य प्रभेव प्रभा यस्य] N. of a plant (ज्योतिष्मती) Helicacabum Cardiospermum. (Mar. लघुमालकांगोणी). –प्रिया N. of Agni's wife स्वाहा. –वाटः N. of ancient Paṭṭana. –सादः loss of appetite, dyspepsia.

अनलस *a.* 1 Not lazy, active, diligent, watchful, अनलसोऽनलसोमसमद्युतिः R. 9. 15. –2 Unable, incompetent.

अनलिः [अनिति–अच् अनः अलिर्यत्र ब. शकन्ध्वा.] N. of a tree (बकवृक्ष) Sesbana Grandiflora (तत्पुष्पाणां मधुपूर्णतया तन्मधुभिर्भ्रमराणां जीवनधारणात्तथात्वम् Tv.) (Mar. अगस्ता).

अनल्प *a.* 1 Numerous. –2 Not a little; not small, liberal, noble (as mind &c.); इति क्षमं नैतदनल्पचेतसाम् Ki. 14. 18; much; जल्पन्त्यनल्पाक्षरम् Pt. 1. 136 profusely, in many words; विकसितवदनामनल्पजल्पेऽपि Bv. 1. 100; 2. 138. –Comp. –घोष *a.* very clamorous or noisy. –मन्यु *a.* greatly enraged.

अनवकाश *a.* [न. ब.] 1 Having no scope or occasion, uncalled for. –2 Inapplicable. –3 Having no opportunity or space. –शः [न. त.] Absence of room or scope.

अनवकाशिकः Practising penance of standing on one leg; गात्रशय्या अशय्याश्च तथैवानवकाशिका Rām. 3. 6. 3.

अनवक्लृप्तिः *f.* Impossibility, improbability, incredibility (P. III. 3. 145); अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि.

अनवगीत *a.* Faultless प्रकृत्या कल्याणी मतिरनवगीतः परिचयः U. 2. 2.

अनवग्रह *a.* [न. ब.] Irresistible, uncotrolled, impetuous, resistless; सुकुमारकायमनवग्रहः स्मरः (अभिहन्ति) Māl. 1. 39.

अनवच्छिन्न *a.* 1 Not bounded or marked off, not separated or cut. –2 Unlimited, immoderate, excessive. –3 Undefined; दिक्कालादि° Bh. 2. 1; 3. 1; undiscriminated, unmodified. –4 Uninterrupted, continuous.

अनवद्य *a.* [न अवद्यः निन्द्यः] Faultless, blameless, unobjectionable, irreproachable; किमु धनैर्विद्यानवद्या यदि Bh. 2. 17; उद्वहदनवद्यां तामवद्यादपेतः R. 7. 70. –द्या N. of a damsel. –Comp. –अङ्ग, –रूप *a.* having faultless limbs or from, exquisitely handsome; रूपस्य अनवद्यता M. 2. (–अङ्गी) a woman with a faultless form. –रागः *a.* variety of gems. Kau. A. 2. 11.

अनवद्राण *a.* Not sleepy.

अनवधान *a.* [न. ब.] Careless, inattentive. –नम् Inadvertence, inattention; °ता carelessness, remissness in duty (प्रमाद); कर्तव्याकरणं यत्राकर्तव्यस्याथवा क्रिया। उच्यते द्वितयं तत्र प्रमादोऽनवधानता॥.

अनवधि *a.* Unlimited, infinite.

अनवन *a.* [न. ब.] Affording no help or protection. अनवनी नवनीपवनावलिः Śi. 6. 37.

अनवनामित *a.* Not lowered or bent down; °वैजयन्तः a Buddhist term for a future universe (lit. having banners unlowered).

अनवपृग्ण *a.* Ved. Spreading all around, not closely united; अनवपृग्णा वितता वसानम् Rv. 1. 152. 4.

अनवब्रव *a.* [अवब्रू–अच् न वचादेशः न. त.] Irreproachable, not open to censure (अपवादवर्जित); speaking authoritatively; विजेषकृदिन्द्र इवानवब्रवः Rv. 10. 84. 5.

अनवभ्र *a.* [न भ्रंशते वा. ड. Tv.] Undiminished, undecaying, durable, lasting (अवभ्रंशशून्य); °राधस् प्रस्कम्भदेष्णा अनवभ्रराधसो Rv. 1. 166. 7 having undiminished wealth.

अनवम *a.* Not low or inferior; high, exalted, superior; सुधर्मानवमां सभाम् R. 17. 27. 9. 14,

अनवर *a.* Not inferior; Mb. 3.

अनवरत *a.* Incessant, continuous, uninterrupted; °धनुर्ज्यास्फालनक्रूरपूर्वम् Ś. 2. 4. –तम् *adv.* Incessantly, continuously.

अनवराध्यं *a.* [अवरस्मिन् अर्धे भवः, यत् न. त.] Chief, best, excellent.

अनवलम्ब –म्बन *a.* [न. ब.] Having no prop or support; not dependent. –म्बः –म्बनम् Independence.

अनवलोभनम् [न अवलुप्यते पुमानन्येन, अवलुप्–ल्युट् पृषो॰ पस्य भः Tv.] A sort of purificatory ceremony to be performed in the case of a pregnant woman in the third month after conception.

अनवस *a.* [अव्-असच् अवसः भोजनं प्रीतिकरत्वात् न. ब.] Ved. Having no (wholesome) food to eat (पथ्याशनरहित); अनवसो अनभीशू रजस्तूर्वि... Rv. 6. 66. 7; not stopping to eat by the way (?).

अनवसर *a.* 1 Busy, having no leisure or interval for repose. -2 Illtimed, inopportune. -3 Out of place, baseless; °रोयं घण्टानादः H. 3. -**रः** 1 Absence of leisure. -2 Illtimedness, unseasonableness; कं याचे यत्र तत्र ध्रुवमनवसरग्रस्त एवार्थिभावः Māl. 9. 30.

अनवसान *a.* [न. ब.] Endless, having no setting; free from death.

अनवसित *a.* [न. त.] Not ended or finished; not determined. -**ता** N. of a kind of Triṣṭubh metre, consisting of four lines with 11 feet in each.

अनवस्कर *a.* Free from dirt, pure, clear.

अनवस्थ *a.* [नास्ति अवस्था यत्र] Unsteady; °स्थो निष्करुणश्च Dk. 135; unsettled, not fixed; अनवस्थौ हि दृश्येते युद्धे जयपराजयौ Rām. 5. 37. 55; °स्थो वायुः Śi. 11. 28. -**स्था** [न. त.] 1 Instability, unsettled condition, disorder, confusion. -2 Loose or unsteady conduct, incontinence. -3 (In phil.) Absence of finality or conclusion, an endless series of statements or causes and effects, one of the faults of reasoning (उपपाद्योपपादकयोरविश्रान्तिः); एवमप्यनवस्था स्याद्या मूलक्षतिकारिणी K. P. 2; एवं च °प्रसङ्गः Ś. B. -4 Not being 10 days old (दशाहाभावः).

अनवस्थान *a.* Unstable, unsteady, fickle. विस्रम्भमनवस्थानस्य Bhāg. 5. 6. 2. -**नः** Wind. -**नम्** 1 Instability, uncertainty, unsettled nature; जयपराजयानवस्थानात् Dk. 161. -2 Looseness of conduct, incontinence.

अनवस्थित *a.* 1 Unsteady, fickle, unsettled; न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते Bhāg. 5. 6. 3. °स्तिमितमूढघूर्णन्नयनः U. 3 with unsteady eyes; दयितास्वनवस्थितं नृणां न खलु प्रेम चलं सुहृज्जने Ku. 4. 28. -2 Changed, altered; अहो °तो भूमिसंनिवेशः U. 2. -3 Faithless, loose in morals or moral conduct, dissolute (व्यभिचारिन्); नारीर्हत्वाऽनवस्थिताः Ms. 11. 138. -4 Unable to stay or remain; प्रस्थितं तमनवस्थितं प्रियाः R. 19. 31; °त्वम्, °स्थितिः instability, looseness of conduct. Bhāg. 5. 14. 24. -**तम्** Unmethodical, not in order; प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितम् Rām. 5. 55. 15.

अनवह्वर *a.* [अवह्व-कौटिल्ये-अच् न. त.] Not crooked, straightforward. ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ॥ Rv. 9. 41. 6.

अनवाञ्च् *a.* Not tending downwards, looking up.

अनवानम् *ind.* [अवानः श्वासोच्छ्वासः स यथा न स्यात्तथा] Without breathing between, in one breath, without a pause, *uno tenore*.

अनवाय *a.* [अव-इ-घञ् अवायः अवयवः, न. ब.] Without parts (निरवयव); uninterrupted, unyielding. ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥ Rv. 7. 104. 2.

अनवेक्षक *a.* Regardless of; careless, indifferent.

अनवेक्ष,-क्षा = अनपेक्ष-क्षा q. v.

अनवेक्षणम् 1 Carelessness, inattention; अनवेक्षणादपि कृषिः Pt. 1. 169. -2 Want of supervision.

अनव्रत *a.* [न. ब.] Not altogether destitute of holy or ascetic performances. -**तः** A Jaina devotee who is so.

अनशनम् Fasting, abstinence from food, fasting oneself to death; कृशामनशनेन च Rām. 5. 15. 23. °नं च ग्राहयित्वा Dk. 156 making him fast; °नान् उपिशन्ति Pt. 4. *a.* Without food, fasting &c.

अनशनाय *a.* Ved. Not hungry.

अनश्नत् *a.* Not eating; अनश्नन्नन्यो अभि चाकशीति Rv. 1. 164. 20; °साश्नम्नः the sacrificial fire in the sabhā which is approached before eating or breakfast.

अनश्व *a.* Having no horse or horses. -**श्वः** Something that is not a horse.

अनश्वन् *m.* N. of Parikṣit's father.

अनश्वर *a.* (-**री** *f.*) Imperishable.

अनस् *n.* [अनिति शब्दायते अन-असुन्] 1 A cart; तद्यथानः सुसमाहितमुत्सर्जद्यायादेवमेवायं शारीर आत्मा... Br. Āri. Up. 3. 35. उद्गाता चाप्यनः क्रये Ms. 8. 209; मुसलोलूखलाऽनसाम् (प्रोक्षणम्) Y. 1. 184, 3. 269, Śi. 12. 26. -2 [अनिति जीवत्यनेन] Food, boiled rice. -3 Birth. -4 A living being. -5 A kitchen. -6 A parent (father or mother); said to be *f.* in these two senses. At the end of Avyayībhāva comp. अनस् is changed to अनस; as अध्यनसम् &c.; also at the end of Tat. Comp.; महानसम् &c.

अनसूय-यक *a.* [न. ब.] Free from malice, not envious, not spiteful; श्रद्दधानोऽनसूयश्च Ms. 4. 158; श्रद्धावाननसूयश्च शृणुयादपि यो नरः । Bg. 18. 71. -**या** [न. त.] 1 Absence of envy, charity of disposition, freedom from spite or ill-will; न गुणान् गुणिनो हन्ति स्तौति चान्यगुणानपि । न हसेच्चान्यदोषांश्च सानसूया प्रकीर्तिता. -2 N. of a friend of Śakuntalā. -3 N. of a daughter of Dakṣa. -4 N. of Atri's wife, the highest type of chastity and wifely devotion. [She was very pious and given to austere devotion by virtue of which she had obtained miraculous powers. Several stories are told to illustrate them. When the earth was devastated by a terrible drought which lasted for 10 years, Anasuyā created water, fruits, roots &c. by means of her ascetic powers and saved many lives. On one occasion when the sage Māṇḍavya was about to be impaled, the wife of a sage happened to touch the stake as she passed by, whereupon Māṇḍavya cursed her that she would become a widow at sunrise. She, however, prevented the sun from rising, and all actions of men being consequently stopped, the gods, sages &c. went to Anasuyā, her freind, who, by the force of her penance, made

the sun rise without, at the same time, bringing widowhood on her friend. Another legend is also told in which Anasūyā changed Brahmā, Viṣṇu and Maheśa into infants, when, at the instigation of their wives, they attempted to test her chastity, but restored them to their former shapes at the importunities of their humbled consorts. She is also said to have caused the three-streamed Ganges to flow down on the earth near the hermitage of her husband for the ablutions of sages: see R. 13. 51. In the Rāmāyaṇa she is represented as having been very kind and attentive to Sītā whom she favoured with sound motherly advice on the virtues of chastity, and at the time of her departure gave her an unguent (See R. 12. 27, 14. 14) which was to keep her beautiful for ever and to guard her person from the attempts of rapacious beasts, demons &c. She was the mother of the irascible sage Durvāsas]. सा त्वेवमुक्ता वैदेही त्वनसूयानसूयया Rām. 2. 18. 1.

अनसूयु *a.* = अनसूय; इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे Bg. 9. 1.

अनस्थ,-स्थिक [न. ब.] Boneless. **-स्थः** 1 A boneless limb or member. -2 Without parts, epithet of प्रधान of the Sāṅkhyas or ईश्वरमाया.

अनहंवादिन् *a.* Prideless, modest; मुक्तसङ्गोऽनहंवादी... (सात्त्विक उच्यते) Bg. 18. 26.

अनहन् *n.* [न अहः अप्रशस्तमहः] A bad or unlucky day.

अना *ind.* Ved. Thus, hereby, indeed.

अनाकार *a.* Formless, shapeless, epithet of the Supreme Being.

अनाकालः [न. त. निपातः] 1 Inopportune time. -2 [आ सम्यक् अन्नादिसंपन्नः कालः आकालः न. त. Tv.] Famine (perhaps an irregular form for अन्नाकाल). **-Comp. -भृतः** one who, to save himself from starvation in a famine, voluntarily becomes a slave of another.

अनाकाश *a.* [न. ब.] 1 Opaque, not transparent. -2 Having no transparent atmosphere; differing from it. अपश्यत्कृतमाकाशमनाकाशं जनार्दनः Mb. 10. 6. 18. **-शः,-शम्** Not an atmosphere, one undeserving of its name.

अनाकुल *a.* 1 Not perplexed or confused, calm, collected, self-possessed. -2 Regular, consistent. अनाकुलान्यव्यञ्जसमुद्रतानि (पदानि सप्त) Bu. ch. 1. 33.

अनाकृत *a.* Not prevented (अनिवारित); unreclaimed ह्वारो न वक्वा जरणा अनाकृतः Rv. 1. 141. 7.

अनाक्रन्द *a.* Maddened with pain; इति लोकमनाक्रन्दं मोहशोकपरिप्लुतम् Mb. 12. 331. 35.

अनाक्रान्त *a.* Unassailed. **-ता** [आक्रमितुमयोग्या सर्वतः कण्टकावृतत्वात्, न. त.] Prickly nightshade, Solanum Jacquini (कण्टकारिवृक्ष) (Mar. रिंगणी).

अनाक्षित् *a.* Ved. Not staying.

अनाग *a.* [न आ सम्यग् गच्छति स्वर्गं अनेन नागः अधर्मः; न. ब. Tv.] Sinless; अनागान् सविता देवो वरुणाय वोचत् Rv. 10. 12. 8. (अनागान् = अपापान्). **-गा** N. of a river.

अनागत *a.* [न आगतः, न. त.] 1 Not come or arrived; तावद्भयस्य भेतव्यं यावद्भयमनागतम् H. 1. 54. -2 Not got or obtained; वार्धिष्णुमाश्रयमनागतमभ्युपैति Śi. 5. 14; so °आर्तव. -3 Future, to come; see compounds below. -4 Not learnt or attained, unknown. **-तम्** The future time, future; °तं यः कुरुते स शोभते Pt. 3. 164 he shines (thrives, prospers) who provides for the future; अनागतवतीं चिन्तामसंभाव्यां करोति यः Pt. 5. 71. **-Comp. -अवेक्षणम्** looking to the future, provident thought, foresight. **-आबाधः** [अनागतः आबाधः दुःखम्] future (physical) trouble or calamities, illness &c. affecting the body in times to come; °प्रतिषेधनीयम् N. of chapter 24 of the चिकित्सास्थान in Suśruta. **-आर्तवा** [स्त्रीपुष्पविकासनम् आर्तवम्, न आगतमार्तवं यस्याः] a maiden who has not yet arrived at puberty. **-विधातृ** *m.* [अनागतम् उद्दिश्य विदधाति] one who provides for the future, provident, prudent (used as the name of a fish in Pt. 1. 318; H. 4. 6); अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति॥ (where Dr. Peterson translates the three names by 'Mr. Provider-against-a-future-evil', 'Mr. Cool-head', and 'Mr. what-will-be-will-be').

अनागतिः *f.* Non-arrival, non-attainment, non-access.

अनागम *a.* 1 Not come, not present. -2 [न. ब.] (In law) Without the title-deed or document of possession (such as purchase deed &c.), anything possessed from time immemorial and without any documentary proof; °उपभोगः enjoyment of property without such a deed. **-मः** 1 Non-arrival. -2 Non-attainment.

अनागम्य *a.* Unapproachable.

अनागामिन् *m.* 1 Not coming, not arriving. -2 Not future, not likely to return. *-m.* An epithet of the third among the 4 Buddhist orders.

अनागामुक *a.* Not likely to return.

अनागन्धित *a.* Not smelt; (fig.) not touched or affected; सर्वदोषानागन्धितं प्रतिवचनमाह Śaṅkara.

अनागस् *a.* 1 Innocent, blameless; आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि Ś. 1. 11. -2 Conferring bliss or happines.

अनाचार *a.* Devoid of customary observances or duties, improper in behaviour, unprincipled, regardless of custom, law or propriety &c.; also अनाचारिन् in this sense. **-रः, -अनाचरणम्** Absence of due observances or customary duties, improper conduct, departure from established usage or principle; अनाचार is of two kinds विहितस्य अननुष्ठानं निषिद्धस्य चानुष्ठानम्.

अनाघ्रात *a.* 1 Unknown, not properly known. -2 Surpassing all that has yet been known.

अनातप *a*. Free from or devoid of heat or the blaze of the sun, not exposed to heat, cool, shady; वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः Bh. 2. 90. -**पः** Coolness, shade.

अनुबन्धनम् Connection, succession, series &c.

अनुबन्धिका *f.* Pain in the joint; अनुबद्धमनुबन्धिकाभिः Hch. 5.

अनुबन्धिन् *a.* (oft. at the end of comp.) 1 (*a*) Connected with, attached or related to; अहो सरसरमणीयानुबन्धिनी स्त्रीजनकथा Māl. 1 having for its contents or subject-matter &c.; परिचर्यानुबन्धी Dk. 101 continuing. (*b*) Mixed or blended with; नीलकण्ठकलकेकानुबन्धिना मन्द्रहुङ्कृतेन मामनुमन्यते Māl. 9. -2 Followed by, accompanied with; having in its train, resulting in having as a consequence; तदियमापत्समन्ततोऽनर्थानुबन्धिनी Dk. 60; अयमर्थोऽर्थानुबन्धी 67; शास्त्रं शास्त्रान्तरानुबन्धि 156; दुःखं दुःखानुबन्धि V. 4 one misfortune closely follows another, or misfortunes never come single; K. 349; महोदयैस्तस्य हितानुबन्धिभिः Ki. 1. 20; कर्मानुबन्धीनि मनुष्यलोके Bg. 15. 2; गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव R. 1. 22 being associated with. -5 Lasting, thriving, prosperous, growing apace, continuous; uninterrupted; अपि त्वदावर्जितवारिसंभृतं प्रवालमासामनुबन्धि वीरुधाम् Ku. 5. 34; ऊर्ध्वं गतं यस्य न चानुबन्धि R. 6. 77 continuous uninterrupted or all pervading; K. 246, 303.

अनुबन्ध्य *a.* Principal, chief, primary (which may receive an adjunct, as a root, a disease &c.). -2 [वधार्थं बन्धः अनुबन्धः कर्मणि ण्यत्] To be killed (as a bull), one of the three principal sacrificial animals at the ज्योतिष्टोम sacrifice; गौरनुबन्ध्यः K. P. 2.

अनुबलम् [अनु पश्चात्स्थितं बलम्] A rearguard, an auxiliary army following another.

अनुबुध् 4 A. To awake, to recollect; learn, obtain information of, know, be aware of; न सत्यमनुबुध्यते K. 104 does not perceive or recognise. -*Caus.* 1 To remind, put in mind of; अये सम्यगनुबोधितोऽस्मि Ś. 1 well reminded. -2 To advise, inform; इति शिष्येण किलान्वबोधयत् R. 8. 75.

अनुबोधः 1 An after-thought, recollection. -2 Reviving the scent of faded perfumes, replacing them when removed by bathing.

अनुबोधनम् Recollection, reminding.

अनुब्राह्मणम् 1 A work resembling a Brāhmaṇa (ब्राह्मणसदृशो ग्रन्थः P. IV. 2. 62 Sk.). -2 *ind.* According to the Brāhmaṇa.

अनुब्राह्मणिन्, -क *a.* [तदधीते वेद वा इति इनिप्रत्ययः] One who learns or knows an अनुब्राह्मण.

अनुभव-भाव &c. See under अनुभू.

अनुभाजित *a.* Worshipped नानुबध्येत तद्वाक्यैर्विश्रम्भैश्चानुभाजितः Bhāg. 10. 47. 41.

अनुभाषणम् 1. Repetition of an assertion to refute it. -2 Repeating what has been said. -3 Conversation, dialogue (अनु सह भाषणम्).

अनुभाषितृ *a.* Speaking in reply; श्लाघ्यो भवान्स्वजन इत्यनुभाषितारम् (क्षितीशम्) R. 16. 86.

अनुभासः A kind of crow.

अनुभुज् 7 A. To enjoy, experience (good or bad things), suffer (as the due consequences of one's deeds); मेघमुक्तविशदां स चन्द्रिकाम् अन्वभुङ्क्त R. 19. 39; सा मण्डनान्मण्डनमन्वभुङ्क्त Ku. 7. 5.

अनुभोगः 1 Enjoyment. -2 A grant of a land in perpetuity for service done.

अनुभू 1 P. 1 To enjoy; taste, experience, feel, have experience or knowledge of, notice, perceive (by the senses &c.); to suffer, bear, undergo (as misery &c.); अन्वभवं च मधुकर इव नवमालिकामार्द्रसुमनसम् Dk. 121; असक्तः सुखमन्वभूत् R. 1. 21; भुवनालोकनप्रीतिः स्वर्गिभिर्नानुभूयते Ku. 2. 45; R. 7. 28; आत्मकृतानां हि दोषाणामनुभवितव्यं फलमात्मनैव K. 121; अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णम् Ś. 5. 7; Ku. 4. 41; संवत्सरमात्रं प्रेष्यभावमनुभूय M. 5 undergoing the state of a servant; षष्ठमनुभवन् वर्षम् K. 77 being in the sixth year, six years old. -2 To learn, hear, understand; वेदाश्चानुभवसि Ch. Up. -3 To try, test, put to the test; न त्वं तेनान्वभाविष्ठा नान्वभावि त्वयाप्यसौ। अनुभूता मया चासौ तेन चान्वभविष्यहम्॥ Bk. 5. 35. -4 To comprise, include, grasp; द्वे वामलके अनुभवति Ch. Up. -5 To come up with, arrive at, get, obtain (mostly Ved. in these senses). -6 To turn or incline to; यत् त्वा भवतो रोदसी अनु Rv. 10. 147. 1. -7 To act favourably; य एवैतमनुभवति यो वै तमनुभार्यान् बुभूर्षति Bri. Up. 1. 3. 18. -*Caus.* 1 To cause to enjoy, feel, or experience; अनुभावयितुं मन्ये यत्नः संप्रति मां विधेः Mu. 6. 15; स्नानभोजनादिकमनुभावितोऽस्मि Dk. 125; आमोदो न हि कस्तूर्याः शपथेनानुभाव्यते Bv. 1. 120. -2 To reflect on, meditate, think of; मनसा तमेव वृत्तान्तमन्वभावयत् K. 176, 279. -3 To infer, know; तस्मात्परोक्षवृत्तीनां फलैः कर्मानुभाव्यते H. 4. 101.

अनुभवः 1 Direct perception or cognition, knowledge derived from personal observation or experiment, notion, apprehension, the impression on the mind not derived from memory, one of the kinds of knowledge; सर्वव्यवहारहेतुर्ज्ञानं बुद्धिः। सा द्विविधा स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञानमनुभवः which again is यथार्थ right & अयथार्थ wrong. See T. S. 34. (The Naiyāyikas recognize प्रत्यक्ष, अनुमान, उपमान and शाब्द as the four sources of knowledge; the Vedāntins and Mīmāṁsakas

add two more अर्थापत्ति and अनुपलब्धि; the Vaiśesikas and Bauddhas admit the first two only, the Sāṅkhyas exclude उपमान, while the Chārvākas admit प्रत्यक्ष only. Other sections of philosophical schools add three more to the six sources of knowledge recognised by the Mīmāṁsakas; -संभव 'equivalence'; ऐतिह्य 'fallible testimony', and चेष्टा 'gesture'.) -2 Experience; अनुभवं वचसा सखि लुम्पसि N. 4.105. -3 Understanding. -4 Result, consequence. -Comp. -सिद्ध *a.* established by experience.

अनुभावः 1 Dignity, consequnce or dignity of person, majestic lustre, splendour, might, power, authority. (परिमेयपुरःसरौ) अनुभावविशेषात्तु सेनापरिवृताविव R. 1. 37; संभावनीयानुभावा अस्याकृतिः S. 7; अनुभावसौभाग्यमात्रपरिशेष-धूसरश्रीः U. 1, 3; 6. 20, 41, 4. 22, K. 108, 240; V. 1; तवानुभावोऽयमवेदि यन्मया Ki. 1. 6; Dk. 29, 113; दिव्यौषध्या जयति महिमा कोऽप्यचिन्त्यानुभावः। Mv. 6. 53; अहो महानुभावः पार्थिवो दुष्यन्तः S. 3 of great might or power; जाने वो रक्षसाक्रान्तावनुभावपराक्रमौ R. 10. 38, 2. 75 greatness (dignity) &c., valour; न निहन्ति धैर्यमनुभावगुणः Ki. 6. 28; महानुभावप्रकृतिः कापि तत एवागतवती Māl. 1 very noble or dignified. -2 (In Rhet.) An external manifestation or indication of a feeling (भाव) by appropriate symptoms, such as by look, gesture &c., called by some *ensuant* (भावबोधक-न); भावं मनोगतं साक्षात् स्वगतं व्यञ्जयन्ति ये। तेऽनुभावा इति ख्याताः; यथा भ्रूभङ्गः कोपस्य व्यञ्जकः; उद्बुद्धं कारणं स्वैः स्वैर्बहिर्भावं प्रकाशयन्। लोके यः कार्यरूपः सोऽ-नुभावः काव्यनाट्ययोः॥ S. D. 162, 163. &c.; धिगेव रमणीयतां त्वदनुभावभावादृते Māl. 9. 35. -3 Firm opinion or resolution, determination, belief; अनुभावांश्च जानासि ब्राह्मणानां न संशयः Mb. 3. 24. 8. अनुभाववता गुरुस्थिरत्वान् Ki. 13. 15. cf. अनुभावः प्रभावे च सतां च मतिनिश्चये Ak. also Nm.

अनुभावक *a.* Causing to understand, making one apprehend, indicative; -ता understanding, knowledge; यत्पदेन विना यस्यानुभावकता भवेत् Bhāṣā. P. 84.

अनुभावनम् Indication of feelings by signs, gestures &c.

अनुभावित *a.* 1 Experienced; एकभक्त्यानुभाविते Bhāg. 3. 24. 43. -2 greatly empowered; महामाख्याहानुभाविताः Bhāg. 11. 16. 5. -3 protected; वयं च सर्वे भवतानुभाविता; Bhāg. 10. 63. 37.

अनुभाविन् *a.* 1 Perceiving, knowing, showing signs of feeling. -2 An eye-witness; अनुभावी तु यः कश्चित्कुर्या-त्साक्ष्यं विवादिनाम् Ms. 8. 69. -3 Being or coming after.

अनुभू *a.* [भू-क्विप्] Perceiving, understanding. -भूः *f.* Experience, direct knowledge or perception; अयमात्मा सर्वानुभूः Bri. Up. 2. 5. 19.

अनुभूतिः *f.* 1 Perception, apprehension, experience. -2 (In Nyāya) Knowledge derived from four sources: namely direct perception, inference, comparison, and verbal knowledge; see Bhāṣā. P. 51, 52. -3 Dignity, consequence. -Comp. -प्रकाशः N. of the metrical gloss or paraphrase of the principal Upaniṣads by Mādhavāchārya. -स्वरूपाचार्यः N. of the author of the grammar Sārasvata-prakriyā.

अनुभृ 1. 3. P. 1 To praise conformably; to throw or commit into. -2 To insert, enter; आ अनुभृतमनर्वा Rv. 10. 61. 5.

अनुभर्तृ *m.* 1 Praising conformably, imitating. -2 Supporting, strengthening. -3 Penetrating, एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी Rv. 1. 88. 6.

अनुभ्रातृ *m.* A younger brother (अनुगतो भ्रातरम्).

अनुमद् 1 P. Ved. To rejoice over, gladden.

अनुमत्त *p. p.* Intoxicated with joy.

अनुमाद्य *pot. p.* To be praised in succession, to be granted with praise.

अनुमन् 4 A. 1 To agree or consent to, comply with, approve, sanction, grant; to permit, allow; किं महार्हशयनोपेते न वासमनुमन्यसे Rām. 5. 24. 2. तत्र नाहमनुमन्तुमुत्सहे मोघवृत्ति कलभस्य चेष्टितम् R. 11. 39; राजन्यान् स्वपुरनिवृत्तयेऽनुमेने R. 4. 87; कैलासनाथोद्वहनाय पुष्पकमन्वमंस्त 14. 20; शुश्रूषमाणां गिरिशोनुमेने Ku. 1. 59, 5. 68; कृताभिमर्षामनुमन्यमानः सुताम् S. 5. 20; इमां स्वसारं च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम् R. 16. 85 be pleased not to reject or refuse; अविनयमनुमन्तुं नोत्सहे दुर्जनानाम् Bh. 3. 22. -2 To follow, have recourse to; धर्मार्थावभिसन्त्यज्य संरंभं योनुमन्यते Mb. -*Caus.* 1 To ask for leave or permission; ask the consent of; अनुमान्यतां महाराजः V. 2 ask for leave to go; take counsel with; भूयोऽपि सखीजनमनुमानयिष्यामि S. 3. -2 To ask for, request or beg; अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च (विकिरेत्) Y. 1. 241. -3 To honour. -4 To put to account.

अनुमत *p. p.* 1 Approved, assented to, agreed to, permitted, allowed, granted &c. द्वारे नियुक्तपुरुषानुमतप्रवेशः M. 1. 12. भ्रूक्षेपमात्रानुमतप्रवेशाम् Ku. 3. 60. कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकम् Ve. 3. 24; °गमना S. 4. 10 allowed to depart; अनुमतो गृहाय R. 5. 10; उभय°तः साक्षी Y. 2. 72 admitted by both parties &c. -2 Liked, beloved, pleasant, loved, agreeable, desired by, dear to; वृष्टिं च कर्षकजनानुमतां करोति Bri. S. 5. 72. -3 Being of one opinion, agreeing or concurring with. -तः A lover; घनमतो नमतोनुमतान् प्रियाः Si. 6. 65. -तम् Consent, approval, permission; प्रथमं कस्यानुमते चोरितमेतत्त्वया हृदयम् V. 3. 17.

अनुमतिः *f.* 1 Permission, consent, approval, assent. -2 The 15th day of the moon's age on which she rises one digit less than full, when the gods and manes receive oblations with favour; personified as a goddess or worshipped in the Rājasūya sacrifice (कलाहीन-चन्द्रवती शुक्रचतुर्दशीयुतपूर्णिमातिथिः); अनुमत्यै हविरष्टाकपालं पुरोडाशं निर्वपति Sat. Br.; Ms. 3. 86-87. -Comp. -पत्रम् a deed expressing assent.

अनुमननम् 1 Assent; sufferance. -2 Independence.

अनुमन्तृ *a.* Consenting to, permitting, allowing, suffering (opp. to active agent); उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः Bg. 13. 22; Ms. 5. 51 adviser.

अनुमन्त्र् 10 A. To consecrate or accompany with sacred hymns or magical formulas; to dismiss with sacred and auspicious words, dismiss with a blessing; विसृष्टश्च वामदेवानुमन्त्रितोऽश्वः U. 2. (v. l. for अभिमन्त्रित); रथमारोप्य कृष्णेन यत्र कर्णोऽनुमन्त्रितः Mb.

अनुमन्त्रः A favourable speech; रहोनुमन्त्रैरपकृष्टचेतनः Bhāg. 4. 27. 3.

अनुमन्त्रणम् Consecration by hymns and prayers.

अनुमन्त्रित *a.* Consecrated.

अनुमरणम् See under अनुमृ.

अनुमरुः A country next to a desert.

अनुमा 3 A., 2 P. 1 To infer, (as from some signs, premises &c.); अलिङ्गां प्रकृतिं त्वाहुर्लिङ्गैरनुमिमीमहे Mb.; conclude, guess, conjecture; धूमादग्निमनुमाय T. S. 41; पर्याकुलत्वान्मरुतां वेगभङ्गोऽनुमीयते Ku. 2. 25; अन्वमीयत शुद्धेति शान्तेन वपुषैव सा R. 15. 77, 17. 11; तेजोविशेषानुमितां दधानः 2. 7, 68; 5. 12; इह मदस्नपितैरनुमीयते सुरगणस्य गतं हरिचन्दनैः Ki. 5. 47. –2 To reconcile, equal. *–Caus.* (–मापयति) To lead one to infer or guess, bespeak, indicate; आकृतिरेवानुमापयत्यमानुषताम् K. 132, 202.

अनुमा [मा–अङ्] Inference, conclusion from given premises; see अनुमिति.

अनुमातृ *a.* One who infers; न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः.

अनुमात्रा Determination, resolution; तत्रेयमनुमात्रा मे भीमसेन विवक्षिता। नैकान्तसिद्धिर्वक्तव्या शत्रुभिः सह संयुगे॥ Mb. 5. 77. 13.

अनुमानम् 1 Inferring as the instrument of an अनुमिति, conclusion; from given premises; an inference, conclusion, one of the four means of obtaining knowledge accroding to the Nyāya system; (अनुमितिकरणमनुमानं तच्च धूमो वह्निव्याप्य इति व्याप्तिज्ञानम्. It is of two kinds स्वार्थानुमानम् & परार्थानुमानम्); प्रत्यक्षं चानुमानं च शास्त्रं च विविधागमम्। त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥ Ms. 12. 105. –2 A guess, conjecture, sign to know; इङ्गितैरनुमानैश्च मया ज्ञेया भविष्यति Rām. –3 Analogy, similarity; आत्मनो हृदयानुमानेन प्रेक्षसे Ś. 5 you judge (of others) by the analogy of your own heart; स्वानुमानात्कादम्बरीमुत्प्रेक्ष्य K. 305. –4 (In Rhet.) A figure which consists in a notion, expressed in a peculiarly striking manner, of a thing established by proof; S. D. 711; यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः। तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये॥ अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः K. P. 10. **–Comp.** –उक्तिः *f.* reasoning; logical inference.

अनुमापक *a.* (–पिका *f.*) Causing an inference as an effect, being the ground of an inference.

अनुमितिः *f.* Inference from given premises; the knowledge obtained by means of अनुमान; लिङ्गपरामर्शजन्यं ज्ञानमनुमितिः the knowledge that arises from deduction or syllogistic reasoning.

अनुमित्सा Desire of inferring.

अनुमेय *pot. p.* Inferable, to be inferred; फलानुमेयाः प्रारम्भाः R. 1. 20.

अनुमार्गम् *adv.* Along the way, according to a (particular) way, on or in the way; अनुमार्गागतया K. 100 come by this way.

अनुमाषम् *adv.* Like a kidney bean or in a kidney bean.

अनुमासः [अनुगतो मासः] The following month. **–सम्** *ind.* Every month, month after month.

अनुमुद् 1 A. (P. in epic poetry) 1 To rejoice with, join in rejoicing or sympathizing with; मुदितामनुमोदते Bhāg. –2 To express approval; तदेव राममातृभिरनुमोदितम् U. 2; approve, second, applaud; निषेद्धुमासीदनुमोदितुं वा R. 14. 43; to allow with pleasure, permit; अनुमोदितमाचार्यैः K. 77; अननुमोदिता मात्रा 160. *–Caus.* To gladden, delight, favour, permit.

अनुमोदः 1 The feeling of pleasure arising from sympathy, subsequent pleasure. –2 = अनुमोदनम् see below.

अनुमोदनम् 1 Approval, assent, seconding, acceptance, compliance. –2 Causing pleasure.

अनुमृ 6A. To follow in death; रुदता कुत एव सा पुनर्भवता नानुमृतापि लभ्यते R. 8. 85 followed in death by you; गतिविभ्रमसादनीरवा न शुचा नानुमृतेव लक्ष्यते 58 (used actively).

अनुमरणम् Following in death; तन्मरणे चानुमरणं करिष्यामीति मे निश्चयः H. 3; post-cremation of a widow (अनुमरणं हि भर्तुर्देशान्तरादिमरणे देहायलाभ एव); देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम्। निधायोरसि संशुद्धा प्रविशेज्जातवेदसम्॥ This is allowed to Kṣatriya, Vaiśya and other women, but not to Brāhmaṇa women; पृथक् चितां समारुह्य न विप्रा गन्तुमर्हति. Bāṇa severely condemns this practice; see K. 173-4.

अनुयवम् *adv.* In the grains of barley.

अनुया 2 P. 1 To follow, go after (fig. also); अनुयाहि साधुपदवीम् Bh. 2. 77; अनुयास्यन्मुनितनयाम् Ś. 1. 28; त्वामनुयामि यद्यपि Ku. 4. 21. –2 To imitate, equal; न किलानुययुस्तस्य राजानो रक्षितुर्यशः R. 1. 27; 9. 6; अनुयातलीलः 16. 71; गुणैर्नृपाः शार्ङ्गिणमन्वयासिषुः Śi. 12. 3 followed and imitated. –3 To attend, accompany; इयं मुसलमनुयाति कलेन हुङ्कृतेन Mu. 1. 4; अनुयातारुन्धतीको वसिष्ठः U. 3. 48.

अनुया *a.* Following; अनुया राञ्या रात्रीं जिन्व Vāj. 15. 6. **–याः** Ved. Food.

अनुयातृ *m.* A follower, companion.

अनुयात्रम्–त्रा Retinue, train; attendance upon; following; त्यक्तभोगस्य मे राजन् वने वन्येन जीवतः। किं कार्यमनुयात्रेण Rām. सखिभिश्चित्रकथैः कृतानुयात्रः। Bu. Ch. 5. 2. **–त्रम्** *adv.* In or after a procession.

अनुयात्रिकः [अनुयात्रा अनुगमनमस्त्यस्य ठन्] A follower, attendant; यावदनुयात्रिकान्समेत्य निवेशयेयम् Ś. 1, 2.

अनुयानम् Following.

अनुयायिन् *a.* [P. III. 2. 78] 1 Following; attending, consequent. तत् त्रिकालहितं वाक्यं धर्म्यमर्थानुयायि च Rām. 5. 51. 21. वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् R. 2. 19. –2 Like, similar. –3 Following a principal person as a teacher (मुख्यस्य अनुगन्ता शिष्यः) –*m.* A follower (lit. & fig.); रामानुजानुयायिनः followers of the doctrines of R.; a dependent or attendant; न्यषेधि शेषोऽप्यनुयायिवर्गः R. 2. 4.

अनुयाजः [यज्–घञ्, कुत्वाभावः P. VII. 3. 62] A part of a sacrficial ceremony (यज्ञाङ्गम्); secondary or supplementary sacrificial rite; usually written अनूयाज q. v. –Comp. –प्रसवः permission to perform an Anuyāja. –प्रैषाः the formulae belonging to the Anuyāja.

अनुयुज् 7 A. 1 To ask, question; किं वस्तु विद्वन्गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त R. 5. 18; अन्वयुङ्क्त गुरुमीश्वरः क्षितेः 11. 62; स्वजनस्य वार्तमयमन्वयुङ्क्त च Śi. 13. 68. –2 To examine (as an accused), put on trial; प्राड्विवाकोऽनुयुञ्जीत विधिनानेन सान्त्वयन् Ms. 8. 79, 259. –3 To impart or give, as instruction. –4 To order, enjoin. –5 To select as husband. –6 To request, beg; धार्तराष्ट्रं सहामात्यं स्वयं समनुयुङ्क्ष्महे Mb. 5. 72. 3.

अनुयुक्त *p. p.* 1 Asked, questioned, examined, ordered &c. –2 Censured, reproached. –3 Learning from a hired teacher (भृतकाध्येता), See अनुयोक्तृ.

अनुयुक्तिन् *q.* [अस्त्यर्थे इनि] One who has ordered, examined; cf. गृहीतिन्, अधीतिन्.

अनुयुगम् *ind.* According to the Yuga; फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् Ms. 1. 84.

अनुयुञ्जक *a.* Jealous यथैषां वक्तुमिच्छन्ति नैर्गुण्यमनुयुञ्जकाः Mb. 12. 299. 23.

अनुयोक्तृ *m.* An examiner, interrogator; inquirer; a teacher, especially hired or mercenary (भृतकाध्यापक). अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत Mb. 13. 23. 17.

अनुयोगः 1 A question, inquiry, examination; याऽस्मि साऽस्म्यनुयोगो मे न कर्तव्यः कथञ्चन Mb. 13. 93. 82. अनियन्त्रणानुयोगस्तपस्विजनः Ś. 1; निग्रहानुयोगे P. VIII. 2. 94; वार्तामधुराक्षरया च वाचा R. 13. 71. –2 Censure, reproof, punishment; नानुयोगा ब्राह्मणानां भवन्ति Mb. 3. 192. 56. –3 Solicitation. –4 Exertion, effort; अनुयोगं विना तैलं तिलानां नोपजायते Pt. 2. 140. –5 Religious meditation; spiritual union. –6 Comment. –Comp. –कृत् 1 an interrogator. –2 a teacher, spiritual preceptor (अनुयोगं कृन्तति प्रश्नविषयसंशयं छिनत्ति).

अनुयोगिन् *a.* 1 What combines or unites; connected with, situated in or on. –2 Examining, questioning.

अनुयोज्य *pot. p.* Fit to be questioned, asked; asked with a reproof. ममेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि Ms. 8. 31. –ज्यः A servant; obedient and humble servant; उभाभ्यामपि वासवानुयोज्यो दुष्यन्तः प्रणमति Ś. 7.

अनुयोजनम् A question, inquiry.

अनुरञ्ज् 4 U. 1 To be red; भृशमन्वरज्यदतुषारकरः Śi. 9. 7. (became red or attached). –2 To be delighted, find pleasure; तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च Bg. 11. 36. –3 To be attached or devoted to, be fond of, love, like (with acc. or loc.); समस्थमनुरज्यन्ति विषमस्थं त्यजन्ति च Rām.; अशुद्धप्रकृतौ राज्ञि जनता नानुरज्यते Pt. 1. 301; भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः Ms. 3. 173. –*Caus.* 1 To make red, redden, dye, colour; सरसकिसलयानुरञ्जितैर्वा Śi. 7. 64, 8. 17, 12. 68; Dk. 168; Ki. 4. 27, 12. 23. –2 To attach oneself to, please, gratify, conciliate, keep contented or satisfied; अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यन्वरञ्जयत् Rām.; कष्टं जनः कुलधनैरनुरञ्जनीयः U. 1. 14; शिष्यगुणानुरञ्जितमनसम् Pt. 1 pleased, gratified.

अनुरक्त *p. p.* 1 Reddened, dyed, coloured; सन्ध्यानुरक्ते जलदे दीप्ता विद्युदिवोज्ज्वला Rām. 6. 111. 88. कुण्डलमणिप्रभानुरक्तगण्डस्थलः K. 170. –2 Pleased, contented; loved, beloved; loyal, loyally devoted; अनुरक्तः शुचिर्दक्षः Ms. 7. 64; गुणानुरक्तामनुरक्तसाधनः Ki. 1. 31 having all means favourable to him; –3 Glowing; तापानुरक्तमधुना कमलं ध्रुवमीहते जेतुम्। Nāg. 3. 10. °प्रजः–लोकः beloved by people; attached or devoted to, fond of (with loc. or acc.); अपि वृषलमनुरक्ताः प्रकृतयः –अथ किम्–चन्द्रगुप्ते दृढमनुरक्ताः प्रकृतयः Mu. 1; कथं वसन्तसेना आर्यचारुदत्तमनुरक्ता Mk. 1; एषा भवन्तमनुरक्ता Ś. 6. 19; अलभ्यमनुरक्तवान् कथय किंनु नारीजनम् Mu. 6.

अनुरक्तिः *f.* Love, attachment, devotion, affection. Pt. 2.

अनुरञ्जक *a.* Gratifying, pleasing.

अनुरञ्जनम् Conciliating, satisfying, gratifying, pleasing, keeping contented; युक्तः प्रजानामनुरञ्जने स्याः U. 1. 11.

अनुरञ्जित *p.p.* Pleased, conciliated, kept contented &c.

अनुराग *a.* Become red, reddened. –गः 1 Redness. –2 Devotion, attachment, contentment, loyalty (opp. अपरागः); love, affection, passion (with loc. or in comp.); आविर्भूतानुरागाः Mu. 4. 21; कण्ठकितेन प्रथयति मय्यनुरागं कपोलेन Ś. 3. 14; R. 3. 10; बहलानुरागकुरुविन्ददलप्रतिबद्धमध्यमिव दिग्वलयम् Śi. 9. 8. °इङ्गितम् a gesture or external sign expressive of love; प्रसादस्तु शब्दः स्यादनुरागजः Ak.

अनुरागिन्, अनुरागवत् *a.* 1 Attached, enamoured, impassioned, inspired with love; स वृद्धस्तस्यामतीवानुरागवान् H. 1; सा केनापि वणिक्पुत्रेण सहानुरागवती बभूव *ibid.* –2 Causing or inspiring love. –णी Personification of a musical note.

अनुरणनम् 1 Sounding conformably to; a continuous tinkling echo produced by the sounds of bells, anklets &c. –2 The power of words called व्यञ्जनं q. v.; the meaning suggested by what is actually stated; क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यः S. D. 4.

अनुरतिः *f.* Love, attachment.

अनुरथम् *ind.* Behind the carriage: P. II. 1. 6.

अनुरथ्या [रथ्यामन्वायतं स्थिता] A foot-path, a by-road, the margin of a street, (a path along the margin of a road); प्रकाशीकरणार्थं च निशागमनशङ्कया। दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः Rām. 2. 6. 18; Mb. 3. 15. 20.

अनुरसित *a.* Sounding, echoing; उद्ग्रीवैरनुरसितस्य पुष्करस्य M. 1. 21 accompanied in sound.

अनुरसः, –रसितम् Echo, reverberation; °गुरु magnified by echo; अनुरसितगुरूणि स्त्यानमम्बूकृतानि U. 2. 21; (this same vesre occurs in). Māl. 9. 6; Mv. 5. 41.

अनुरसः [अनुगतो रसम्] 1 A secondary feeling (in Rhet.). –2 A secondary flavour; लवण° saltish taste; मधुरानुरसं रूक्षं लवणानुरसं लघु। नार्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् Suśr.

अनुरहस *a.* [अनुगतम् रहः] Secret, solitary, private. **–सम्** *adv.* In secret, apart, privately; अनुरहसमनायि नायकेन Śi. 7. 50.

अनुरात्र *a.* Following the night. **–त्रम्** *adv.* In the night; every night, night after night.

अनुराद्ध *a.* Accomplished, obtained.

अनुराध *a.* 1 Causing welfare; also written as अनूराध; इन्द्रं वयमनूराधं हवामहे Av. –2 Born under the asterism अनुराधा P. IV. 3. 34. **–धः** N. of a Buddhist. **–धा** [अनुगता राधां विशाखाम्] N. of the 17th of the 27 lunar mansions or asterisms (so called because it follows राधा or विशाखा). It consists of four stars. **–Comp. –ग्रामः, –पुरम्** the ancient capital of Lankā or Ceylon; founded by अनुराध. Also called अनुरोधपुर, described by Rājaśekhara as full of curiosities. It is a large town in the north of Ceylon "with 1600 square granite pillars which supported the floor of an enormous monastery called 'The Great Brazen Palace' said to have been built in 161 B. C."

अनुरुद् 2. P. To weep along with, condole with, sympathize; गुरुशोकामनुरोदितीव माम् Ku. 4. 15; अनुरोदितीव करुणेन पत्रिणाम् Śi. 4. 47.

अनुरोदनम् Condolence, sympathy.

अनुरुध् 7 U. 1 To obstruct, block up; शिलाभिर्मार्गमनुरुन्धन्ति Mb.; to surround, hem in; रुद्रानुचरैर्मखो महान्.. अन्वरुध्यत Bhāg. –2 To bind, fasten. –3 To stick or adhere to, follow closely, observe, practise; अनुरुध्यादघं त्र्यहम् Ms. 5. 63 should observe impurity (be in mourning); पुमांसमनुरुध्य जाता पुमनुजा P. III. 2. 100 Sk. born immediately after a male. –4 To love, be fond of, or devoted to, attach oneself to. समस्थमनुरुध्यन्ते विषमस्थं त्यजन्ति च Rām.; सद्वृत्तिमनुरुध्यन्तां भवन्तः Mv. 2 follow or adopt; स्वधर्ममनुरुन्धन्ते नातिक्रमम् Ki. 11. 78; नानुरोत्स्ये जगल्लक्ष्मीम् Bk. 16. 23 love, like. –5 To conform to, obey, follow, adapt oneself to, act up to; नियतिं लोक इवानुरुध्यते Ki. 2. 12: हन्त तिर्यञ्चोऽपि परिचयमनुरुध्यन्ते U. 3 remember or cherish (act up to it); मद्वचनमनुरुध्यते वा भवान् K. 181, 298; वात्सल्यमनुरुध्यन्ते महात्मनः Mv. 6 feel the force of compassion; तेनापि रावणे मैत्रीमनुरुध्य व्यपेक्ष्यते Mv. 5. 34 following up; यदि गुरूननुरुध्यसे Mv. 3 regard with respect, obey; अनुरुध्यस्व भगवतो वसिष्ठस्यादेशम् U. 4; चन्द्रकेतोर्वचनम् U. 5. –6 To coax, gratify, flatter, soothe; इत्यादिभिः प्रियशतैरनुरुध्य मुग्धाम् U. 3. 26; अभिनवसेवकजनोऽपि एवमनुरुध्यते K. 207 please by carefully attending to &c., show regard for; 248. –7 To urge, press, entreat, request; आगमनाय अनुरुध्यमानः K. 277; तया चाहमनुरुध्यमानस्तां बकुलमालां दत्तवान् Māl. 1; सा च भीमधन्वना बलवदनुरुद्धा Dk. 122 courted, wooed. –8 To assent or agree to, approve; like, comply with; प्रकृतयो न मे व्यसनमनुरुध्यन्ते Dk. 106; यदि भगवाननुरुध्यते Mv. 4 agree with me.

अनुरुद्ध *a.* 1 Checked. –2 Opposed. –3 Pacified, soothed.

अनुरुध् *a.* [रुध्-क्विप्] 1 One who obeys, conforms to &c. –2 Obeyed, observed, wanted (अपेक्षित), written as अनूरुध्; आक्षित् पूर्वास्वपरा अनूरुत् Rv. 3. 55. 5.

अनुरोधः–धनम् 1 Compliance, gratification, fulfilling one's wishes &c. –2 Conformity, accordance, obedience, regard, consideration; धर्मानुरोधात् K. 160, 180, 192; अत्र नानुरोधं तर्कये Mv. 7 pleasure or gratification; आधारानुरोधात् Mu. 1. 2 out of regard for; कविश्रिमानुरोधाद्वा Ve. 1 in consideration of; दत्तोत्सेकः प्रलपति मया याज्ञवल्क्यानुरोधात् Mv. 3. 28, 5. तदनुरोधात्-धेन accordingly, in accordance with it; वेदेद्विपश्चिन्महतोनुरोधात् Pt. 1. 100 after great consideration; humouring; प्राप्तार्थग्रहणं द्रव्यपरीवर्तोनुरोधनम् H. 2. 101; reference (of a rule.) –3 Pressing, urging, coaxing; entreaty, solicitation, request; क इवात्रानुरोधः K. 209; तदनुरोधात् 135; विनानुरोधात्स्वहितेच्छयैव Ś. 20. 81. –4 Bearing of a rule.

अनुरोधिन्,–धक *a.* Compliant, complying with, obeying or conforming to, having regard to, caring for; पतिव्रतानां समयानुरोधिनी Rām.

अनुरुह् P. To ascend, mount; पञ्च पदानि रुपो अन्वरोहम् Rv. 10. 13. 3.

अनुरूप *a.* [रूपस्य सदृशः योग्यो वा] 1 Like, resembling, corresponding to; शब्दानुरूपेण पराक्रमेण भवितव्यम् Pt. 1; worthy of; आत्मानुरूपं वरम् Ś. 1; रूपानुरूप K. 192, 203. –2 Suitable or fit, adapted to, according to, with gen. or in comp.; नैतदनुरूपं भवतः K. 146, 158; भव पितुरनुरूपस्त्वं गुणैर्लोककान्तैः V. 5. 21; काममननुरूपमस्या वपुषो वल्कलम् Ś. 1; स्वप्रमाणानुरूपैः सेचनघटैः *ibid.*; सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत Bg. 17. 3; R. 1. 33; Me. 13 **–पम्** 1 Resemblance, likeness, conformity. –2 Suitability, fitness; अपि जनकसुतायास्तच्च तच्चानुरूपम् U. 6. 26. **–पः** The antistrophe, having the same metre as the स्तोत्रिय or strophe; the second of the three verses (तृच) recited together, the other two being स्तोत्रिय and पर्यासः एकस्तोत्रियेष्वहस्सु योऽन्योऽनन्तरः सोऽनुरूपः Āśval.

अनुरूपतः, -पेण, -पशः *adv.* Conformably or agreeably to.

अनुलग्न *a.* Attached to, intent on, seeking or pursuing after; येन आर्यायाः सुस्निग्धा दृष्टिरनुलग्ना Mk. 4 intently fixed.

अनुलापः Repetition, tautology.

अनुलालित *a.* Entertained कुशिकसुतवचोनुलालिताभ्यां सुखमिव सा विबाभौ विभावरी Rām. 1. 23. 24.

अनुलासः, -स्यः [लस्-नर्तने-घञ्] A peacock; hence metaphorically 'a corner' as in वास्तुच्छिद्रानुलासः Kau. A. 2. 4.

अनुलिप् 6 P. To anoint, besmear (with perfumes &c. after bathing); smear, daub, cover over; वपुरन्वलिप्त न वधू: Śi. 9. 51, 9. 15; प्रभानुलिप्तश्रीवत्सम् R. 10. 10 covered with; तच्छायानुलिप्तभूतलाम् K. 131; हरिभिरचिरभासा तेजसा चानुलिप्तैः Ś. 7. 7; so स्नातानुलिप्तः; तिमिरानुलिप्त enveloped in darkness; स्नापितोऽनुलेपितश्च Dk. 71 besmeared with perfumes &c.

अनुलेपः, -लेपनम् 1 Unction, anointing, smearing. -2 Ointment, unguent such as sandal juice, oil &c.; any emollient or oily application; °आर्द्रमृदङ्गध्वनि K. 28 rubbed with paste; सुरभिकुसुमधूपानुलेपनानि K. 324.

अनुलेपक, -लेपिन् *a.* One who anoints (the body) with unguents &c.

अनुलीन *a.* Hidden, clinging to, attached; स्कन्धं सुगन्धिमनुलीनवता नगस्य Śi. 5. 46; जनादनुलीनः Dk. 104 concealed from the people.

अनुलोम *a.* [अनुगतः लोम P. V. 4. 75.] 1 'With the hair', regular, in natural order, successive (opp. प्रतिलोम); hence favourable, agreeable; °सुखो वायुरनुसारयतीव माम् Rām.; त्रिरेनामनुलोमामनुमार्ष्टि Śat. Br.; °कृष्टं क्षेत्रं प्रतिलोमं कर्षति Sk. ploughed in the regular direction. -2 Mixed as a tribe. **-मा** A woman of the lower caste than that of the man's whom she marries; सकामास्वनुलोमासु न दोषस्त्वन्यथा दमः Y. 2. 288. **-मम्** *adv.* In regular or natural order; प्रतिलोममालिम्पेन्नानुलोमम् Suśr. **-माः** (pl.) Mixed castes. **-Comp. -अय** *a.* having fortune favourable. **-अर्थ** *a.* speaking in favour of; जडानप्यनुलोमार्थान् प्रवाचः कृतिनां गिरः Śi. 2. 25. **-कल्पः** the thirty-fourth of the Atharvaveda Pariśiṣṭas. **-ग** *a.* straight going; प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः Mb. 3. 190. 92. **-ज, -जन्मन्** *a.* born in due gradation, offspring of a mother inferior in caste to the father; said of the mixed tribes; संकीर्णयोनयो ये तु प्रतिलोमानुलोमजाः Ms. 10. 25; Y. 1. 95. **-परिणीत** *a.* married in regular gradation.

अनुलोमनम् 1 Regular gradation, sending or putting in the right direction. -2 (In medicine) Carrying off by the regular channels, such as purging; alleviation.

अनुलोमयति Den. P. 1 To stroke or rub with the hair or with the grain, go with the grain; तत्र प्रतिलोमं मनुलोमयेत् Suśr. -2 To evacuate, purge, carry off by the regular channels.

अनुल्बण *a.* 1 Not excessive, neither more nor less (अनतिरिक्त, अन्यूनाधिक); smoothed, free from disturbing circumstances (?). -2 Not clear or manifest.

अनुवंशः [वंशमनुगतो वृत्तान्तः] 1 A genealogical table; तत्रानुवंशो रुद्रस्य तं निबोध युधिष्ठिर Mb. 3. 114. 10. यत्रानुवंशं भगवान् जामदग्न्यस्तथा जगौ Mb. -2 Modern race or species; new family. **-शम्** *ind.* अत्रानुवंशं पठतः शृणु मे कुरुनन्दन Mb. 3. 129. 8.

अनुवंश्य *a.* [अनुवंशे भवः यत्] Relating to a genealogical table.

अनुवक्र *a.* [अनुक्रमेण वक्रः] Very crooked; somewhat crooked or oblique; °ग moving somewhat obliquely or retrogressively (said of planets).

अनुवच् 2 P. 1 To say or speak after or for one; येषां द्विजानां सावित्री नानूच्येत यथाविधि Ms. 11. 191. -2 To repeat, recite, reiterate; शतमनूच्यमायुष्कामस्य Ait. Br.; learn, study; परोवरं यज्ञोऽनूच्यते Śat. Br.; वेदमनूच्याचार्योन्तेवासिनमनुशास्ति Tait. Up. 1. 10. अरण्येऽनूच्यमानत्वादारण्यकम् Sāy., see अनूचान below. -3 To concede the point, assent to, yield. -4 To name, call. *-Caus.* To cause to recite; to read to oneself (before reading aloud); oft. used in dramas; उभे नाम मुद्राक्षराण्यनुवाच्य परस्परमवलोकयतः Ś. 1; अनुवाचय तावत् यदविरुद्धं श्रोष्यामि V. 2; Mu. 1; अनुवाचितलेखममात्यमवलोक्य M. 1.

अनुवक्तृ *m.* Repeating, reciting (गुरुमुखोच्चारितानुरूपपाठक); replying &c.

अनुवचनम् 1 Repetition, recitation; teaching, instruction, lecture, वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः। श्रद्धोपवासः स्वातन्त्र्यमात्मनो ज्ञानहेतवः ॥ Y. 3. 190. तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति Bri. Up. 4. 4. 22. -2 A chapter, section, lesson, division. -3 Repetition of Mantras or texts in conformity with प्रैष or injunction said by other priests.

अनुवाकः [अनूच्यते इति, वच् घञ् कुत्वम् P. II. 4. 29 Vārt.] 1 Repeating, reciting reading. अनुवाकहताबुद्धिः Mb. 5. 132. 6. -2 A subdivision of the Vedas, section, chapter; जेतुं जैत्रानथ खलु जपन्सूक्तसामानुवाकान् Mv. 3. 23. -3 Chapter or section referring to a compilation from the Ṛigveda or Yajurveda (ऋग्यजुःसमूह). -4 A statement in the ब्राह्मणs illustrating the mantras; यं वाकेष्वनुवाकेषु निषत्सूपनिषत्सु च Mb. 12. 47. 26. **-Comp. -अनुक्रमणी** N. of a table of contents, referring to the Ṛigveda, attributed to Śaunaka. **-सङ्ख्या** the fourth of the eighteen Pariśiṣṭas of the Yajurveda.

अनुवाक्या [वच्-ण्यत्-कुत्वम्] A verse recited by the Hotṛi priest, in which the god is invoked to accept the offering prepared for him, or a sort of priest;

वाक्यलक्षणविदोऽनुवाक्यया Si. 14. 20 (प्रशास्तृपाठ्या तदभावे होतृपाठ्या देवताह्वानी ऋक् Malli.).

अनुवाच् *f.* [वच्-णिच्-क्विप्] Repetition, recitation &c. See अनुवचनम्. *-m.* A lecture.

अनुवाचनम् 1 Recitation of passages of the Rigveda by the Hotri priest in obedience to the injunction (प्रैष) of the अध्वर्यु priest. -2 Causing to recite, teaching, instructing. -3 Reading to oneself; see above.

अनूक्त *p. p.* Repeated, recited after; occurring in the text studied. यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतम् Bri. Up. 1. 4. 15. **-क्तम्, -क्तिः** *f.* 1 Subsequent mention; repetition by way of explanation or illustration. -2 Study of the Vedas.

अनूचान *a.* or **-नः** [अनुवच्-कानच् निपातः P. III. 2. 109; वेदस्य अनुवचनं कृतवान् अनूचानः Sk.] 1 One devoted to study, learned; especially one wellversed in the Vedas with their Angas so as to be able to repeat, read and teach them; योऽनूचानः स नो महान् Mb. 9. 51. 50; Ms. 2. 154; 5. 82; Y. 3. 24; इदमूचुरनूचानाः Ku. 6. 15. दृप्तबालाकिर्हानूचानो गार्ग्य आस Bri. Up. 2. 1. 1. -2 Modest, unassuming; humble, well-behaved.

अनुवत्सरः [अनुकूलो वत्सरो दानादिविशेषाय] 1 A year. -2 The 4th year in the 5 years' cycle; or the 5th of 5 cycles of 12 years in the Brihaspati cycle. वायुमेव तदनुवत्सरमाप्नोति T. Br. 1. 4. 10.

अनुवद् 1 P. 1 To imitate in speaking, mock (with acc.); गिरं नः...अनुवदति शुकस्ते मञ्जुवाक् पञ्जरस्थः R. 5. 74 repeat; उक्तमनुवदति Sk.; (P. & A.) to resound, echo; अनुवदति वीणा P. I. 3. 49 Sk. अनुवदते कठः कलापस्य *ibid.*; सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव Si. 2. 67 echoed and approved also; घोषस्यान्ववदिष्टेव लङ्का पूतक्रतोः पुरः Bk. 8. 29.-2 To repeat or say again by way of explanation, illustration or corroboration; see Kull. on Ms. 1. 74; 2. 6. -3 To repeat, tell, say (generally); निजमनोरथमनुवदन्त्या Dk. 21. -4 To abuse, rail at. *-Caus.* To cause to resound or echo.

अनुवादः 1 Repetition (in general); गुण° K. 206. -2 Repetition by way of explanation, illustration or corroboration; अनुवादे चरणानाम् P. II. 4. 3 (सिद्धस्योपन्यासे Sk.) -3 Explanatory repetition or reference to what is already mentioned, such as paraphrase or free translation; particularly, any portion of the Brāhmaṇas which comments on, illustrates, or explains a *Vidhi* or direction previously laid down and which does not itself lay down any directions; a supplementary repetition, opp. to विधि 'authoritative or direct injunction'; विधिविहितस्य अनुवचनमनुवादः। नानुवादपुनरुक्तयोः विशेषः शब्दाभ्यासोपपत्तेः Nyāya sūtra; cf. also विध्यनुवादयोर्विधिर्ज्यायान्, अपूर्वार्थप्रकल्पत्वादिति SB. on MS. 10. 6. 3. It is of 3 kinds:- भूतार्थ° (सदेव सौम्येदमग्र आसीत्); स्तुत्यर्थ° (वायुर्वै क्षेपिष्ठा देवता) and गुण° (अग्निहोत्रं जुहोति इत्युक्ते दध्ना जुहोति इति गुणविधानात्); see अर्थवाद also. -4 Corroboration, confirmation. -5 Slander, abuse, reviling. -6 Advertisement, notice; report, rumour. -7 Commencement of speech (वाचारम्भणमात्रम्).

अनुवादक, -वादिन् *a.* 1 Explanatory, corroborative, repeating with comment, explanation or illustration; आरम्भश्च साहसानुवादी Dk. 95 bespeaks. -2 Conformable to, in harmony with, like; युक्तगीतानुवादिना Ram.; तदनुवादिगुणः कुसुमोद्गमः R. 9. 33. **-न्** *m.* N. of any one of the three notes of the gamut.

अनुवाद्य *pot. p.* 1 To be explained or illustrated. -2 (In gram.) To be made the subject of an assertion (in a sentence), opposed to विधेय which affirms or denies something about the subject. In a sentence the अनुवाद्य or subject which is supposed to be already known is repeated to mark its connection with the विधेय or predicate and should be placed first; अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्; in वृद्धिरादैच्, P. I. 1. 1 आदैच् should have been placed first, though the construction is defended by Patañjali.

अनुवर्तन, -वर्तिन् &c. see अनुवृत्.

अनुवर्त्मन् *m.* A follower.

अनुवश *a.* [वशमनुगतः] Subject to the will of another, obedient. **-शः** Subjection, obedience (to the will of another). भरतानुवशात्सोऽपि शत्रुघ्नस्तत्समं गतः Ram. 2. 8. 29.

अनुवस् To clothe, cover; सोमस्त्वा राजा अमृतेनानु वस्ताम् Rv. 6. 75. 18.

अनुवस् 1 P. To dwell near to or along with (with acc.).

अनुवासिन् *a.* One who dwells near; resident.

अनुवसित *a.* [वस्-क्त] 1 Dressed, clothed, wrapped up. -2 Fastened, or bound to, attached to.

अनुवहः One of the 7 tongues of fire.

अनुवातः [अनुगतो वातः] The windward direction; the wind which blows from the pupil to the preceptor &c.; प्रतिवातेऽनुवाते च नासीत गुरुणा सह Ms. 2. 203.

अनुवारम् *ind.* Time after time, repeatedly, frequently.

अनुवास् 10 P. 1 To scent, perfume. -2 To use the oily enema (see the next word); treat by using such enema; अवश्यं स्थापनीयाश्च नानुवास्याः कथञ्चन Suśr.

अनुवासः, -सनम् 1 Perfuming or scenting (in general) with incense &c. -2 Perfuming clothes by dipping the ends. -3 (°नः also) A syringe, clyster-pipe (Mar. पिचकारी); an oily enema or the operation itself; असाध्यता विकाराणां स्यादेषामनुवासनात् Suśr.; द्विधा बस्तिः परिज्ञेयो निरूहश्चानुवासनम्। कषायाद्यैर्निरूहः स्यात् स्नेहाद्यैरनुवासनम्॥ (अनुवसति अनुवासरं वा दीयते अनुवसन्नपि न दुष्यति अनुदिवसं वा दीयते इति अनुवासनः)

अनुवासित *a.* 1 Fumigated, perfumed. -2 Administered as an enama; treated by this operation.

अनुविद् 6 U. 1 To find, discover, see, obtain. -2 To deem, consider. -3 To marry.

अनुवित्त *a.* Found, obtained: यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्सन्देह्ये गहने प्रविष्टः Bri. Up. 4. 4. 13. अयं पन्था अनुवित्तः पुराणः Ait. Br.

अनुवित्तिः *f.* Finding, obtaining.

अनुविध *a.* One who imitates, a devotee दृतय इव श्वसन्त्यसुभृतां यदि तेऽनुविधा Bhāg. 10. 87. 17.

अनुविद्ध See under अनुव्यध्.

अनुविधा 3 U. 1 To lay down a rule, regulate. -2 To obey, act up to, follow, conform to; See अनुविधायिन्; पदमनुविधेयं च महताम् Bh. 2. 28 the foot-steps of the great have to be trodden in. -3 To resemble, imitate. -*pass.* To be trained to follow rules; obey.

अनुविधानम् 1 Obedience. -2 Acting in conformity to (orders &c.).

अनुविधायिन् *a.* 1 Obedient, submissive, compliant, conforming to orders; सा स्त्री याऽनुविधायिनी H. 2. 130; भविनव्यानुविधायीनीन्द्रियाणि V. 3. -2 Resembling; निजवधूश्वसितानुविधायिनि Śi. 6. 23, 15. 96.

अनुविहित *a.* Obedient; तस्यानुविहितोऽनाथा Bhāg. 1.9.17.

अनुविनश् 4 P. To disappear, vanish or perish after or along with another. विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय, तान्येवानुविनश्यति Bri. Ā. 2. 4 12.

अनुविनाशः Perishing after.

अनुविश् 6 P. To enter or go after, follow.

अनुवेशः, -शनम् 1 Following, entering after. -2 Marriage of a younger brother before the elder is married; (ज्येष्ठातिक्रमेण कनिष्ठस्य विवाहः); यवीयसोऽनुवेशो हि ज्येष्ठस्य विधिलोपकः Mb.

अनुवेश्य *a.* [अनुक्रमेण वेशमर्हति, यत्] A next-door neighbour.

अनुविश्वः (pl.) N. of a people in the north-east. Bri. S.

अनुविषयः Taste; अपश्यन्तोऽनुविषयं भुञ्जते विघसाशिनः Mb. 12. 287. 40.

अनुविष्टम्भः Being obstructed in consequence of.

अनुवृत् 1 A. (sometimes P. also) 1 (Transitively uesd) (*a*) To go or roll after, follow, pursue; (fig.) to follow, conform to, act according to, obey, adapt oneself to, be guided by; humour; अहं तावत्स्वामिनिश्चित्तवृत्तिमनुवर्तिष्ये Ś. 2; तेऽपि परिचयमनुवर्तन्ते K. 289; किमत्र चित्रं यदि विशाखे शशाङ्कलेखामनुवर्तेते Ś. 3 approve of her choice; लौकिकानां हि साधूनामर्थं वागनुवर्तते U. 1. 10 words conform to the sense; न कुलक्रममनुवर्तते K. 104 follow; मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः Ku. 3. 36 followed his mate in drinking, drank after her; (जननीम्) अत्यन्तशुद्धहृदयामनुवर्तमानाम् Bh. 2. 110; मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः Bg. 3. 23; Dk. 80, 96, 126; कृतज्ञतामनुवर्तमानेन Mu. 3 following the path of gratitude; प्रभुचित्तमेव हि जनोऽनुवर्तते Śi. 15. 41; Māl. 3. 2. (*b*) To imitate, resemble; equal; तेऽन्ववर्तन् पितॄन्सर्वे यशसा च बलेन च Mb. (*c*) To gratify, humour, please; Dk. 65. (*d*) To serve, worship; पञ्चवर्षसहस्राणि सूर्यं चैवान्ववर्तत Rām. 7. 10. 8. -2 (Intransitively used) (*a*) To follow, come after; संग्राह्य इत्यनुवर्तते H. 3. (*b*) To continue, endure. (*c*) To act towards, behave. (*d*) (In gram.) To be repeated or supplied from a preceding rule, Sūtra or assertion (said of a word or rule which continues to exercise influence on what follows); *e. g.* in भक्तिः P. IV. 3. 95; सोऽस्य (occurring in Sūtra 89 before) इत्यनुवर्तते Sk. -*Caus.* 1 To cause to revolve, turn round; एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः Bg. 3. 16. -2 To act up to, follow, obey; तथापि लोकयात्रानुवर्तनीया Mv. 7; पुत्रैः पितरो लोकद्वयेप्यनुवर्तनीयाः Ve. 3; K. 367. -3 To favour, oblige; comply with one's request; विधिनापि भवतेव वयमनुवर्तिताः K. 73; यथाचित्तमनुवर्तनीयः Māl. 7. -4 To put in, carry out. -5 To repeat or supply from a preceding Sūtra; केचित्तु विजायते इति नानुवर्तयन्ति P. V. 2. 13. Sk. -6 To use, employ. -7 To lead one to, attach to. -8 To speak in favour of, speak for; to approve. -9 To imitate, do after one; सतां चरितान्यनुवर्तितानि नेन्द्रियाणि K. 298.

अनुवर्तनम् 1 Following (fig. also); attending, compliance, obedience, conformity; प्रकृतस्यानुवर्तने Ak.; इदमाश्चर्यमथवा लोकस्थित्यनुवर्तनम् Mv. 7. 4; दाक्षिण्य° Dk. 161. -2 Gratifying, obliging. -3 Approval of, concurrence in. -4 Continuance; result, consequence. -5 Supplying from a preceding Sūtra.

अनुवर्तिन् *a.* 1 Following, obeying, conforming to, with acc. or in comp.; कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनाम्। शराणामग्रतः स्थातुं शक्तो देवासुरेष्वपि ॥ Rām. 5. 51. 19. राक्षसाश्चापि गृह्यन्ते नित्यं छन्दानुवर्तिभिः Pt. 1. 69; नराधिपा नीचजनानुवर्तिनः 1. 383. -2 Guided by, following the advice of; obedient, faithful, compliant; अनुवर्तिनि कलत्रे Pt. 1. 101, भृत्यानामनुवर्तिनाम् 298. -3 Like, resembling, worthy.

अनुवर्त्मन् *a.* [अनुगतो वर्त्म] Following, attending.

अनुवृत्त *p. p.* 1 Obeying, following &c. स मेरुमनुवृत्तः स पुनर्गच्छति पाण्डव Mb. 3. 163. 31. -2 Uninterrupted, continuously kept up, continued; अनुवृत्तस्त्वया भगीरथगृहे प्रसादः U. 7. -3 Rounded off; taperingly round (क्रमशः वर्तुलाकार); सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् Rām. 6. 90. 65. दीर्घानुवृत्तपीनबाहुना K. 179. -4 Supplied from a preceding rule &c. -5 Conforming to the character (शीलानुगत). **-त्तम्** Obedience, conformity, compliance; मूर्खं छन्दोऽनुवृत्तेन (गृह्णीयात्) Chāṇ. 33.

अनुवृत्तिः *f.* 1 Assenting to, approval; तवानुवृत्तिं न च कर्तुमुत्सहे Ku. 5. 65. -2 Obedience, conformity, following, continuance in (opp. व्यावृत्ति); taking up; continuity; ज्येष्ठानुवृत्तिजटिलम् R. 13. 78 by following the example of;

अनुवृत्त्या प्रमार्ष्टुमागतः Dk. 100 service; cf. also वाचानुवृत्तिः खलु अतिथिसत्कारः Pratima 5. ततान वहिः पवनानुवृत्त्या Ki. 16. 52 in consequence of. –3 Acting according or suitably to, compliance, acquiescence; gratifying, pleasing; कान्ता°-चातुर्यमपि शिक्षितं वत्सेन U. 3; Māl. 9; Śi. 9. 58; K. 265; M. 2. 9; राज्यं हि नाम राजधर्म°परस्य नृपतेर्महदप्रीतिस्थानम् Mu. 3 who conforms to or is true to the duties of kings; (previous) compliant or obedient spirit, previous course of conduct; U. 7. 5. –4 Remembrance आसेदुषां गोत्रभिदोऽनुवृत्त्या Ki. 18. 18. –5 (Gram.) Being supplied or repeated in a following rule; continued influence of a preceding on a following rule. –6 Imitating, resembling &c. –7 Repetition; वर्णानामनुवृत्तिरनुप्रासः.

अनुवृद्धि *a.* Ved. Increasing in regular ratio.

अनुवेलम् *ind.* Ever and anon, constantly; इति स्म पृच्छत्यनुवेलमादृतः R. 3. 5; Śi. 3. 79.

अनुवेल्लित *a.* [वेल्ल्-क्तम्] Bent in conformity with; bent under. **–तम्** Securing with bandages, bandaging, a sort of bandage (व्रणलेपनबन्धभेदः) one of the 14 kinds mentioned by Suśruta.

अनुव्य *a.* [अनुव्ययति अनुगच्छति व्ये-क] Following (अनुगत); °व्यमिवासुः Kāty. (न्यग्भूमिं प्राप्ता इव).

अनुव्यञ्जनम् A secondary token.

अनुव्यध् 4 P. 1 To hit or pierce again; विद्धमनुविध्यतः Ms. 9. 43. –2 To wound, pierce; कामशरानुविद्धः &c. –3 To fill or mix with, blend with, see अनुविद्ध below. –4 To impel, urge.

अनुविद्ध *p. p.* 1 Pierced, bored; कीटानुविद्धरत्नादि-साधारण्येन काव्यता S. D. –2 Overspread, intertwined; surrounded, full of; pervaded by, replete or filled with, abounding in, mixed or blended with, intermixed; सरसिजमनुविद्धं शैवलेनापि रम्यम् Ś. 1. 20; क्वचित्प्रभालेपिभिरिन्द्र-नीलैर्मुक्तामयी यष्टिरिवानुविद्धा R. 13. 54 interwoven with emeralds; 16. 48, 6. 18; अलके बालकुन्दानुविद्धम् Me. 67; सौरभ्य° Mk. 1; कोपानुविद्धां चिन्तां नाटयन् Mu. 3; Ku. 3. 35; पाण्डुतानुविद्धेव देहच्छविः Dk. 112; 137; Māl. 1. –3 Connected with, relating to; adhering to; देशवार्तानुविद्धा संकथा Dk. 117, 124; उद्गूर्णलोष्टलगुडैः परितोऽनुविद्धम् Śi. 5. 25 chased, closely followed or pursued. –4 Set, inlaid; variegated; रत्नानुविद्धार्णवमेखलाया दिशः सपत्नी भव दक्षिणस्याः R. 6. 63, 14; Śi. 4. 49.

अनुवेधः, –व्याधः 1 Hurting, piercing, perforating; न हि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः S. D. 1. –2 Contact, union; मुखामोदं मदिरया कृतानुव्याधमुद्वमन् Śi. 2. 20. –3 Blending, mixture; fusion. –4 Obstructing.

अनुव्यवसायः (In Nyāya) Consciousness of the perception; (in Vedānta Phil.) perception of a sentiment or judgment.

अनुव्याख्यानम् [अनुरूपं व्याख्यानम्] That which comments on and explains Mantras, Sūtras &c. (मन्त्रविवरणम्); especially, that portion of a Brāhmaṇa which explains difficult Sūtras, texts &c. occurring in another place (मन्त्रादीनामनुरूपार्थप्रकाशकं व्याख्यानम्).

अनुव्याहरणम्, –व्याहारः 1 Repetition, repeated utterance; mentioning, along with something else. –2 A curse, imprecation.

अनुव्याहारिन् *a.* Cursing; execrating.

अनुव्रज् 1 P. 1 To follow, go after; तां व्रजन्तीमनुवव्राज K. 132, 210; attend especially a departing guest (as far as the bank of water, lake, &c.) as a mark of respect; अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेत् Y. 1. 113; तं मातरो देवमनुव्रजन्त्यः Ku. 7. 38; यमिच्छेत्पुनरायान्तं नैनं दूरमनुव्रजेत् Rām. 2. 40. 50. –2 To visit in order, seek. –3 To go to or near; betake oneself to; मृगा मृगैः सङ्गमनुव्रजन्ति Pt. 1. 282. deer herd or associate with deer. –4 To obey, to do homage to.

अनुव्रजनम्, –व्रज्या Following, going after, especially a departing guest; आसनावसथौ शय्यामनुव्रज्यामुपासनाम् Ms. 3. 107.

अनुव्राज्य *pot. p.* To be followed as by the relatives of a dead person to the cemetery.

अनुव्रत *a.* [अनुकूलं व्रतं कर्म यस्य] 1 Devoted or faithful to, राजानो राजपुत्राश्च धृतराष्ट्रमनुव्रताः Mb. 3. 35. 30. attached to (with acc. or gen.); अभ्यगच्छददीनात्मा दमयन्तीमनुव्रतः Mb. 3. 54. 27. प्रियतमा का अनुव्रता Bh. 2. 103; वैश्याः क्षत्रमनुव्रताः Rām. –2 Duly performing the vows or duties prescribed (opp. अपव्रत) Bhāg. 8. 15. 35. **–तः** A class of Jaina ascetics. **–ता** A devoted virtuous wife (पतिव्रता); रक्ते भटे रणमुखे रुधिरेण तस्मिन् रक्ता भवत्यमरयोषिदनुव्रतेन; विश्वगुणादर्शचम्पू 379.

अनुशतिक *a.* Accompanied with, or bought for, a hundred; तथाविधोऽनुशतिकः शतानीकस्य साधकः। जानाति युद्धसंभारं कार्ययोग्यं च सैनिकम् Śukra. 2. 43. °आदिः a class of words or गण mentioned in P. VII. 3. 20, where both members undergo Vriddhi. अनुशतिकादीनां च.

अनुशय, –शयिन् &c. See under अनुशी.

अनुशारः [अनु-शृणाति. शॄ-अच्] A sort of evil-spirit, Rakṣasa.

अनुशस्त्रम् [अनुगतं शस्त्रं शस्त्रार्थे प्रयुक्तम्] Anything used (for the time being) instead of a regular instrument, such as a finger-nail; a secondary weapon or instrument.

अनुशाला An ante-chamber, a special kind of hall; अनुशाला च मध्ये च चैकभागेन भद्रकम् Māna. 26. 19.

अनुशास् 2 P. 1 (*a*) To advise, persuade, prevail upon, address; इति ध्रुवेच्छामनुशासती सुतां शशाक मेना न नियन्तुमुद्यमात् Ku. 5. 5; पूर्वानुशिष्टां निजगाद भोज्याम् R. 6. 59. (*b*) To direct, tell, order, enjoin, to teach, instruct (how to act); दशरथप्रभवानुशिष्टः R. 13. 75; वत्से त्वमधुनाऽनुशासनी-

सि S. 4; राजपत्नीनियोगस्थमनुशाधि पुरीजनम् Bk. 20. 17; को नु खलु मामेवमनुशास्ति V. 4 tells, directs; मघवा वनगमनाय कृतबुद्धिं भवन्तमनुशास्ति V. 5 tells, directs; माणवकं धर्ममनुशास्ति Sk.; Ms. 6. 86. –2 To rule, govern. –3 To chastise, punish, correct; इयमेव तावत्प्रथममनुशासनीया Ve. 2; अरिकुलं मनुशासनीयम् 3; स्वकर्म ख्यापयन्ब्रूयान्मां भवाननुशास्त्विति Ms. 11. 99, 9. 233. –4 To praise, extol. –5 To accomplish, perform, execute.

अनुशासक,–शासिन्,–शास्तृ or **शासितृ** *a.* One who directs, instructs, governs or punishes; कविं पुराणमनुशासितारम् Bg. 8.9 ruler; एष चोरानुशासी राजेति भयाद्युत्पतितः V. 4.

अनुशासनम् Advice, persuasion, direction, order. command; instruction, laying down rules or precepts; a law, rule, precept; treatment (of a subject), (with the object in comp. or with gen., the agent, if expressed, being put in the instr. or gen.); एतद्वै भद्रमनुशासनस्य Rv. 10. 32. 7. एतदनुशासनम् Tait. Up. 7. 9. 7. भवत्यधिक्षेप इवानुशासनम् Ki. 1. 28 words of advice; तन्मनोरनुशासनम् Ms. 8. 139; 6. 50; 2. 159; यौवन° K. 146; नामलिङ्ग° laying down rules on the gender of nouns, explanation of gender &c.; शब्दानुशासनम् Sk.; शब्दानामनुशासनमाचार्यस्य आचार्येण वा P. II. 3. 66 Sk. —**Comp.** –**पर** *a.* obedient. –**पर्वन्** N. of the 13th book of the Mahābhārata (so called because it lays down precepts of advice).

अनुशास्तिः *f.* Advice.

अनुशिष्ट *a.* 1 educated; स प्रैति क्षेत्रविदानुशिष्टः Rv. 10. 32. 7. Bhāg. 5. 9. 4; तस्मात् पुत्रमनुशिष्टं लोक्यमाहुः Br. Up. 1. 5. 17. –2 questioned इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् Rām. 6. 30. 4. –3 Directed; एष धर्मानुशिष्टो वो यतीनां नियतात्मनाम् Ms. 7. 86, 9. 233.

अनुशिष्टिः *f.* Instruction, teaching; order, command.

अनुशिक्षिन् *a.* Practising, learning.

अनुशिशुः *f.* [अनुगता शिशुना] An animal followed by its young one.

अनुशी 2 A. 1 To lie or sleep with, sleep along with; lie upon, close or along; lay oneself down; to adhere to or follow closely, cling or stick to; शयानं चानुशेते हि तिष्ठन्तमनुतिष्ठति। अनुधावति धावन्तं कर्म पूर्वकृतं नरम्॥ Subhāṣita. –2 To repent, grieve for; दत्तमिष्टमपि नान्वशेत सः Śi. 14. 45; पुरानुशेते तव चञ्चलं मनः Ki. 8. 8.

अनुशयः [शी-अच्] 1 Repentance, remorse; regret, sorrow; नन्वनुशयस्थानमेतत् Māl. 8; कुतस्तेऽनुशयः M. 3 why should you be sorry; बाष्पं प्रमृज्य विगतानुशयो भवेयम् Ś. 7. 25; इतो गतस्यानुशयो मा भूदिति V. 4; ततः सपत्नापनयस्मरणानुशयस्फुरा Śi. 2. 14. –2 Intense enmity or anger; शिशुपालोऽनुशयं परं गतः Śi. 16. 2; यस्मिन्नमुक्तानुशया सदैव जागर्ति भुजङ्गी Māl. 6. 1. –3 Hatred. –4 Close connection, as with a consequence; close attachment (to any object). अयं त्वन्यो गुणः श्रेष्ठश्च्युतानां स्वर्गतो मुने। शुभानुशययोगेन मनुष्येषूपजायते॥ Mb. 3. 261. 33. –5 (In Vedānta Phil.) The result or consequence of bad deeds which very closely clings to them and makes the soul enter other bodies after enjoying temporary freedom from recurring births; (स्वर्गार्थकर्मणो भुक्तफलस्य अवशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत्, यथा हि स्नेहभाण्डं विरिच्यमानं सर्वात्मना न विरिच्यते भाण्डानुसार्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपि Tv.). –6 Regret in the case of purchases, technically called rescission; क्रीत्वा विक्रीय वा किंचिद्यस्येहानुशयो भवेत् Ms. 8. 222; see क्रीतानुशय. cf. ......अनुशयो द्वेषे पश्चात्तापानुबन्धयोः and...... अनुशयो दीर्घद्वेषानुतापयोः Nm. –यी A disease of the feet, a sort of boil or abscess on the upper part.

अनुशयान *a.* Regretting &c. –**ना** A variety of heroine (परकीयनायिकाभेदः); one who is sad and dejected, being apprehensive of the loss of her lover (इष्टहानिजनितानुतापवती).

अनुशयिन् *a.* 1 Devotedly attached to, faithful. –2 Repentant, penitent, regretful, sorry. –3 Hating intensely. –4 Connected as with a consequence. –5 Enjoying the fruits of deeds; epithet of the soul.

अनुशायिन् *a.* Lying or extending along. *m.* Life; यश्चानुशायिनां स्वर्गः पाखण्डस्य च संभवः Bhāg. 2. 8. 22. See अनुशयिन्.

अनुशीतम् *ind.* In cold.

अनुशीलनम् Intent or assiduous application, constant pursuit or exercise, constant or repeated practice or study; विज्ञातसाराण्यनुशीलनेन Ki. 16.28.

inner part of the jaws (खादनस्थानं जम्भः, दन्तपङ्क्त्यो-रन्तरालम्). –जात *a.* inborn, innate –जानु *ind.* between the knees. –जानुशयः One sleeping with hands between the knees; अन्तर्जानुशयो यस्तु भुङ्क्ते सक्तभाजनः Mb. 3. 200. 75. –ज्ञानम् inward or secret knowledge. –ज्योतिस् *a.* enlightened inwardly, with an enlightened soul. योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः Bg. 5. 24. (–स् *n.*) the inward light, light of Brahman. –ज्वलनम् inflammation. (–नः) inward heat or fire; mental anxiety. –ताप *a.* burning inwardly (–पः) internal fever or heat Ś. 3. 13. –दधनम् [अन्तर्दध्यते आधीयते मादकतानेन] distillation of spirituous liquor, or a substance used to produce fermentation. –दशा a term in astrology, the time when a particular planet exercises its influence over man's destiny (ज्योतिषोक्तः महादशान्तर्गतो ग्रहाणां स्वाधिपत्यकालभेदः). –दशाहम् an interval of 10 days; °हात् before 10 days. Ms. 8. 222; °हे 5. 79. –दहनम्, –दाहः 1 inward heat; ज्वलयति तनूमन्तर्दाहः U. 3. 31; °हेन दहनः सन्तापयति राघवम् Rām. –2 inflammation. –दुःख *a.* sad or afflicted at heart. –दुष्ट *a.* internally bad, wicked or base at heart. –दृष्टिः *f.* examining one's own soul, insight into oneself. –देशः an intermediate region of the compass. –द्वारम् private or secret door within the house (प्रकोष्ठद्वारम्).–धा-धि,-हित &c. See s. v. –नगरम् the palace of a king (being inside the town); cf. °पुरम्; दशाननान्तर्नगरं ददर्श Rām.–निवेशनम् inner part of the house; यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने Rām. 6. 128. 6. –निहित *a.* being concealed within; अङ्गैरन्तर्निहितवचनैः सूचितः सम्यगर्थः M. 2. 8. –निष्ठ *a.* engaged in internal meditation. –पटः, –टम् a screen of cloth held between two persons who are to be united (as a bride and bridegroom, or pupil and preceptor) until the acctual time of union arrives. –पथ *a.* Ved. being on the way. –पदम् *ind.* in the interior of an inflected word. –पदवी = सुषुम्णामध्यगतः पन्थाः –परिधानम् the innermost garment. –पर्शव्य *a.* being between the ribs (as flesh). –पवित्रः the Soma when in the straining vessel. –पशुः [अन्तर्ग्राममध्ये पशवो यत्र] the time when the cattle are in the village or stables (from sunset to sunrise); अन्तःपशौ पशुकामस्य सायं प्रातः Kāty; (सायं पशुषु ग्राममध्ये आगतेषु प्रातश्च ग्रामादनिःसृतेषु com.). –पातः, पात्यः 1 insertion of a letter (in Gram.) –2 a post fixed in the middle of the sacrificial ground (used in ritual works); अन्तःपूर्वेण यूपं परीत्यान्तःपात्यदेशे स्थापयति Kāty. –पातित, –पातिन् *a.* 1 inserted. –2 included or comprised in; falling within; दण्डकारण्य° ति आश्रमपदम् K. 20. –पात्रम् Ved. interior of a vessel. –पालः one who watches over the inner apartments of a palace. –पुरम् [अन्तः अभ्यन्तरं पुरं गृहम्, or पुरस्यान्तःस्थितम्] 1 inner apartment of a palace (set apart for women); female or women's apartments, seraglio, harem (so called from their being situated *in the heart of the town,* for purposes of safety); व्यायम्याप्लुत्य मध्याह्ने भोक्तुमन्तःपुरं विशेत्. Ms. 7. 216, 221, 224; कन्यान्तःपुरे कश्चित्प्रविशति Pt. 1. –2 inmates of the female apartments, a queen or queens, the ladies taken collectively; अन्तःपुराणि सर्वाणि रुदमानानि सत्वरम् Rām. 6. 111. 111. °विरहपर्युत्सुकस्य राजर्षेः Ś. 3; K. 58; ततो राजा सान्तःपुरः स्वगृहमानीयाभ्यर्चितः Pt. 1; कस्यचिद्राज्ञोऽन्तःपुरं जलक्रीडां कुरुते *ibid.* °प्रचारः gossip of the harem Ms. 7. 153; °समागतः Ś. 4; also in pl.; कदाचिदस्मत्प्रार्थनामन्तःपुरेभ्यः कथयेत् Ś. 2.; न ददाति वाचमुचितामन्तःपुरेभ्यो यदा Ś. 6. 5. °जन women of the palace; inmates of the female apartments; °चर, –अध्यक्षः–रक्षकः, –वर्ती guardian or superintendent of the harem, chamberlain; वृद्धः कुलोद्गतः शक्तः पितृपैतामहः शुचिः। राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते॥ (of these five sorts are mentioned:- वामनक, जघन्य, कुब्ज, मण्डलक and सामिन् see Bri. S.) °सहायः one belonging to the harem.–पुरिकः [अन्तःपुरे नियुक्तः, ठक्] a chamberlain = °चर. (–कः,–का) a woman in the harem; अस्मत्प्रार्थनामन्तःपुरिके(का)भ्यो निवेदय Chaṇḍ. K. –पुष्पम् [कर्म.] the menstrual matter of women, before it regularly begins to flow every month; वर्षद्वादशकादूर्ध्वं यदि पुष्पं बहिर्न हि। अन्तःपुष्पं भवत्येव पनसोदुम्बरादिवत् Kāśyapa; °ष्पम् is therefore the age between 12 and the menstruation period. –पूय *a.* ulcerous. –पेयम् Ved. drinking up. –प्रकृतिः *f.* 1 the internal nature or constitution of man. –2 the ministry or body of ministers of a king. –3 heart or soul. °प्रकोपः internal dissensions or disaffection; अणुरप्युपहन्ति विग्रहः प्रभुमन्तःप्रकृतिप्रकोपजः Ki. 2. 51. –प्रकोपनम् sowing internal dissensions, causing internal revolts; अन्तःप्रकोपनं कार्यमभियोक्तुः स्थिरात्मनः H. 3. 93. –प्रज्ञ *a.* knowing oneself, with an enlightened soul. –प्रतिष्ठानम् residence in the interior. –बाष्प *a.* 1 with suppressed tears; अन्तर्बाष्पश्चिरमनुचरो राजराजस्य दध्यौ Me. 3.–2. with tears gushing up inside, bedimmed with tears; कोपात्°ष्पे स्मरयति मां लोचने तस्याः V. 4. 15. (–ष्पः) suppressed tears, inward tears; निगृह्य °ष्पम् Bh. 3. 6; Māl. 5. –भावः, भावना see under अन्तर्भू separately. –भिन्न *a.* split or broken inside, perforated, bored (said of a pearl) Pt. 4 (also torn by dissensions). –भूमिः *f.* interior of the earth. –भेदः discord, internal dissensions; °जर्जरं राजकुलम् Mk. 4 torn by internal dissensions; अन्तर्भेदाकुलं गेहं न चिराद्विनशिष्यति 'a house divided against itself cannot stand long.' –भौम *a.* subterranean, underground. –मदावस्थ *a.* having the rutting state concealed within; आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः R. 2. 7. –मनस् *a.* 1 sad, disconsolate, dejected, distracted. –2 one who has concentrated and turned his mind inward, lost in abstract meditation. –मुख *a.* (–खी *f.*) 1 going into the mouth, pointing or turned inward; प्रचण्डपरिपिण्डितः स्तिमितवृत्तिरन्तर्मुखः Mv. 5. 26. –2 having an inward entrance or opening (बाह्यवस्तुपरिहारेण परमात्मविषयकतया प्रवेशयुक्तं चित्तादि). –3 an epithet of the soul called प्राज्ञ, when it is enjoying the sweet bliss of sleep (आनन्दभुक् चेतोमुखः प्राज्ञः इति श्रुतेः). –4 Spiritual minded, looking inwardly into the soul; 'अन्तर्मुखाः सततमात्मविदो महान्तः' Viś. Guṇa. 139. (–खम्) a sort of surgical scissors (having an opening inside), one of the 20 instruments mentioned by

Suśruta in chapter 8 of Sūtrasthāna. **–मातृका** [अन्तःस्थाः षट्चक्रस्थाः मातृकाः अकारादिवर्णाः] a name given in the Tantras for the letters of the alphabet assigned to the six lotuses (पद्म) of the body; °न्यासः a term used in Tantra literature for the mental assignment of the several letters of the alphabet to the different parts of the body. **–मुद्र** *a.* sealed inside; N. of a form of devotion. **–मृत** *a.* still-born. **–यागः** mental sacrifice or worship, a mode of worship referred to in the Tantras. **–यामः** 1 suppression of the breath and voice. –2 °पात्रम्, a sacrificial vessel (ग्रहरूपं सामापराख्यं यज्ञियपात्रम्); according to others, a Soma libation made during the suppression of breath and voice; सुहवा सूर्यायान्तर्याममनुमन्त्रयेत् Ait. Br. **–यामिन्** *m.* 1 regulating the soul or internal feelings, soul; Providence, Supreme Spirit as guiding and regulating mankind, Brahman; (according to the Bṛi. Ār. Up. अन्तर्यामिन् 'the internal check' is the Supreme Being and not the individual soul; 'who standing in the earth is other than the earth, whom the earth knows not, whose body the earth is, who internally restrains and governs the earth; the same is *thy* soul (and mine, the internal check अन्तर्यामिन्, &c. &c.); अन्तराविश्य भूतानि यो बिभर्त्यात्मकेतुभिः । अन्तर्यामीश्वरः साक्षाद्भवेत् &c. –2 wind; °ब्राह्मणम् N. of a Brāhmaṇa included in the Bṛi. Ār. Up. **–योगः** deep meditation, abstraction **–लम्ब** *a.* acute-angular. (**–बः**) an acute-angled triangle (opp. बहिर्लम्ब) (the perpendicular from the vertex or लम्ब falling within अन्तर् the triangle). **–लीन** *a.* 1 latent, hidden, concealed inside; °नस्य दुःखाग्नेः U. 3. 9; °भुजङ्गमम् Pt. 1. –2 inherent. **–लोम** *a.* (P. V. 4. 117) covered with hair on the inside. (**–मम्**) [अन्तर्गतमाच्छाद्यं लोम अच्] the hair to be covered. **–वंशः** = °पुरम् q. v. **–वंशिकः, –वासिकः** [अन्तर्वंशे वासे नियुक्तः ठक्] a superintendent of the women's apartments; Pt. 3, K. 93. Ak. 2. 8. 8. **–वण** (वन) *a.* situated in a forest; °णो देशः P. VI. 2. 179 Sk. (**–णम्**) *ind.* within a forest P. VIII. 4. 5. **–वत्** *a.* being in the interior; having something in the interior. **–वती** (वत्नी) Ved. [अन्तरस्त्यस्यां गर्भः] a pregnant woman; अन्तर्वत्नी प्रजावती R. 15. 13. **–वमिः** [अन्तः स्थित एव उद्गारशब्दं कारयति, वम्-इन्] indigestion, flatulence; belching. **–वर्तिन्, –वासिन्** *a.* being or dwelling inside, included or comprised in **–वसुः** N. of a Soma sacrifice (for राज्यकाम and पशुकाम). **–वस्त्रम्, –वासस्** *n.* an under-garment; गृहीत्वा तत्र तस्यान्तर्वस्त्राण्याभरणानि च । चेलखण्डं तमेकं च दत्वान्तर्वाससः कृते ॥ Ks. 4. 52. **–वा** *a.* [अन्तः अन्तरङ्गभावं अन्तःकरणं वा वाति गच्छति स्निग्धत्वेन, वा-विच् Tv.] forming part of oneself such as children, cattle &c. °वत् *a.* (अस्त्यर्थे मतुप् मस्य वः) having progeny, cattle &c; अन्तर्वावत्क्षयं दधे Rv. 1. 40. 7; abounding with precious things inside. *-adv.* inwardly. **–वाणि** *a.* [अन्तःस्थिता शास्त्रवाक्यात्मिका वाणी यस्य] skilled or versed in scriptures, very learned (शास्त्रविद्). **–विगाहः, –हनम्** entering within, penetration. **–विद्वस्** *a.* Ved. (विदुषी *f.*) knowing correctly or exactly (knowing the paths between heaven and earth) Rv. 1. 72. 7. **–वेगः** inward uneasiness or anxiety, inward fever. **–वेदि** *a.* pertaining to the inside of the sacrificial ground. *-adv.* within this ground. (**–दिः –दी** *f.*) [अन्तर्गता वेदिर्यत्र देशे] the tract of land (the Doab) between the rivers Gaṅgā and Yamunā, regarded as a sacred region and the principal seat of Āryan Brāhmaṇas; cf. एते भगवत्यौ भूमिदेवानां मूलमायतनमन्तर्वेदिपूर्वेण कलिन्दकन्यामन्दाकिन्यौ संगच्छेते A. R. 7; it is supposed to have extended from Prayāga to Haradvāra and is also known by the names of शशस्थली and ब्रह्मावर्त. *-m.* (pl.) inhabitants of this land. **–वेश्मन्** *n.* the inner apartments, interior of a house. **–वेश्मिकः** a chamberlain. **–वैशिकः** Officer in charge of the harem. समुद्रसुपकरणमन्तर्वैशिकहस्तादादाय परिचरेयुः Kau. A. 1. 21. **–शरः** internal arrow or disease. **–शरीरम्** internal and spiritual part of man; the interior of the body. **–शल्य** *a.* having in the interior an arrow, pin or any such extraneous matter; rankling inside. **–शिला** N. of a river rising from the Vindhya mountain. **–श्लेषः, –श्लेषणम्** Ved. internal support (scaffolding &c.) एतानि ह वै वेदानामन्तःश्लेषणानि यदेता व्याहृतयः Ait. Br. **–संज्ञ** *a.* inwardly conscious (said of trees &c.); °ज्ञा भवन्त्येते सुखदुःखसमान्विताः Ms. 1. 49. **–सत्त्व** *a.* having inward strength &c. (°त्त्वा) 1 a pregnant woman. –2 the marking nut. **–सन्तापः** internal pain, sorrow, regret. **–सरल** *a.* upright at heart, or having Sarala trees inside; K. 51. **–सलिल** *a.* with water (flowing) underground; नदीमिवान्तःसलिलां सरस्वतीम् R. 3. 9. **–सार** *a.* having inward strength and vigour, full of strong inside; powerful, strong, heavy or ponderous; °रैर्मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम् Pt. 1. 126; °साराणि इन्धनानि Dk. 132; °रं घन तुलयितुं नानिलः शक्ष्यति त्वाम् Me. 20. (**–रः**) internal treasure or store, inner store or contents; वमन्त्युच्चैरन्तःसारम् H. 2. 103 internal matter or essence (and pus). **–सुख** *a.* whose delight is in self, inwardly happy योऽन्तःसुखोऽन्तराराम: Bg. 5. 24 **–सेनम्** *ind.* into the midst of armies. **–स्थ** *a.* (also written अन्तःस्थ) being between or in the midst. (**–स्थः, –स्था**) a term applied to the semivowels, य्, र्, ल्, व् as standing between vowels and consonants and being formed by a slight contact of the vocal organs (ईषत्स्पृष्टं अन्तस्थानाम्); or they are so called because they stand between स्पर्श (क-म) letters and ऊष्मन् (श, ष, स, ह). **–स्था** 1 a deity of the vital organs. –2 N. of one of the Rigveda hymns. °मुद्गरः the malleus of the ear. **–स्वेदः** [अन्तः स्वेदो मदजलस्यन्दनं यस्य] an elephant (in rut). **–हणनम्** striking in the middle. **–हननम्** N. of a country बाहीक P. VIII. 4. 24 Sk. **–हस्तम्** *ind.* in the hand, within reach of the hand. **–हस्तीन** *a.* being in the hand or within reach of the hand. **–हासः** laughing inwardly (in the sleeves), a secret or suppressed laugh; सान्तर्हासं कथितम् Me. 113

with a suppressed laugh, with a gentle smile. -हृदयम् the interior of the heart.

अन्तर a. [अन्तं राति ददाति, रा-क] 1 Being in the inside, interior, inward, internal (opp. बाह्य); योऽन्तरो यमयति Śat. Br.; °र आत्मा Tait. Up.; कश्चनान्तरो धर्मः S. D. अन्तरापणवीथ्यश्च नानापण्योपशोभिताः अनुगच्छन्तु Rām. 7. 64. 3. -2 Near, proximate (आसन्न); कृष्वा युजश्चिदन्तरम् Rv. 1. 10. 9. -3 Related, intimate, dear, closely connected (आत्मीय) (opp. पर); तदेतत्प्रेयः पुत्रात्...... प्रेयोऽन्यस्मात्सर्वस्मादन्तरतरं यदयमात्मा Śat. Br.; अयमत्यन्तरो मम Bharata. -4 Similar (also अन्तरतम) (of sounds and words); स्थानेऽन्तरतमः P. I. 1. 50; हकारस्य घकारोऽन्तरतमः Śabdak.; सर्वस्य पदस्य स्थाने शब्दतोऽर्थतश्चान्तरतमे द्वे शब्दस्वरूपे भवतः P. VIII. 1. 1. Com. -5 (a) Different from, other than (with abl.); योऽप्सु तिष्ठन्नद्भ्योऽन्तरः Bṛi. Ār. Up.; आत्मा स्वभावोऽन्तरोऽन्यो यस्य स आत्मान्तरः अन्यस्वभावः व्यवसायिनोऽन्तरम् P. VI. 2. 166 Sk. ततोऽन्तराणि सत्त्वानि स्वादते स महाबलः Rām. 7. 62. 5. (b) The other; उदधेरन्तरं पारम् Rām. -6 Exterior, outer, situated outside, or to be worn outside (अन्तरं बहिर्योगोपसंव्यानयोः P. I. 1. 36) (In this sense it is declined optionally like सर्व in nom. pl. and abl. and loc. sing.) अन्तरे-रा वा गृहाः बाह्या इत्यर्थः (चण्डालादिगृहाः); अन्तरे-रा वा शाटकाः परिधानीया इत्यर्थः Sk.; so अन्तरायां पुरि, अन्तरायै नगर्यै, नमोऽन्तरस्मै अमेधसाम् Vop. -रम् 1 (a) The interior, inside; ततान्तरं सान्तरवारिशीकरैः Ki. 4. 29, 5. 5; जालान्तरगते भानौ Ms. 8. 132; विमानान्तरलम्बिनीनाम् R. 13. 33; Mk. 8. 5, Ku. 7. 62; अपि वनान्तरं श्रयति V. 4. 24; लीयन्ते मुकुलान्तरेषु Ratn. 1. 26, Ki. 3. 58; अन्तरात् from inside, from out of; प्राकारपरिखान्तरान्निर्ययुः Rām.; अन्तरे in, into; वन°, कानन°, प्रविश्यान्तरे &c. (b) Hence, the interior of any thing, contents; purport, tenor; अत्रान्तरं ब्रह्मविदो विदित्वा Śvet. Up. (c) A hole, an opening; तस्य बाणान्तरेभ्यस्तु बहु सुस्राव शोणितम्.-2 Soul, heart; mind; सततमसुतरं वर्णयन्त्यन्तरम् Ki. 5. 18 the inmost or secret nature (lit. middle space or region); लब्धप्रतिष्ठान्तरैः भृत्यैः Mu. 3. 13 having entered the heart; सदृशं पुरुषान्तरविदो महेन्द्रस्य V. 3. -3 The Supreme Soul. -4 Interval, intermediate time or space, distance; रम्यान्तरः Ś. 4. 11; किंचिदन्तरमगमम् Dk. 6; अल्पकुचान्तरा V. 4. 49; क्रोशान्तरेण पथि स्थिताः H. 4 at the distance of; बृहद् भुजान्तरम् R. 3. 54; अन्तरे oft. translated by between, betwixt; गीतान्तरेषु Ku. 3. 38 in the intervals of singing; मरणजीवितयोरन्तरे वर्ते betwixt life and death; अत्रयोगान्तरेषु Rām.; तन्मुहूर्तकं बाष्पसलिलान्तरेषु प्रेक्षे तावदार्यपुत्रम् U. 3 in the intervals of weeping; बाष्पविश्रामोऽप्यन्तरे कर्तव्य एव U. 4 at intarvals; स्मर्तव्योऽस्मि कथान्तरेषु भवता Mk. 7. 7 in the course of conversation; कालान्तरावर्तिशुभाशुभानि H. 1. v. l. See कालान्तरम्; सरस्वतीदृषद्वत्योर्यदन्तरम् Ms. 2. 17, 22; द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन Bg. 11. 20; न मृणालसूत्रं रचितं स्तनान्तरे Ś. 6. 18 between the breasts; Bg. 5. 27; अस्य खलु ते बाणपथवर्तिनः कृष्णसारस्यान्तरे तपस्विन उपस्थिताः Ś. 1; तदन्तरे सा विरराज धेनुः R. 2. 20; 12. 29. (b) Intervention (व्यवधान) oft. in the sense of ' through '; मेघान्तरालक्ष्यमिवेन्दुबिम्बम् R. 13. 38 through the clouds; वस्त्रं अन्तरं व्यवधायकं यस्य स वस्त्रान्तरः P. VI. 2. 166 Sk.; महानप्यन्तरं यत्र तद्देशान्तरमुच्यते; जालान्तरप्रेषितदृष्टिः R. 7. 9 peeping through a window; विटपान्तरेण अवलोकयामि Ś. 1; क्षणमपि विलम्बमन्तरीकर्तुमक्षमा K. 306 to allow to come between or intervene; कियच्चिरं वा मेघान्तरेण पूर्णिमाचन्द्रस्य दर्शनम् U. 3. -5 Room, place, space in general; मृणालसूत्रान्तरमप्यलभ्यम् Ku. 1. 40; न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरम् Rām.; मूषिकैः कृतेऽन्तरे Y. 1. 147; गुणाः कृतान्तराः K. 4 finding or making room for themselves; न यस्य कस्यचिदन्तरं दातव्यम् K. 266; देहि दर्शनान्तरम् 84. room; पौरुषं श्रय शोकस्य नान्तरं दातुमर्हसि Rām. do not give way to sorrow; तस्यान्तरं मार्गते Mk. 7. 2 waits till it finds room; अन्तरं अन्तरम् Mk. 2 make way, make way. -6 Access, entrance, admission, footing; लेभेऽन्तरं चेतसि नोपदेशः R. 6. 66 found no admission into (was not impressed on) the mind; 17. 75; लब्धान्तरा सावरणेऽपि गेहे 16. 7. -7 Period (of time), term; मासान्तरे देयम् Ak.; सप्तैते मनवः। स्वे स्वेन्तरे सर्वमिदमुत्पाद्यापुश्चराचरम् Ms. 1. 63, see मन्वन्तरम्; इति तौ विरहान्तरक्षमौ R. 8. 56 the term or period of separation; क्षणान्तरे -रात् within the period of a moment. -8 Opportunity, occasion, time; देवी चित्रलेखामवलोकयन्ती तिष्ठति। तस्मिन्नन्तरे भर्तोपस्थितः M. 1. अत्रान्तरे प्रणम्याग्रे समुपविष्टः; Pt. 1 on that occasion, at that time; अस्मिन्नन्तरे Dk. 164; केन पुनरुपायेन मरणनिर्वाणस्यान्तरं संभावयिष्ये Māl. 6; कृतकृत्यता लब्धान्तरा भेत्स्यति Mu. 2. 22 getting an opportunity; 9; यावत्स्वामिन्द्रगुरवे निवेदयितुं अन्तरान्वेषी भवामि Ś. 7. find a fit or opportune time; शक्तेनापि सता जनेन विदुषा कालान्तरप्रेक्षिणा वस्तव्यम् Pt. 3. 12; waiting for a suitable opportunity or time; सारणस्यान्तरं दृष्ट्वा शुको रावणमब्रवीत् Rām. -9 Difference (between two things), (with gen. or in comp.) शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् H. 1. 46; उभयोः पश्यतान्तरम् H. 1. 64, नारीपुरुषतोयानामन्तरं महदन्तरम् 2. 39; तव मम च समुद्रपल्वलयोरिवान्तरम् M. 1; Bg. 13. 34; यदन्तरं सर्षपशैलराजयोर्यदन्तरं वायसवैनतेययोः Rām.; द्रुमसानुमतां किमन्तरम् R. 8. 90; 18. 15; rarely with instr., त्वया समुद्रेण च महदन्तरम् H. 2; स्वामिनि गुणान्तरज्ञे Pt. 1. 101; difference; सैव विशिनष्टि पुनः प्रधानपुरुषान्तरं सूक्ष्मम् Sān. K. -10 (Math.) Differnce, remainder also subtraction, cf. योगोऽन्तरेणोनयुतोऽर्धितस्तौ राशी स्मृतौ संक्रमणाख्यमेतत् ॥ Līlā.-11 (a) Different, another, other, changed, altered (manner, kind, way &c.); (Note:- that in this sense अन्तर always forms the latter part of a compound and its gender remains unaffected i. e. neuter, whatever be the gender of the noun forming the first part; कन्यान्तरम् (अन्या कन्या), राजान्तरम् (अन्यो राजा), गृहान्तरम् (अन्यद् गृहम्); in most cases it may be rendered by the English word 'another'.); इदमवस्थान्तरमारोपिता Ś. 3 changed condition; K. 154; Mu. 5; शुभाशुभफलं सद्यो नृपाद्देवाद्भवान्तरे Pt. 1. 121; जननान्तरसौहृदानि Ś. 5. 2 friendships of another (former) existence; नैवं वारान्तरं विधास्यते H. 3 I shall not do so again; आमोदान् हरिदन्तराणि नेतुम् Bv. 1. 15, so दिगन्तराणि; पक्षान्तरे in the other case; देश°, राज°, क्रिया° &c. (b) Various, different, manifold (used in pl.); लोको नियम्यत इवात्मदशान्तरेषु Ś. 4. 2; मणिभित्तिरन्यावस्थान्तराण्यवर्णयत्

Dk. 118 various or different states; 160; sometimes used pleonastically with अन्यत् &c.; अन्यत्स्थानान्तरं गत्वा Pt. 1.–12 Distance (in space); व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम् Ak.; प्रयातस्य कथंचिद् दूरमन्तरम् Ks. 5. 80. –13 Absence; तासामन्तरमासाद्य राक्षसीनां वराङ्गना Rām.; तस्यान्तरं च विदित्वा *ibid.* –14 Intermediate member, remove, step, gradation (of a generation &c.); एकान्तरम् Ms. 10. 13; द्व्येकान्तरासु जातानाम् 7; एकान्तरमामन्त्रितम् P. VIII. 1. 55; तत्प्रसूरेकान्तरम् Ś. 7. 27 separated by one remove, See एकान्तर also. –15 Peculiarity, peculiar or characteristic possession or property; a (peculiar) sort, variety, or kind; व्रीह्यन्तरेप्यणुः Trik.; मीनो राश्यन्तरे, वेणुर्नृपान्तरे *ibid.*; प्रासङ्गो युगान्तरम् cf. also प्रधानपुरुषान्तरं सूक्ष्मम् Sān. K. 37. &c. –16 Weakness, weak or vulnerable point; a failing, defect, or defective point; प्रहरेदन्तरे रिपुम्, Śabdak. सुजयः खलु तादृगन्तरे Ki. 2. 52; असहद्भिर्मामामित्रैर्नित्यमन्तरदर्शिभिः Rām; परस्यान्तरदर्शिना *ibid.*; कीटकेनेवान्तरं मार्गयमाणेन प्राप्तं मया महदन्तरम् Mk. 9; अथास्य द्वादशे वर्षे ददर्श कलिरन्तरम् Nala. 7. 2.; हनूमतो वेत्ति न राक्षसोऽन्तरं न मारुतिस्तस्य च राक्षसोऽन्तरम् Rām. –17 Surety, guarantee, security; तेन तव विरूपकरणे सुकृतमन्तरे धृतम् Pt. 4 he has pledged his honour that he will not harm you; आत्मानमन्तरेऽर्पितवान् K. 247; अन्तरे च तयोर्यः स्यात् Y. 2. 239; भुवः संज्ञान्तरयोः P. III. 2. 179; धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः Sk. –18 Regard, reference, account; न चैतदिष्टं माता मे यदवोचन्मदन्तरम् Rām. with reference to me; त्वदन्तरेण ऋणमेतत्. –19 Excellence, as in गुणान्तरं व्रजति शिल्पमाधातुः M. 1. 6 (this meaning may be deduced from 11). –20 A garment (परिधान). –21 Purpose, object, (तादर्थ्य) तौ वृषाविव नर्दन्तौ बलिनौ वासितान्तरे Mb. 1. 102. 41; (Malli. on R. 16. 82). –22 Concealment, hiding; पर्वतान्तरितो रविः (this sense properly belongs to अन्तर्-इ q. v.). –23 Representative, substitution. क्षात्रमाचरतो मार्गमपि बन्धोस्त्वदन्तरे Mb. 12. 10. 3. –24 Destitution, being without (विना) which belongs to अन्तरेण. (अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये। छिद्रात्मीयविनाबहिरवसरमध्येन्तरात्मनि च Ak.) [cf. L. *alter*] –25 Space (अवकाश); प्रेक्षतामृषिसङ्घानां बभूव न तदान्तरम् Rām. 7. 14. 19. –26 Separation (वियोग); भार्यापत्योरन्तरम् Mb. 5. 35. 43. –27 A move or skilful play in wrestling; अन्योन्यस्यान्तरप्रेप्सू प्रचक्रातेऽन्तरं प्रति Mb. 9. 57. 11. –28 A moulding of the pedestal and the base; षडंशं चान्तरे कर्णे उत्तरांशं तदूर्ध्वके। Māna. 13. 121; cf. स्थानात्मीयान्यतादर्थ्यरन्ध्रान्तर्धिषु चान्तरम्। परिधानेऽवधौ मध्येऽन्तरात्मनि नपुंसके। Nm. –Comp. –अपत्या a pregnant woman. –चक्रम् a technical term in augury Bṛi. S. chap. 86. –ज्ञ *a.* knowing the interior, prudent, wise, foreseeing; नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते Ki. 11. 24 not knowing the difference. –तम् *a.* spreading havoc. –द *a.* cutting the interior or heart. –दिशा, अन्तरा दिक् intermediate region or quarter of the compass. –दृश् *a.* realizing the Supreme Soul (परमात्मानुसंधायिन्). –पु(पू)रुषः the internal man, soul (the deity that resides in man and witnesses all his deeds); तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः; Ms. 8. 85. –पूजा = अन्तर-पूजा. –प्रभवः [अन्तराभ्यां भिन्नवर्णमातापितृभ्यां प्रभवति] one of a mixed origin or caste. (अम्बष्ठ, क्षत्तृ, करण, इ.); अन्तरप्रभवाणां च धर्मान्नो वक्तुमर्हसि Ms. 1. 2. –प्रश्नः an inner question, one contained in and arising out of what has been previously mentioned. –शायिन्, –स्थ, –स्थायिन्, –स्थित *a.* 1 inward, internal, inherent; °स्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केन चित् Pt. 1. 221. –2 interposed, intervening, separate. –3 seated in the heart, an epithet of जीव.

अन्तरतः *ind.* 1 In the interior; internally, between or betwixt; तृणमन्तरतः कृत्वा तमुवाच निशाचरम् Mb. 3. 281. 17. –2 Within (prep. with gen.).

अन्तरतम *a.* Nearest, internal, most immediate, most intimate or related; like, analogous. –मः A letter of the same class; for ex. See under अन्तर *a.*

अन्तरीयम् [अन्तरे भवम् छ] An under garment; अतिश्लिष्टचीनांशुकान्तरीयम् Dk. 69; संजज्ञे युतकामिवान्तरीयमूर्वोः Ki. 7. 14; 9. 48; नाभौ धृतं च यद्वस्त्रमाच्छादयति जानुनी। अन्तरीयं प्रशस्तं तदच्छिन्नमुभयान्तयोः॥.

अन्तरे Between, amidst, amongst &c.; see अन्तर (1).

अन्तर्थ *a.* Interior, internal; being within, in the middle.

अन्तरयति Den. P. 1 to cause to intervene, divert, put off; सर्वमेवान्यदन्तरयति K. 338; भवतु तावदन्तरयामि U. 6 well, I shall change the topic, divert the course of conversation. –2 To oppose, prevent; नैनमन्धकारराशिरन्तरयति K. 243. –3 To remove (to a distance), push after; भुवो बलैरन्तरयाम्बभूविरे Śi. 12. 29; सर्वानन्तरायानन्तरयन् K. 161; जलान्तराणीव महार्णवौघः शब्दान्तराण्यन्तरयाञ्चकार Śi. 3. 24 drowned.

अन्तरा *ind.* (fr. अन्तर) 1 (Used adverbially) (*a*) In the interior, inside, within, inwardly; भवद्भिरन्तरा प्रोत्साह्य कोपितो वृषलः Mu. 3 inwardly, secretly. (*b*) In the middle, between; त्रिशङ्कुरिवान्तरा तिष्ठ Ś. 2 stay between the two or in the mid-air; मैनमन्तरा प्रतिबध्नीत Ś. 6 do not interrupt him (in the middle); अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति Ms. 10. 71 therein; पशुमण्डूकमार्जारश्वसर्पनकुलाखुभिः। अन्तरा गमने 4. 126; अन्तरा शकलीकृतः R. 15. 20; लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरास्थिता S. D. 629; °रा स्था to oppose, to stand to oppose; तत्र यद्यन्तरा मृत्युर्यदि सेन्द्रा दिवौकसः। स्थास्यन्ति तानपि रणे काकुत्स्थो विहनिष्यति॥ Rām. (*c*) On the way, *en route*, midway; विलम्बेथां च मान्तरा Mv. 7. 28; अन्तरा चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा त्वामिहस्थमुपागताः V. 1; अन्तरा दृष्टा देवी Ś. 6; अन्तरोपलभ्य Dk. 52; K. 267, 304-5; कुमारो ममाप्यन्तिकमुपागच्छन्नन्तरा त्वदीयेनान्तपालेन अवस्कन्द्य गृहीतः M. 1, अन्तरा पतिते पिण्डे सन्देहे वा पुनर्हरेत् Y. 2. 107. (*d*) In the neighbourhood, near, at hand; approaching, resembling; न द्रक्ष्यामः पुनर्जातु धार्मिकं राममन्तरा Rām. approaching or resembling Rāma. (*e*) Nearly, almost. (*f*) In the mean time; नाद्याच्चैव तथान्तरा Ms. 2. 56; Y. 3. 20. (*g*) At intravals, here and there; now and then, for sometime, now-now (when repeated);

अन्तरा पितृसकमन्तरा मातृसंबद्धमन्तरा शुकनासमयं कुर्वन्नालापम् K. 118; अन्तरान्तरा निपतित here and there, at intervals; 121, 127; प्रजानुरागहेतोश्चान्तरान्तरा दर्शनं ददौ 58, Dk. 49. –2 (Used as a preposition with acc. P. II. 3. 4.) (a) Between; पञ्चालास्त इमे ...... कलिन्दतनयां त्रिस्रोतसं चान्तरा B. R. 10. 86; यन्दतरा पितरं मातरं च Bri. Âr. Up.; ते (नामरूपे) यदन्तरा तद् ब्रह्म Ch. Up.; अन्तरा त्वां च मां च कमण्डलुः Mbh.; rarely with loc.; सुमन्त्रस्य बभूवात्मा चक्रयोरिव चान्तरा Râm.; पादयोः शकटं चक्रुरन्तरोरावुलूखलम् Râm. (b) Through; तिरस्कारिणमन्तरा ibid. (c) During; अन्तरा कथाम् S. D. (d) Without, except; न च प्रयोजनमन्तरा चाणक्यः स्वप्नेऽपि चेष्टते Mu. 3.–Comp. –अंसः the space between the shoulders, breast; अथ °से अभिमृश्य जपति Sat. Br.–°गर्भिणीन्यायः a position similar to the foetus which resides in the womb of a female; a topic within a topic; an अधिकरण within an अधिकरण (which is not a very desirable or acceptable situation in the explanation of a ग्रन्थ); तत्र एवमन्तरागर्भिणीन्यायो भवनीति अन्यथा सूत्रं वर्ण्यते। ŚB. on MS. 10. 3. 62; 9. 3. 2 + 3. –भवदेहः –भवसत्त्वम् the soul or embodied soul existing between the two stages of death and birth (यो मरणजननयोरन्तराले स्थितः प्राणी सोऽन्तराभवसत्त्वः). –दिश् see अन्तरदिश्. –भरः Ved. bringing into the midst or procuring स नः शक्रश्चिदा शकद् दानवाँ अन्तराभरः Rv. 8. 32. 12. –वेदिः –दी f. 1 a veranda resting on columns, porch, portico. –2 a kind of wall जयश्रीरन्तरावेदिर्मत्तवारणयोरिव –शृङ्गम् ind. between the horns.

अन्तरेण ind. 1 (Used as a preposition with acc. P. II. 3. 4 अन्तरान्तरेण युक्ते) (a) Except, without, leaving; हरिमन्तरेण न सुखम् Sk.; क इदानीं सहकारमन्तरेण पल्लवितामतिमुक्तलतां सहते Ś. 3; क्रियान्तरान्तरायमन्तरेण आर्यं द्रष्टुमिच्छामि Mu. 3 without interfering with any other duty; न राजापराधमन्तरेण प्रजास्वकालमृत्युश्चरति U. 2; मार्मिकः को मरन्दानामन्तरेण मधुव्रतम् Bv. 1. 117. (b) With regard or reference to, with respect to, about, towards, on account of; अथ भवन्तमन्तरेण कीदृशोऽस्या दृष्टिरागः Ś. 2; तदस्या देवीं वसुमतीमन्तरेण महदुपालम्भनं गतोऽस्मि Ś. 5; किं नु खलु मामन्तरेण चिन्तयति वैशंपायनः K. 178; छलितं नाम नाट्यमन्तरेण कीदृशी मालविका M. 2 how M. is faring or progressing in the dance &c.; ततस्तया भवतोऽविनयमन्तरेण परिगृहीतार्था कृता देवी M. 4. (c) Within, inside, into (मध्ये). (d) Between, (उभयोर्मध्ये); त्वां मां चान्तरेणकमण्डलुः Mbh.; अन्तरेण हवनीयं गार्हपत्यं च Sat. Br.; अन्तरेण स्तनौ वा भ्रुवौ वा विमृज्यात् ibid.; Si. 3. 3. (e) During, amidst. –2 (Used as an adverb) (a) between, amidst; यावद्वा मक्षिकायाः पत्रं तावानन्तरेणावकाशः Sat. Br. (b) At heart, अन्तरेण सुस्निग्धा एषा Mk. 1.

अन्तरालम्, अन्तरालकम् [अन्तरं व्यवधानसीमां आराति गृह्णाति, आरा–क, रस्य लत्वम्] 1 Intermediate space or region or time, interval; दंष्ट्रान्तरालग्न K. 30; आस्यान्तरालनिःसृतेन Dk. 143; दिङ्नामान्यन्तराले P. II. 2. 26; दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालं दक्षिणपूर्वा Sk.; Si. 9. 2; पयोधरान्तरालम् K. 83; रागलज्जान्तरालवर्तिभिरीक्षणविशेषैः Dk. 17, 143 half way betwixt love and bashfulness; प्रतिमानं प्रतिच्छाया गजदन्तान्तरालयोः Trik.; oft. used for 'room' or 'space' in general; त्रस्तजनदत्तान्तरालया राजवीथ्या Dk. 150; भुवनान्तरालविप्रकीर्णेन शाखासञ्चयेन K. 23, 162; अन्तराले in midway; in the midle; or middst; in the interval; बाष्पाम्भःपरिपतनोद्गमान्तराले in the interval between the dropping down and starting up of tears; U. 1. 31; Mâl. 9. 14; अहमागच्छन्नन्तराले महता सिंहेन अभिहितः Pt. 1; कंचित्पुरुषमन्तराल एवावलम्ब्य Dk. 15; न मयान्येन चान्तराले दृष्टा Dk. 123. –2 Interior, inside, inner or middle part; छिद्रीकृतान्तरालम् Dk. 148; विषमीकृतान्तरालया K. 223. –3 Mixed tribe or caste (संकीर्णवर्ण); वर्णानां सान्तरालानां स सदाचार इष्यते. –Comp. –दिश् f. the intermediate point of the compass, such as, north-east &c.

अन्तरि 2 P. (अन्तर्+इ) 1 To go between, to stand in one's way, intervene to separate; रात्रेरेनं तदन्तरियात् Ait. Br. –2 To exclude from, to pass over, omit. –3 To disappear, see अन्तरित below. (–अयति) To come or step between, interpose; दर्दुरक उपसृत्य अन्तरयति Mk. 2 (it may also mean, 'separates the two').

अन्तरयः–रायः 1 An impediment, obstacle, hindrance, what stands in the way; स चेत् त्वमन्तरायो भवसि च्युतो विधिः R. 3. 45, 14. 65; बह्वन्तराययुक्तस्य धर्मस्य त्वरिता गतिः Pt. 3. 101; अस्य ते बाणपथवर्तिनः कृष्णसारस्य अन्तरायौ तपस्विनौ संवृत्तौ Ś. 1 v. l. standing in the way. –2 (In Vedânta) Hindrance to the concentration of mind which is said to be of four kinds, लय, विक्षेप, कषाय and रसास्वाद. –3 An intervention, a covering, screen; दाहप्रेम्णा सरसबिसिनीपत्रमात्रान्तरायः Mâl. 3. 12. –4 (With the Jainas) Interference or obstruction offered to those who are engaged in seeking deliverance, and consequent prevention of their accomplishment of it; one of the 8 classes of *karman*.

अन्तरित p. p. 1 Gone between, intervening. –2 Gone within, hidden, concealed, covered, screened, shielded, protected (from view) by something; पादपान्तरित एव विश्वस्तामेनां पश्यामि Ś. 1 hid behind a creeper; सारसेन स्वदेहान्तरितो राजा H. 3 screened; विटपान्तरितास्तिष्ठ Ś. 3; नलिनीपत्रान्तरितं प्रियसहचरमपश्यन्ती Ś. 4; शार्दूलचर्मान्तरितोरुपृष्ठम् Ku. 7. 37 covered; Dk. 21, 146; K. 28, 152, 200; पर्वतान्तरितो रविः set. Ak.; त्वगन्तरिततृतीयलोचनम् K. 108, R. 10. 8; उन्मादमोहान्तरितोऽपि Mâl. 9; तल्पमन्तरितभूमिभिः कुथैः R. 19. 2. –3 Gone in, reflected; स्फटिकभित्त्यन्तरितान् मृगशावकान् reflected in the crystal wall. –4 (a) Concealed, made dormant, impeded, hindered, prevented; त्वदभिप्रायापरिज्ञानान्तरित एवायमनुनयः Mu. 2 prevented from being made; त्वद्वाक्छान्तरितानि साध्यानि Mu. 4. 15 prevened from being actually effected &c.; द्विषत्प्रतापान्तरितोरुतेजाः Ki. 3. 45 obscured; नोपालभ्यः पुमांस्तत्र दैवान्तरितपौरुषः Pt. 2. 133. (b) Separated, lost to view, made invisible by interposition; मुहूर्तान्तरितमाधवा दुर्मनायमाना Mâl. 8; भर्तुरेतान्यक्षराणि बिम्बान्तरितानि M. 3; धनमित्राख्ययान्तरितः Dk. 36; चन्द्रापीडनामान्तरितस्य चन्द्रमसः K. 338; प्रतिनिवर्तमानया त्राजनसंकुलेन अन्तरिते तस्मिन् Mâl. 2; क्रियतां कथमन्त्यमण्डनं परलोकान्तरितस्य ते मया Ku. 4. 22 separated (from me) by the next

world, i. e. dead, deceased; मेघैरन्तरितः प्रिये तव मुखच्छायानुकारी शशी S. D. (c) Drowned, obscured removed, eclipsed; परलोकभयमैहिकदुःखेनान्तरितम् Dk. 82. drowned, eclipsed, obscured; वीरलोकसाधुवादेनान्तरितः समरतूर्यरवः Ve. 4 drowned; विस्मयान्तरितशोकवृत्तान्ता K. 322; कार्यान्तरितोत्कण्ठम् V. 3. 4 forgotten, removed; इन्दुप्रकाशान्तरितोडुतुल्याः R. 16. 65 obscured by moon-light. -5 Disappeared, vanished, departed, retired, withdrawn; (महामृगः) आश्रमान्तरितः शीघ्रं प्लवमानो महाजवः Mb. 3. 311. 9. अन्तरिते तस्मिञ्शबरसेनापतौ K. 33; नाथदेहस्पर्शेन अन्तरित एव सन्तापः U. 6 has disappeared, has been removed. -6 Passed over, omitted; अये मध्यमाम्बावृत्तान्तोऽन्तरित एवार्येण U. 1; कथान्तरेणान्तरितमिदम् M. 5 put off, delayed. -7 Slighted, despised. -8 (In Math.) That which remains, the remainder -9 A technical term in architecture.

अन्तरि-री-क्षम् [अन्तः स्वर्गपृथिव्योर्मध्ये ईक्ष्यते, ईक्ष् कर्मणि घञ्, अन्तः ऋक्षाणि अस्य वा पृषो° पक्षे ह्रस्वः ऋकारस्य रित्वं वा Tv., according to Nir. अन्तरा द्यावापृथिव्योः क्षान्तं अवस्थितं भवति, or अन्तरा इमे द्यावापृथिव्यौ क्षयति निवसति; or शरीरेष्वन्तः अक्षयं न पृथिव्यादिवत् क्षीयते] 1 The intermediate region between heaven and earth; the air, atmosphere, sky (अन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योम Say.) दिवं च पृथिवीं चान्तरिक्षमथो स्वः Sandhyā Mantra; योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवदीक्षं हैतन्नाम ततः पुरान्तरा वा इदमीक्षमभूदिति तस्मादन्तरिक्षं Śat. Br. दिव्यन्तरिक्षे भूमौ च घोरमुत्पातजं भयम् Rām. 2. 1. 43 -2 The middle of the three spheres or regions of life. -3 Talc. (Mar. अभ्रक) -4 A synonym of a pent-roof. Māna. 18. 174-75. **-Comp. -उदर** *a.* whose inside is as wide as the atmosphere. (**-रम्**) the interior of the atmosphere.**-कान्तः** a class of ten-storeyed buildings. Māna. 28. 14-15. **-क्षित्, -सद्** *a.* dwelling in the atmosphere. **-गः, -चरः** a bird (moving through the atmosphere). ततोऽन्तरिक्षगो वाचं व्याजहार नलं तदा Mb. 3. 53. 20. **-गत** *a.* moving in air; अब्रवीच्च तदा वाक्यं जातक्रोधो बिभीषणः। अन्तरिक्षगतः Rām. 6. 16. 18. **-जलम्** water of the atmosphere, dew. **-प्रा** *a.* [अन्तरिक्षं प्राति पूरयति, प्रा-विच्.] filling the atmosphere; illuminating the sky, travelling through the atmosphere. **-प्रुत्** *a.* [अन्तरिक्षं प्रवते गच्छति, प्रु क्विप्] floating over the atmosphere, sweeping or going through it. **-लोकः** the intermediate region, regarded as a distinct world; त्रयो लोका एत एव वागेवायं लोकः (earth) मनोन्तरिक्षलोकः, प्राणोऽसौ लोकः (heaven) Śat. Br. **-शंसित** *a.* sharpened in the atmosphere. **-सद्यम्** [अन्तरिक्षे सद्यं सदनं, सद् भावे यत्] dwelling or residence in the atmosphere.

अन्तरि-री-क्ष्य *a.* [भवार्थे यत्] Aerial, atmospheric.

अन्तरीपः [अन्तः मध्ये गता आपो यस्य बहु. अ P. V. 4. 74. अप ईत् द्व्यन्तरुपसर्गेभ्योऽपईत्; P. VI. 3. 97] A portion of land stretching out into the sea, promontory; an island (being situated in and surrounded on all sides by, water). सान्तरीपश्च सागरः Śiva. B. 18.13; दृष्ट्वा तानि ध्रुवमुपगतः सैन्धवादन्तरीपात्। Rām. ch. 4, 96

अन्तरे,-रेण See under अन्तर.

अन्तर्गम् 1 P. 1 To go between, interpose, intervene (so as to exclude). -2 To be included or comprised in. -3 To vanish, disappear (mostly used in past part. only).

अन्तर्गत *p. p.* **-गामिन्** *a.* 1 Gone into or between, crept into (as a bad word &c.). -2 Being or seated in, included in or by, existing in, belonging to; °श्चैव ग्रामे Ms. 4. 108; लघुद्वीपा जम्बूद्वीपान्तर्गता एव H. 3.; पार्थिवानि च भूतानि सागरान्तर्गतानि च Rām. -3 Being in the interior, hidden, concealed, internal, inward, secret, suppressed; अन्तर्गतमपास्तं मे रजसोऽपि परं तमः Ku. 6. 60 inward; सौमित्रिरन्तर्गतबाष्पकण्ठः R. 14. 53 with suppressed tears; K. 60; °तां हृदयशुद्धिम् 135 inward; अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावम् R. 2. 43 internal, seated in the breast or heart; °फलारम्भाः 10. 59; °तो हृदयाभिलाषः K. 143; °तेन चन्द्रापीडेन 198; नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः inward or secret motives of the mind Pt. 1. 44; बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् Ms. 8. 25; °गतप्रार्थनम् Ś. 7. 2 inwardly longing (for the same). -4 Slipped out of memory, forgotten. -5 Vanished, disappeared. -6 Destroyed. **- Comp. -उपमा** a concealed simile (the particle of comparison being omitted.) **-मनस्** = अन्तर्मनस् q. v.

अन्तर्धा 3 U. 1 To place or keep within, deposit; उदुम्बरशाखामन्तर्धाय अभिषिञ्चति Ait. Br. -2 To receive within or into oneself, admit, take in; तथा विश्वंभरे देवि मामन्तर्धातुमर्हसि R. 15. 81; contain, comprise, include; (शास्त्रमेतत्) अन्तर्धास्यति तत्सर्वमेतद्वः कथितं मया Mb. -3 To indicate, exhibit, display. -4 To hide or conceal oneself from, avoid the sight of, (with abl. and used in *Atm.*); उपाध्यायादन्तर्धत्ते P. I. 4. 28. Com. अन्तर्धत्स्व रघुव्याघ्रात् Bk. 5. 32; मत्तो मान्तर्धिथाः सीते 6. 15. अन्तर्दधानां रक्षोभ्यः 8. 71; -5 To cover up, conceal from view, hide, obscure, envelope, wrap up, veil; सध्वजं सरथं साश्वं भीष्ममन्तर्दधे शरैः Mb. 6. 118. 37. eclipse (fig.); अनृतेनात्मानमन्तर्धाय Ch. Up.; भौमं (रजः) अन्तर्दधे लोकमावृत्य सवितुः प्रभां Rām. enveloped, covered; पितुरन्तर्दधे कीर्तिं शीलवृत्तिसमाधिभिः Mb. obscured or eclipsed. *-pass.* 1 To be received within, be absorbed; to be covered up or concealed, be obscured or rendered invisible, become invisible; to vanish, disappear, cease to exist; इषुभिर्व्यतिसर्पद्भिरादित्योऽन्तरधीयत Mb.; ते चान्तर्दधिरे नागाः *ibid*; रात्रिरादित्योदयेऽन्तर्धीयते Nir. disappears; आत्मन्यन्तर्दधे, तत्रैवान्तरधीयत &c. *-Caus.* (-धापयति) To render invisible, conceal.

अन्तर्धा [धा भावे अङ्] Covering, concealment &c.; अन्तर्धामुपययुरुत्पलावलीषु Śi. 8. 12.

अन्तर्धानम् [धा-ल्युट्] Being invisible, disappearance, passing out of sight; °व्यसनरसिका रात्रिकापालिकीयम् K. P. 10; °गम् or इ to become invisible, disappear. **-Comp. -गत** *a.* disappeared, invisible. **-चर** *a.* moving invisibly.

अन्तर्धायक *a.* Concealing, rendering invisible.

अन्तर्धिः *f.* [धा-कि] Disappearance, concealment; hiding oneself from (another); अन्तर्धौ येनादर्शनमिच्छति P. I. 4. 28; अन्तर्धिं द्रुतमिव कर्तुमभ्रुवर्षैः Śi. 8. 42.

अन्तर्हित *p. p.* 1 Placed between, separated, rendered invisible by interposition, hidden, concealed; अनुवन्त्राह्मणाः सिद्धा भूतान्यन्तर्हितानि च Mb. 3. 37. 21. अन्तर्हिता शकुन्तला वनराज्या Ś. 4; covered (with something else); अन्तर्हिताशापथो जलदकाल इव K. 293; शेष्वानन्तर्हितायां त्वं भूमौ Rām. uncovered or bare ground; पात्रेषु दर्भान्तर्हितेषु अप आसिच्य Āśval.; अन्तर्हिते आवाम् V. 2; अन्तर्हिता यदि भवेद्वनिता न वेति Mk. 3. 4 a disguised male, a female in male dress. -2 Disappeared, vanished, become invisible; इति मन्त्रयमाणः स्वयमन्तर्हितः Ś. 4 withdrew from sight, became invisible; अन्तर्हिते शशिनि Ś. 4. 2; तस्यायमन्तर्हितसौधभाजः R. 13. 40 dwelling in a palace hidden under (the waters). -**Comp.** -**आत्मन्** *m.* N. of Śiva.

अन्तर्भू 1 P. To be contained, comprised or included in; be inherent or implied in; कदा न्वन्तर्वरुणे भुवानि Rv. 7. 86. 2. केचिदन्तर्भवन्त्येषु K. P. 8.; गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते S. D.; अन्तर्भूय रहस्येषु तैर्वशीक्रियते हि सः Ks. 34. 204; वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः। अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन्क्रियाविधौ ॥ Ms. 12. 87. -*Caus.* To contain, include, imply, involve; अन्तर्भावितण्यर्थोऽत्र नमिः P. III. 1. 88. Sk. involving a causal sense.

अन्तर्भव *a.* Inward, internal, inwardly situated.

अन्तर्भावः 1 being included or comprised in, inclusion; तेषां गुणानामोजस्यन्तर्भावः K. P. 8. -2 Inherent or natural condition or disposition. -3 Disappearance, becoming invisible; सर्वे अन्तर्भावं गताः Dk. 26.

अन्तर्भावना 1 Inclusion. -2 Inward meditation or anxiety. -3 A technichl term in arithmetic, rectification of numbers by the differences of the products.

अन्तर्भूत *p. p.* 1 Included or contained in; कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥ Hari. -2 Inward, internal, internally situated; एष वै भगवान् विष्णुरन्तर्भूतः सनातनः.

अन्तर्य *a.* Inner.

अन्तस्त्यम् Intestines; Ait. Br.

अन्तार *a.* [अन्त ऋ अण्] A cowherd; Śabda. ch.

अन्ति *ind.* [अन्त-इ] Ved. 1 Near, before, in the presence of; न ही नु वो मरुतो अन्त्यस्मे Rv. 1. 167. 9; 1.79. 11. -2 (Prep.) To, in the vicinity of (with gen.); मुग्धप्रमीतवद्रुपेयतुरन्ति मात्रोः Bhag. 10. 8. 22. -**तिः** *f.* An elder sister (in dramas). -**Comp.** -**ऊति** *a.* ready with help. (-**तिः** *f.*) protection of what is near (आसन्नरक्षण); अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् Rv. 1. 138. 1. -**गृहम्** a house near one's own dwelling, the neighbourhood of the house. -**देव** *a.* being near the god; an adversary (at dice); पाथो हि ष्मा वृषणाअन्तिदेवम् Rv. 1. 180. 7. -**मित्र**, -**वाम**, -**षुम्ण** *a.* near or at hand with help, wealth, or kindness; अन्तिवामा दूरे Rv. 7. 77. 4 (निकटस्थधना).

अन्तिका 1 An elder sister. -2 An oven, fire-place. -3 N. of a plant (सा-शा-तलाख्यौषधिः; Mar. शिकेकाई).

अन्तिक *a.* [अन्तः सामीप्यम् अस्यास्तीति मत्वर्थीयः ठन्; according to Nir. from आ-नी; अन्तिकं कस्मात् आनीतं भवति सन्निकृष्टत्वात्] 1 Near, proximate (with gen. or abl. P. II. 3. 34). वैरमान्तिकमासाद्य यः प्रीतिं कर्तुमिच्छति। मृन्मयस्येव भग्नस्य यथा सन्धिर्न विद्यते॥ Mb. 12. 139. 69. -2 Reaching to the end of, reaching to; नासान्तिक Ms. 2. 46. -3 Lasting till, until; as far as, up to; षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् Ms. 3. 1; ग्रहणान्तिकम् Y. 1. 36. -**कम्** Nearness, proximity, vicinity, presence; न त्यजन्ति ममान्तिकम् H. 1. 43; oft. in comp.; °न्यस्त R. 2. 24; कर्ण-°चरः Ś. 1. 23; सिंहासनान्तिकचरेण सहोपसर्पन् M. 1. 12 a servant in attendance upon the throne. -**कः** A class of two storeyed buildings; Māna. 20. 94. 26-27. - *adv.* (with abl. or gen. or as last member of comp.) Near (to), in the vicinity; अन्तिकं ग्रामात्-ग्रामस्य वा Sk.; into the presence or proximity of; दूरस्थस्यैत्य चान्तिकम् Ms. 2. 197; प्रविष्टे पितुरन्तिकम् Rām.; so जनान्तिकम्, मृगान्तिकम्; अन्तिकेन near (with gen.) अन्तिकेन ग्रामस्य P. II. 3. 35; अन्तिकात् near, closely, within the presence of; from the proximity of, from near, from (abl. or gen. or acc.); °कादागतः P. VI. 2. 49; रजःकणैःस्पृशद्भिर्गात्रमन्तिकात् Rām.; क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् Ms. 9. 174 from; so नैव प्रवृत्तिं शृणुमस्तयोः कस्यचिदन्तिकात् Rām.; अन्तिके near, closely, in the presence of or proximity of; दूरस्थं चान्तिके च तत् Bg. 13. 15; दमयन्त्यास्तदान्तिके निपेतुः Nala. 1. 22; °के स्त्रियाः Ms. 2. 22. -**Comp.** -**आश्रयः** resorting to what is near, contiguous support (that given by a tree to a creeper).

अन्तितः *ind.* Ved. Near.

अन्तिम *a.* [अन्ते भवः, अन्त डिमच्] 1 Immediately following. -2 Last, final, ultimate; अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः H. 1. -**Comp.** -**अङ्कः** the last digit, the number nine. -**अङ्गुलिः** the little finger (कनिष्ठिका).

अन्ती An oven, fire-place.

अन्त्य *a.* [अन्ते भवति वसति &c., अन्ताय हितः; अन्त-यत्] 1 Last, final (as a letter, word &c.); last (in time, order or place) P. I. 1. 47; as ह of letters, Revatī of asterisms, Mīna of the zodiacal signs. &c.; अन्त्ये वयसि in old age R. 9. 79; अन्त्यं ऋणम् R. 1. 71 last debt; °मण्डनम् 8. 71 last funeral decoration, Ku. 4. 22. -2 Immediately following (in comp.); अष्टम° ninth. -3 perishable, transitory; देहाद्यपार्थमसदन्त्यमभिज्ञमात्रं (विन्देत) Bhag 12. 8. 44. -4 Lowest (in rank, degree or position), undermost, worst, inferior, base, vile, wretched; °अवस्थां गतः Pt. 4. 110 reduced to the worst plight; अन्त्यासु दशासु Pt. 1. 336 at perilous (critical) times; belonging to the lowest caste; चण्डाल °स्त्रियः Ms. 11. 175; °स्त्रीनिषेविणः 12. 59; अन्त्यादपि वरं रत्नं स्त्रीरत्नं दुष्कुलादपि;

शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः (साक्ष्यं कुर्युः) 8. 68, 3. 9; 4. 79; Y. 1. 148, 2. 294. **–न्त्यः 1** A man of the lowest caste; see above. **–2** N. of a plant (मुस्ता Mar. नागरमोथा) (*f.* also) (the roots of which are prescribed for colic). **–3** The last syllable of a word. **–4** The last lunar month i. e. Fālguna. **–5** A Mlechcha, foreigner, barbarian. अन्त्येषु स विनिक्षिप्य पुत्रान् यदुपुरोगमान् Mb. 1. 86. 12. **–6** (In Vaiśeṣika Phil.) A name for the category विशेष; अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः Bhāṣā P. **–न्त्या 1** A technical name for त्रिज्या in astronomy. **–2** A woman of the lowest tribe. **–न्त्यम् 1** A measure of number; 1000 billions (1000,000,000,000,000.) **–2** The 12th sign of the zodiac. **–3** The last member or term of a progression (series), the last figure; स्थाप्योऽन्त्यवर्गो द्विगुणान्त्यनिघ्नः Līlā. **–Comp. –अनुप्रासः** see under अनुप्रास. **–अवसायिन्** *m.*, *f.* (°यी, °यिनी) a man or woman of the lowest caste, begotten by a chaṇḍāla on a Niṣādī woman; निषादस्त्री तु चाण्डालात्पुत्रमन्त्यावसायिनम्। श्मशानगोचरं सूते बाह्यानामपि गर्हितम्॥ Ms. 10. 39; the following 7 are regarded as belonging to this class; चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥ सोऽहमन्त्यावसायानां हराम्येनां प्रतिगृहात् Mb. 12. 141. 41. see अन्तेवसायिन्. **–आश्रमिन्.** *m.* one who belongs to the last or mendicant order. **–आहुतिः –इष्टिः** *f.* **–कर्मन्, –क्रिया** last or funeral oblations, sacrifices or rites; °कर्म Ms. 11. 197, 5. 168; अन्त्याहुतिं हावयितुं सविप्राः Bk. **–ऋणम्** the last of the three debts which every one has to pay, *i.* e. begetting children; see अनृण. **–गमनम्** intercourse by a woman of the higher caste with a man of the lowest caste. **–ज.** *a.* **1** latest born, younger **–2** belonging to the lowest caste; °जैर्नृभिः Ms. 4. 61; °स्त्री 8. 385. **(–जः) 1** a śūdra (अन्त्यः सन् जायते, वर्णमध्ये शेषभवत्वात्). **–2** one of the 7 inferior tribes; chaṇḍāla &c.; रजकश्चर्मकारश्च नटो वरुड एव च। कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः॥ Yama; also Ms. 8. 279; Y. 1. 273. **(–जा)** a woman of the lowest caste; Ms. 11. 59, 171; Y. 3. 231. **–जन्मन्, –जाति, –जातीय** *a.* **1** one belonging to the lowest caste; प्रतिग्रहस्तु क्रियते शूद्रादप्यन्त्यजन्मनः Ms. 10. 110. **–2** a Śūdra; °तिता Ms. 12. 9. **–3** a chaṇḍāla. **–धनम्** the last term of a progression or series. **–पदम्, –मूलम्** the last or greatest root (in a square). **–भम् 1** the last lunar mansion रेवती. **–2** the last sign of the zodiac; मीन Pisces.. **–युगम्** the last or Kali age. **–योनि.** *a.* of the lowest origin; अन्त्यानामन्त्ययोनयः (साक्ष्यम्) Ms. 8. 68. **(–निः)** the lowest source or origin **–लोपः** dropping of the last letter or syllable of a word. **–वर्णः, –वर्णा** a man or woman of the lowest caste, a śūdra male or female. **–विपुला** N. of a metre.

अन्त्यकः A man of the lowest tribe. See अन्त्यज.

अन्त्रम् [अन्त्यते बध्यते देहोऽनेन, अन्त्-करणे ष्ट्रन्; according to Uṇ. 4. 163 अम्-क्त्र] An entrail, intestine; अन्त्रभेदनं क्रियते प्रश्रयश्च Mv. 3 the vitals of the heart are rent (मर्मभिदः वाचः उच्यन्ते इत्यर्थः). **–न्त्री** N. of a plant (used against colic or wind in the stomach (Mar. वरधारा); cf. अजान्त्री, छगलान्त्री). **–Comp. –आदः** a worm in the intestines. **–कूजः, कूजनम्, –विकूजनम्** the rumbling noise in the bowels; पक्वाशयस्थोऽन्त्रकूजं शूलं नाभौ करोति वा Suśr. **–पाचक** [अन्त्रस्थं दोषं पाचयति] N. of a medicinal plant Æschynomene Grandiflora. (सं. वसन; Mar. तमालपत्र). **–मांसम्** a kind of roasted flesh. **–वृद्धिः** *f.* inguinal hernia, rupture, swelling of the scrotum. **–शिला** N. of a river rising from the Vindhya mountain. **–स्रज्** *f.* a garland of intestines (worn by नृसिंह).

अन्त्रंधमिः *f.* Indigestion, inflammation of bowels; flatulence.

अन्द् 1 P. To bind, fasten.

अन्दः Binding.

अन्दुः –न्दूः *f.* [अन्द्यते बध्यते अनेन, अन्द्-कु, कूप्रत्ययान्तः निपातः Uṇ. 1. 93] also अन्दुकः, अन्दूकः **1** A chain or fetter. **–2** A chain for the elephant's feet; गजमन्दूरिव निश्चलं चकार Śi. 20. 51; °निनादः 11. 7. **–3** A sort of ornament worn round the ankles; cf. नूपुर.

अन्दिका 1 An oven, fire-place. **–2** An elder sister (cf. -अन्तिका).

अन्दोलयति Den. P. To swing, agitate, rock to and fro, oscillate. See आन्दोल्.

अन्दोलनम् Swinging, oscillating, waving; द्राक् चामरान्दोलनात् Udb. See आन्दोलनम्.

अन्ध् 10 U. **1** To make blind, blind; अन्धयन् भृङ्गमालाः Śi. 11. 19; तिमिरं जनस्य दृशमन्धयति 9. 21. **–2** To be or become blind.

अन्ध *a.* **1** Blind (lit. and fig.); devoid of sight, unable to see (at particular times); दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे; D. Bhāg. made blind, blinded; स्रजमपि शिरस्यन्धः क्षिप्तां धुनोत्यहिशङ्कया Ś. 7. 24; मदान्धः blinded by intoxication; so दर्पान्धः, क्रोधान्धः; काम°, लोभ°, अज्ञान°; अज्ञानान्धस्य दीपस्य ज्ञानाञ्जनशलाकया। चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥; सहजान्धदृशः स्वदुर्नये Śi. 16. 29 blind to his own wicked acts. **–2** Making blind, preventing the sight; utter, pitchy; complete, thick (darkness) प्रधर्षितायां वैदेह्यां बभूव सचराचरम्। जगत्सर्वममर्यादं तमसान्धेन संवृतम्॥ Rām 3.52. 9. Ms. 8. 94; सीदन्नन्धे तमसि U. 3. 33; Māl. 9. 8. 20; See °कूप, °तामसम् *infra*. **–3** Afflicted. आर्यः पर्युषितं तु नाभ्यवहरत्यन्धः क्षुधान्धोऽप्यसौ Viś. Guṇa. 101. **–4** Soiled, tarnished; निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते Rām. 3. 16. 13. **–न्धम्** Darkness. अन्धः स्यादन्धवेलायां बाधिर्यमपि चाश्रयेत् Mb. 1. 140. 12. **–2** Spiritual ignorance; अज्ञान or अविद्या q.v. **–3** Water; also, turbid water. **–न्धः 1** A kind of mendicant (परिव्राजक) who has completely controlled his organs; तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्। चतुष्पदां भुवं मुक्त्वा परिव्राडन्ध उच्यते॥ **–2** An epithet of the zodiacal signs at particular periods; (नष्टद्रव्यलाभालाभोपयोगयुक्तो राशिभेदः);

अपुष्प *a.* Flowerless, not flowering. **-ष्पः** The glomerous fig-tree. **-Comp. -फल**, °द bearing having neither fruits nor flowers; fruits without flowering. (**-लः, -दः**) 1 the jack tree (Mar. फणस). Artocarpus Integrifolia. **-2** the glomerous fig-tree (उदुम्बर).

अपुस् *n.* Ved. Shape, body = वपुस्

अपूजक *a.* Irreligious, irreverent.

अपूजा Disrespect, irreverence.

अपूपः [न पूयते विशीर्यते, पू-प. न. त. Tv.] 1 A small round cake of flour, meal &c. (Mar. वडा, घारगा, अनरसा &c.), thicker than ordinary cakes and mixed with sugar and spices; कृसरसंयावं पायसापूपमेव Ms. 5. 7. भीमेनानिबलेन मत्स्यभवनेऽपूपा न संघट्टिताः Pt. 3. 172; अपूपं गुरवे तं च साम्नृतं स न्यवेदयत् । Bm. 1. 38. **-2** Wheat. **-3** Honeycomb. आदित्यो देवमधु...अन्तरिक्षमपूपो Chān. Up. 3. 1. 1. **-शाला** a Sweetmeat shop; सभाप्रपापूपशाला Ms. 9. 264.

अपूपीय, -अपूप्य [अपूपाय हितं, छ यत् च] Belonging to, intended for, अपूप. **-प्यम्** Flour, meal.

अपूरणी The silk cotton tree (शाल्मली). Bombax Heptaphyllum (Mar. सांवरी).

अपूरुष 1 Lifeless, inanimate (as wood &c.) अदो यद् दारु प्लवते सिन्धोः पारे अपूरुषम् Rv. 10. 155. 3 **-2** Soulless. **-3** Unpeopled, untenanted.

अपूर्ण *a.* Not full or completed, incomplete, deficient, imperfect; अपूर्णमेकेन शतक्रतूनाम् R. 3. 38; अपूर्ण एव पञ्चरात्रे दोहदस्य M. 3. **-र्णम्** Incomplete number or fraction. **-Comp. -काल** *a.* premature, untimely. (**-लः**) premature or incomplete time; °ज abortive.

अपूर्तिः *f.* Non-accomplishment.

अपूर्व *a.* 1 Not preceded, not having existed before, like of which did not exist before, quite new; °र्वं नाटकम् Ś. 1; °र्वं राजकुलम् M. 5; K. 191; **-2** Strange, extraordinary, wonderful; अपूर्वः कोऽपि बहुमानहेतुर्गुरुषु U. 4; अपूर्वो दृश्यते वह्निः कामिन्याः स्तनमण्डले। दूरतो दहतीवाङ्गं हृदि लग्नस्तु शीतलः॥ Ś. Til. 17; singular, unexampled, unprecedented; अपूर्व एष विरहमार्गः Ś. 6; अपूर्वरूपा दारिका M. 1; अतोऽपूर्वः खलु वो ऽनुग्रहः Ś. 7; अपूर्वकर्मचाण्डालमयि मुग्धे विमुञ्च माम् U. 1. 46 committing an unparalleled atrocity. **-3** Unknown, unacquainted, stranger; अपूर्वोऽप्ययवा विद्वान् Mb. 13. 22. 8; विदितेऽप्यपूर्व इव Ki. 6. 39. **-4** Not first. **-5** Preceded by अ or आ. **-6** (In phil.) 'That unseen virtue which is a relation superinduced, not before possessed, unseen but efficacious to connect the consequence with its past and remote cause and to bring about at a distant period or in another world the relative effect. —Colebrooke. **-र्वम्** 1 The remote consequence of an act (as the acquisition of heaven which is the result of good deeds), (Mīmāṁsā). **-2** Virtue and vice (पापपुण्यम्) as the eventual cause of future happiness or misery. **-र्वः** The Supreme Soul (परब्रह्म). **-Comp. -कर्मन्** *n.* religious rites the power of which on the future is not seen before. **-पतिः** *f.* one who has had no husband before, a virgin; °तिः कुमारी Sk. **-वादः** discussion or talk about the Supreme Soul. **-विधिः** an authoritative direction or injunction which is quite new; it is of four kinds; कर्मविधि, गुणविधि, विनियोगविधि and प्रयोगविधि.

अपूर्वता, -त्वम् Not having existed before, incomparableness, unparalleled or extraordinary nature; अपूर्वत्वात्प्रबन्धस्य Mv. 1.

अपूर्ववत् *ind.* Singularly, unlike anything else; दृष्टोऽपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान Śi. 4. 17.

अपूर्विन् *a.* Having not enjoyed the married life with a wife before. अपूर्वी भार्यया चार्थी वरुणः Ram 3. 18. 4.

अपूर्वीय *a.* Relating to the remote consequence of an act.

अपूर्वेण *adv.* Never before.

अपूर्व्य *a.* Ved. 1 Unprecedented, first. -2 Incomparable, unheard of before.

अपृक्त *a.* Not united, uncombined. **-क्तः** 1 (In gram.) An affix (or a word) consisting of a single letter; अपृक्त एकाल्प्रत्ययः P. I. 2. 41; एकवर्णपदमपृक्तम् Sk. -2 (In the Prātiśākhyas) The preposition आ and the particle उ.

अपृणत् *a.* Not filling; stingy.

अपृथक् *ind.* Not separately, together with, collectively. **-Comp. -धर्मशील** of the same religion. **-धी** *a.* maintaining the doctrine of pantheism; regarding God in all things.

अपृथक्त्विन् *a.* One who cannot distinguish (between the पुरुष and the प्रकृति). वर्णाश्रमपृथक्त्वे च दृष्टार्थस्यापृथक्त्विनः। नान्यदन्यदिति ज्ञात्वा नान्यदन्यत्प्रवर्तते ॥ Mb. 12. 308. 177 Critical Edition. 'पृथक्त्वं पुंप्रकृत्योर्विवेकः, तदस्यास्तीति पृथक्त्वी, तदन्यस्य' -नीलकण्ठ.

अपे [अप-इ] 2. P. 1 To go away, depart, withdraw, retire, run away, escape; **अपोहि** begone, avaunt, away, hence, get you gone; to disappear, vanish, pass away; die or perish also; धर्मश्चापैति Ms. 1. 82; हृदयात्प्रत्यादेशव्यलीकमपैतु ते Ś. 7. 24; रम्या नवद्युतिरपैति न शाद्वलेभ्यः Ki. 5. 37 does not leave. -2 To be wanting, be omitted, be deprived of, be free from. -3 To start (Ved.)

अपायः [इ-अच्] 1 Going away, departure. -2 Separation; ध्रुवमपायेऽपादानम् P. I. 4. 24 (अपायो विश्लेषः Sk.); येन जातं प्रियापाये कद्वदं हंसकोकिलम् Bk. 6. 75. -3 Disappearance, vanishing, absence; सूर्यापाये Me. 82 at the time of sunset; क्षणदापायशशाङ्कदर्शनः R. 8. 74 close of night; जलापायविपाण्डुराणि Śi. 4. 5; 4. 54; 18. 1. -4 Destruction, loss, death, annihilation; करणापायविभिन्नवर्णया R. 8. 42 loss, 83; मालत्यपायमधिगम्य Māl. 10. 9 death or disappearance of M. -5 An evil, ill, misfortune, risk, calamity, danger (oft. opp. उपाय); तदपि मरणापायचकितः Bh. 3. 9; तदनेन पापबुद्धिनोपायश्चिन्तितो नापायः Pt. 1 not the danger (resulting from the plan); उपायं चिन्तयेत्प्राज्ञस्तथापायं च चिन्तयेत् Pt. 1. 406; अपायसंदर्शनजां विपत्तिमुपायसंदर्शनजां च सिद्धिम् 1. 61; बह्वपाये वने Pt. 1 exposed to many dangers, dangerous; कायः संनिहितापायः H. 4. 65 exposed to dangers or calamities; सत्येऽप्यपायमपेक्षते H. 4. 102; Ki. 14. 19. -6 Loss, detriment, injury. -7 The end (of a word).

अपायिन् *a.* Departing, transient; perishable; see अनपायिन्.

अपेत *p. p.* Gone away, disappeared; अपेतयुद्धाभिनिवेशसौम्यः Śi. 3. 1. -2 Departing or deviating from, swerving from, contrary (with abl.); अर्थादनपेतं अर्थ्यम् P. IV. 4. 92 Sk. (धर्मपथ्यर्थन्यायादनपेते); स्मृत्यपेतादिकारिणः Y. 2. 4. -3 Free from, devoid of, deprived of (with abl. or in comp.); सुखादपेतः Sk.; उदवहदनवद्यां तामवद्यादपेतः R. 7. 70 faultless; °भीः Ms. 7. 197; भर्तर्यपेततमसि प्रभुता तवैव Ś. 7. 32 free from (mental) darkness. **-Comp. -राक्षसी** N. of a plant, Ocimum Sanctum (तुलसी) (अस्याः राक्षसतुल्यपापादिहरणात्तन्नामत्वम्).

अपेक्ष् [अप्-ईक्ष्] 1 A. 1 To look round or about for something, to look or hope for, expect. -2 To wait for, await; सज्जो रथो भर्तुर्विजयप्रस्थानमपेक्षते Ś. 2 awaits; क्षणमपेक्षस्व U. 7; K. 84; न कालमपेक्षते स्नेहः Mk. 7. न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते H. Pr. 30; पादेन नापैक्षत सुन्दरीणां संपर्कमासिञ्जितनूपुरेण Ku. 3. 26. -3 To require, want, stand in need of; wish or desire for; शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते Śi. 2. 86; न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते Mu. 1. 3; प्रभुता रमणेषु योषितां न हि भावस्खलितान्यपेक्षते V. 4. 26; Ku. 3. 18; Pt. 2. 26. -4 To have regard to, look to, have in view, have an eye to; किमपेक्ष्य फलं पयोधरान् ध्वनतः प्रार्थयते मृगाधिपः Ki. 2. 21; यतः शब्दोऽयं व्यञ्जकत्वेऽर्थान्तरमपेक्षते S. D. -5 To take into account or consideration, consider, think of, respect, care for; उपकृतमपि नापेक्षते K. 35, 197, 257, 315; नूनमस्यायमनपेक्षितास्मदवस्थो व्यापारः Māl. 9; अनलेष्विष्टवान् कस्माच्च त्वयाऽपेक्षितः पिता Bk. 6. 128; Ś. 5. 16, Ms. 8. 309; with न not to like, not to care for; अनपेक्षितराजराजम् Mu. 3. 18; तदानपेक्ष्य स्वशरीरमार्दवम् Ku. 5. 18.

अपेक्षा-क्षणम् 1 Expectation, hope, desire. -2 Need, requirement, necessity; निरपेक्ष without hope or need, regardless of; निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली Ram. 6. 47. 9. द्रोणस्तथोक्तः कर्णेन सापेक्षः फाल्गुनं प्रति (उवाच) Mb. 12. 2. 12. सापेक्षत्वेऽपि गमकत्वात्समासः; अनपेक्षः शुचिर्दक्षः Bg. 12. 16; or in comp.; स्फुलिङ्गावस्थया वह्निरेधापेक्ष इव स्थितः Ś. 7. 15 awaiting kindling. -3 Consideration, reference, regard, with the obj. in loc. case; more usually in comp.; मध्यभङ्गानपेक्षम् Ratn. 1. 15 regardless of; the instr. and sometimes loc. of this word frequently occur in comp. meaning 'with reference to', 'out of regard for', 'with a view to', 'for the sake of'; साऽपि कार्यकरणापेक्षया क्षुरमेकमादाय तस्याभिमुखं प्रेषयामास Pt. 1; नियमापेक्षया R. 1. 94; वृषलापेक्षया Mu. 1; पौरजनापेक्षया 2 out of regard for; किमकौशलादुत प्रयोजनापेक्षया 3 with a view to gain some object; प्रथमसुकृतापेक्षया Me. 17; दण्डं शक्त्यपेक्षम् Y. 2. 26, in proportion to, in accordance with; अत्र व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात् K. P. 1 as compared with it. -4 Connection, relation, dependence as of cause with effect or of individual with species; शरीरसाधनापेक्षं नित्यं यत्कर्म तद्यमः Ak. -5 Care, attention, heed; देशाऽपेक्षास्तथा यूयं यातादायाङ्गुलीयकम् Bk. 7. 49. -6 respect, reference. -7 (In gram.) = आकाङ्क्षा q. v. **-Comp. -बुद्धिः** (In Vaiśeṣika Phil.) the distinguishing perception by which we apprehend 'this is one', 'this is one' &c. and which gives rise to the notion of duality; see Sarva. chap. 10 where अपेक्षाबुद्धिः = विनाशकविनाशप्रति-

योगिनी बुद्धिः; cf. Bhāshā P. द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मताः। अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः॥ अपेक्षाबुद्धिनाशाच्च नाश-स्तेषां निरूपितः। 107-8.

अपेक्ष्य, -क्षितव्य, -क्षणीय *pot. p.* To be desired, wanted, hoped for, expected, considered &c.; desirable.

अपेक्षित *p. p.* Looked for, expected; wanted, desired, required; considered, referred to &c. **-तम्** Desire, wish; regard, reference, consideration.

अपेक्षिन् *a.* Hoping, waiting for, wishing or desiring for, wanting; considering, caring; usually as last member of comp.; गुरुर्विधिबलापेक्षी R. 15. 85; प्रयोजनापेक्षितया Ku. 3. 1 according to.

अपेय *a.* Not fit to be drunk; अपेयेषु तडागेषु बहुतरमुदकं भवति Mk. 2.

अपेहि (Imper. 2nd sing.) Used as the first member of some compounds (belonging to the class मयूरव्यंसकादि P. II. 1. 72); °करा, °द्वितीया, °प्रकसा, °वाणिजा, °स्वागता where it has the sense of 'excluding', 'expelling', 'refusing admission to'; *e. g.* °वाणिजा a ceremony where merchants are excluded; so °द्वितीया &c. **-Comp. -वाता** N. of a plant which expels wind.

अपोगण्डः -अपौगण्ड, [अ-पोगण्डः, or अपसि (वैध) कर्मणि गण्डः त्याज्यः Tv.] 1 Having a limb too many or too few (redundant or deficient). -2 Not under 16 years of age; बाल आषोडशाद्वर्षात्पोगण्डश्चापि संज्ञितः। Nārada; अजडश्चेदपौगण्डो विषये चास्य भुज्यते। Ms. 8. 148; पोगण्डः पञ्चमाद्ब्दादर्वाक् च दशमाब्दतः। -3 A child or infant (किशोर, शिशु). -4 Very timid; -5 Wrinkled, flaccid. -6 One past 16.

अपोढ see under अप-वह्.

अपोदक *a.* Ved. 1 Waterless; water-tight (नौः Rv. 1. 116. 3.). -2 Not watery, not fluid. **-कम्** [अपकृष्टमुदकं यस्मात्] Poison &c. that removes water (जलापकर्षहेतु विषादि).

अपोदिका, -की *f.* A sort of pot-herb (अपनद्धमुदकं यस्याः, तत्फलेषूदकवत्यात्तथात्वम्). **-की** see उपोदकी. Bassella Lueida or Rubra (Mar. थोरमयाळ)

अपोह् 1 U. [अप-उह् or ऊह्] To remove, drive or push away, dispel, take away, destory; स हि विघ्नानपोहति Ś. 3. 1; कुसुमानि...प्रभवन्त्यायुरपोहितुं यदि R. 8. 44, 54; पूर्वमुत्सवमपौहदुत्सवः (उत्तरः) 19. 5 pushed away, displaced, supplanted; मनसिजरुजं सा वा दिव्या ममालमपोहितुम् V. 3. 10; अकिंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति U. 2. 19 Removes; Bk. 17. 83; 15. 119; Ms. 8. 414, 11. 108; कल्पनाया अपोढः कल्पनापोढः P. II. 1. 38 Sk: removed from, or beyond imagination -2 To heal, cure (as illness). -3 To avoid, give up, leave; सर्वान् रसानपोहेत Ms. 10. 86; पञ्चवट्यां ततो रामः...अनपोढस्थितिस्तस्थौ R. 12. 31 not leaving (the path of) propriety. -4 To deny; स्थाप्यतेऽपोह्यते वा चेत् S. D. 730. -5 To reason, argue by way of opposing a statement.

अपोहः 1 Removing, driving away, healing &c. -2 Removal of doubt by the excercise of the reasoning faculty. -3 Reasoning, arguing; reasoning faculty. -4 Negative reasoning (opp. ऊह) (अपरतर्कनिरासाय कृतो विपरीतस्तर्कः), one of the *dhiguṇas* q. v. स्वयमूहापोहासमर्थः; इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः Mb. 13. 145. 43. ऊहापोहमिमं सरोजनयना यावद्विधत्तेतराम् Bv. 2. 74; hence ऊहापोह = complete discussion of a question. -5 Excluding all things not coming under the category in point; तद्वानपोहो वा शब्दार्थः (where Maheśvara paraphrases अपोह by अतद्व्यावृत्ति *i. e.* तद्भिन्नत्यागः), -6 A superfluous member attached to a structure of some construction.

अपोहनम् 1 Removal &c. = अपोह above. -2 Reasoning faculty; मत्तः स्मृतिर्ज्ञानमपोहनं च Bg. 15. 15 (Mr Telang translates अ° by removal: Lok. Tilak translates as नाश.) ततो धर्मस्ततो ज्ञानं यावत्स्मृतिरपोहनम् Bhāg. 11. 13. 6.

अपोहित *a.* 1 Removed; न च सामर्थ्यमपोहितं क्वचित् Ki. 2. 27. -2 Denied (in disputation, opp. to स्थापित).

अपोह्य,-अपोहनीय *pot. p.* To be removed, taken away; मृत्युर्बुद्धिमतापोह्यो यावद् बुद्धिबलोदयम् Bhāg. 10. 1. 48. expiated (as sin); to be established by reason.

अपौरुष,-पौरुषेय *a.* 1 Unmanly, cowardly, timid. -2 Superhuman, not of the authorship of man, of divine origin: अपौरुषेया वेदाः; अपौरुषेयप्रतिष्ठः सुवर्णबिन्दुरित्याख्यायते Māl. 9. not set up by (the hand of) man. **-षम् -षेयम्** 1 Cowardice, pussilanimity.-2 Superhuman power.

अप्त *a.* Ved. Obtained; watery; cf. Rv. 9. 16. 3.

अप्तस् *n.* A sacrificial act.

अप्तु *a.* Ved. Busy, active, industrious. **-प्तुः** (or *n.* Uṇ. 1. 74) 1 The body. -2 Soma (सूक्ष्मरूपसोम). -3 A sacrificial animal.

अप्तुर् *m.* [अद्भ्यः जलदानाय तुतोर्ति, जलानि प्रेरयति, तुर् क्विप् Tv.] 1 Active, busy, giving water, flowing as water; an epithet of Indra (Sāy. अपां प्रेरक इन्द्रः). -2 Fire.

अप्तु,-तू -र्यम् [अप्तुरो भावः बाहु °वेदे यत्] Sending down water (वृष्टिप्रेरकत्वम्), giving of water; zeal,. activity युवोरप्तूर्यं हितम् Rv. 3. 12. 8; 51. 9.

अप्तोर्यामः, -मन् *m.* N. of a sacrifice and of a verse of the Sāma Veda closing that rite; the last or 7th part of the Jyotiṣṭoma sacrifice.

अप्त्य *a.* [अप्तुनि देहे भवः यत् वेदे टिलोपः Tv.] 1 Engaged in an act, active (देहकर्मणि स्थित). -2 Offspring (अपत्य Nir.).

अप्नः -अप्नस् *n.* [आप्-असुन् नुट् ह्रस्वश्च, Uṇ. 4. 207] 1 Possession, property. -2 Work, sacrificial act or rite,

any act. -3 Offspring. -4 Form, shape. -5 To be obtained (used actively); [cf. L. *ops*]. -Comp. -स्थ *a.* superintending work (कर्मण्यधिकृत); (or *m.*) proprietor of an estate. -राजः lord of wealth or property, illustrious by means of works; directing works to be done (कर्मप्रेरक).

अप्नवान *a.* 1 Having progeny. -2 Poor. -नः [अप्नसे आदायकर्मणे वानं यस्य पृषो° सलोप Tv.] 1 The arm. -2 N. of a Riṣi in the family of or connected with Bhṛigu. यमाप्नवानो भृगवो विरुरुचुः Rv. 4. 7. 1.

अप्नस्वत् *a.* Having (sacrificial) acts or works; productive.

अप्पति, -अप्पित्तम् see under अप्.

अप्य *a.* [अपां इदं तत्र साधु संस्कृतम् वा यत्; अद्भिः संस्कृतम् P. IV. 4. 134] 1 Connected with or coming from water. त्वया हितमप्यमप्सु भागम् Rv. 2. 38. 7; watery; स ईं मृगो अप्यो वनर्गुरुप 1. 145. 5. consisting of, consecrated with, water (as हविः.) -2 Obtainable. -3 Active, connected with sacrificial acts.

अप्पदीक्षितः N. of a celebrated Draviḍa writer, author of works on Alaṅkāra and other subjects and a contemporary of Pandit Jagannātha who lived in the 17th century (written also as अप्पयादीक्षित).

अप्यञ्च् [fr. अञ्च्] Gone into, reaching, hidden.

अप्यय &c. see under अपी.

अप्यर्धम् *ind.* Ved. Near, in the neighbourhood.

अप्रकट *a.* Unmanifested, unapparent.

अप्रकम्प *a.* 1 Unshaken (fig. also), firm, steady. -2 Unanswerable (as argument).

अप्रकर *a.* Not acting well.

अप्रकरणम् Not the main or principal topic, incidental or irrelevant matter.

अप्रकल्पक *a.* Not explicitly enjoining, not prescribing as obligatory.

अप्रकाण्ड *a.* Stemless (small). -ण्डः A bush, a shrub.

अप्रकाश *a.* 1 Not shining or bright, dark, wanting in brightness (fig. also); प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः R. 1. 68. -2 Self-illuminated. -3 Hidden, secret, concealed; सीमायामप्रकाशानि कारयेत् Ms. 8. 251; 9. 256. -शम्, -शे *ind.* In secret, secretly; अहमप्रकाशे तिष्ठामि M. 4; सत्यवत्या हस्तेऽप्रकाशं निक्षिप्तः V. 5 secretly. -शः Indistinctness, secrecy; a secret.

अप्रकाशक *a.* Making dark; not disclosing &c.

अप्रकाश्य *a.* Not to be disclosed, to be kept secret (one of 9 such things); जन्मर्क्षं मैथुनं मन्त्रो गृहच्छिद्रं च वञ्चनम्। आयुर्धनापमानं स्त्री न प्रकाश्यानि सर्वथा ॥

अप्रकृत *a.* 1 Not principal or chief, incidental, occasional. -2 Not relevant to the subject under discussion, not to the point, irrelevant; see प्रकृत, प्रस्तुत; अप्रकृतं अनुसन्धा 'to beat about the bush', not to come to the point. -तम् (In Rhet.) उपमान *i. e.* the standard of comparison (opp. प्रकृत or उपमेय). -तः An insane person (cf. Dānasāgara.)

अप्रकृतिः *f.* 1 Not the inherent or natural property, accidental property or nature; an accident (विकृति). -2 Spiritual being; the Puruṣa of the Sāṅkhyas. -3 Not the original word; such as a termination.

अप्रकृष्ट *a.* Not excelled, low, vile. -ष्टः A crow.

अप्रक्षित *a.* Undecayed, undiminished, inexhaustible; अप्रक्षितं वसु बिभर्षि Rv. 1. 55. 8.

अप्रख्यता Infamy; अक्षमा ह्रीपरित्यागः श्रीनाशो धर्मसंक्षयः। अभिध्याऽप्रख्यता चैव सर्वं लोभात्प्रवर्तते Mb. 12. 158. 5.

अप्रगम *a.* Going too fast to be followed by others.

अप्रगल्भ *a.* 1 Not bold, bashful, modest (opp. धृष्ट); धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः H. 2. 26. -2 Coward, fearful; (विहगा जलचारिणः) नावगाहन्ति सलिलमप्रगल्भा इवाहवम् Rām. 3. 16. 22.

अप्रगुण *a.* Perplexed, confounded.

अप्रग्राह *a.* Unrestrained, unbridled.

अप्रचङ्कश *a.* Ved. Without the power of seeing; Av. 8. 6. 16.

अप्रचेतस् *a.* Ved. Deficient in understanding, foolish, stupid; Av. 20. 128. 2.

अप्रचोदित *a.* unasked, undesired; (भिक्षां) पुरस्तादप्रचोदितां...प्राह्याम् Ms. 4. 248.

अप्रच्छेद्य *a.* Inscrutable.

अप्रच्युत *a.* Unmoved; पर्वते न श्रितान्यप्रच्युतानि Rv. 2. 28. 8. not swerving from, following, observing (with abl.); अस्मादप्रच्युतो विप्रः प्राप्नोति परमां गतिम् Ms. 12. 116.

अप्रज *a.* 1 Without progeny, childless; अप्रजाः सन्तु अत्रिणः Rv. 1. 21. 5 शौच्यं मैथुनमप्रजम् Chāṇ. 57. अप्रजः सुप्रजतमो Bhāg. 4. 23. 33. -2 Unborn. -3 Unpeopled. -जा Having no child, not giving birth to children, not prolific.

अप्रजस्, अप्रजात *a.* Childless, having no issue or progeny; अतीतायामप्रजसि बान्धवास्तदवाप्नुयुः Y. 2. 144. -ता A woman who has borne no child, a barren woman.

अप्रजज्ञि *a.* Ved. 1 Inexperienced, unskilful. -2 Childless.

अप्रज्ञात *a.* Not known, अतीन्द्रिय; आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् Ms. 1. 5.

अप्रणीत *a.* Unconsecrated, vulgar, profane. -तम् Frying clarified butter without consecrated water.

अप्रतर्क्य *a.* Incomprehensible by reason or inference, undefinable.

अप्रता *a.* Ved. Very great or extensive, affluent; न सोमो अप्रता पपे Rv. 8. 32. 16.

अप्रतापः 1 Want of lustre, dullness, dimness. -2 Meanness, want of dignity.

अप्रति *a.* Ved. 1 Without opponents or foes, irresistible; य एक इदप्रतिर्मन्यमानः Rv. 5. 32. 3; °वीर्य of irresistible prowess. -2 Unsurpassed, unequalled. -*adv.* Irresistibly तदुग्रवेगं दिशि दिश्युपर्यधो विसर्पदुत्सर्पदसह्यमप्रति Bhāg. 8. 7. 19.

अप्रतिकर *a.* Trusting, trusty, confidential.

अप्रतिकर्मन् *a.* 1 Of unequalled deeds or achievements. -2 Irresistible, irremediable.

अप्रति(ती)कार *a.* Irremediable, helpless, that cannot be remedied or helped; °रेयमापदुपस्थिता K. 154. -रः Not remedying, non-requital, non-retaliation. यदि मामप्रतीकारम् । Bg. 1. 46.

अप्रतिगृह्य *a.* One from whom one must not accept any thing as a gift &c.

अप्रतिग्राहक *a.* Not accepting.

अप्रतिग्राह्य *a.* Unacceptable.

अप्रतिघ *a.* 1 Not to be vanquished, invincible. -2 Not to be warded or kept off; यत्तु दुःखसमायुक्तमप्रीतिकरमात्मनः । तद्रजोऽप्रतिपं (घं) विद्यान् Ms. 12. 28. -3 Not angry.

अप्रतिद्वन्द्व *a.* 1 Having no adversary in battle, irresistible. -2 Unsurpassed, unrivalled.

अप्रतिधुर *a.* Without the fellow-horse.

अप्रतिपक्ष *a.* 1 Without a rival or opponent. -2 Unlike.

अप्रतिपत्तिः *f.* 1 Non-performance, non-acceptance. -2 Neglect, omission, disregard. -3 Want of understanding. -4 Absence of determination (what to do), perplexity; °विह्वल &c. K. 159; (अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः); °त्तिसाध्वसजडा K. 240; ययुः क्षणादप्रतिपत्तिमूढताम् Ki. 14. 43. -5 (Hence) absence of mind or ready wit (स्फूर्त्यभाव); उत्तरस्याप्रतिपत्तिरप्रतिभा Gaut. S.

अप्रतिपद् *a.* Not going (विकल).

अप्रतिबन्ध *a.* 1 Unimpeded, unobstructed. -2 Direct, undisputed; (in law) got by birth without any obstruction, not collateral (as inheritance).

अप्रतिबल *a.* of irresistible might, of unequalled power.

अप्रतिभ *a.* 1 Modest, bashful. -2 Not ready-witted, dull. -भा Bashfulness, modesty.

अप्रतिभट *a.* Unrivalled. -टः An unrivalled warrior; आत्मानं °टं मन्यमानः Dk. 3.

अप्रतिम -मान *a.* 1 Without an equal or parallel, incomparable, matchless, unrivalled; त्वं ह त्यदप्रतिमानमोजो Rv. 8. 96. 17. रामस्य परयाप्रतिमानमोजः Mv. 1. 62; °रूपत्वम्; °वीर्य, °बुद्धि &c. -2 Improper; तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः Rām. 6. 12. 35.

अप्रतिमानुष *a.* Extra-ordinary; Mb.

अप्रतियत्नः Natural or spontaneous state.

अप्रतियोगिन् *a.* 1 Without an adversary. -2 Having no opposite or counterpart.

अप्रतिरथ *a.* or -थः (A hero) who has no प्रतिरथ or rival warrior, a matchless or unrivalled warrior; दौष्यंतिमप्रतिरथं तनयं निवेश्य Ś. 4. 20, Ś. 7, 7. 33. -2 Matchless; अप्रतिहतैस्तेजोभिः एवैकस्य योग्यता Mv. 1. 46. -थः N. of a Ṛiṣi (Composer of the hymn Rv. 10. 103); N. of a son of Rantināra. -थः, -थम् N. of a hymn composed by अ°; यथात्रामग्रत्लं साम तदप्रतिरथं विदुः.

अप्रतिरव *a.* Uncontested, undisputed; वर्षशताधिकभोगः सन्ततोऽप्रतिरवः स्वत्वं गमयति Mita.

अप्रतिरूप *a.* 1 Not corresponding with, unfit; वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि Rām. 3. 45. 29. -2 Of unequalled form. -3 Incomparable (in a good or bad sense). -Comp. -कथा incomparable talk (संगणिका), उत्तरवाक्यरहिता वाक्. -वीर्यम् irresistible power.

अप्रतिवीर्य *a.* Of incomparable prowess.

अप्रतिशासन *a.* Having no rival ruler, subject to one rule; कृतवानप्रतिशासनं जगत् R. 8. 27.

अप्रतिषेधः A meaningless prohibition, an invalid objection.

अप्रतिष्ठ *a* 1 Not stable or firmly fixed, fluctuating, not made permanent; अप्रतिष्ठे रघुज्येष्ठे का प्रतिष्ठा कुलस्य नः U. 5. 25. -2 Thrown away, unprofitable, useless; अप्रतिष्ठं तु वार्धुषौ Ms. 3. 180. -3 Disreputable, infamous. -4 Without support, adjustment; असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् Bg. 16. 8. -ष्ठः N. of a hell. -ष्ठा Instability, ill-fame, ill-repute, dishonour. -ष्ठम् Brahman (स्वधामप्रतिष्ठितं ब्रह्म).

अप्रतिष्ठान *a.* Ved. Not firm, having no solid ground. Av. 11. 3. 49. -नम् Instability, want of solidity or firmness (fig. also); तर्काप्रतिष्ठानादप्यन्यथानुमेयम् Ś. B.

अप्रतिष्ठित *a.* Unsettled, unfixed, uncelebrated, obscure; unconsecrated, unholy. -तः An epithet of Viṣṇu

अप्रतिसंक्रम *a.* Having no intermixture.

अप्रतिसंख्य *a.* Unobserved, unnoticed; °आख्य (ख्या)-निरोधः unobserved nullity, annihilation of an object;

one of the three topics included by the Buddhas under the category of निरूप, the other two being प्रतिसंख्यानिरोध wilful destruction, as of a jar by a mallet, and आकाश the ethereal element.

अप्रतिहत *a.* 1 Not obstructed or impeded, irresistible; °हतान् पुत्रान् K. 62; अस्मद्गृहे °गतिः Pt. 1 free to move; तोयस्येवाप्रतिहतरयः U. 3. 36; जृम्भतामप्रतिहतप्रसरमार्यस्य क्रोधज्योतिः Ve. 1. -2 Unimpaired, unmarred, unrepulsed, unaffected, at home in every respect; सा बुद्धिरप्रतिहता Bh. 2. 40; Pt. 5. 26; so °चित्त, °मनस्. -3 Not disappointed. -4 A kind of deity; अपराजित-अप्रतिहत-जयन्त-वैजयन्त-कोष्ठकान्... पुरमध्ये कारयेत् Kau. A. 2. 4. -Comp. -नेत्र *a.* of unimpaired eyes. (-त्रः) N. of a Buddhist deity.

अप्रतीक *a.* Without parts or body, epithet of Brahman.

अप्रतीत *a.* 1 Not pleased or delighted; को न्वनेनाप्रतीतेन (संप्रीयेत) Rām. 2. 48. 20. -2 Unapproached; unassailable. Av. 7. 25. 1. -3 Unopposed. -4 (In Rhet.) Not understood or clearly intelligible (as a word), one of the defects of a word (शब्ददोष); अप्रतीतं यत्केवले शास्त्रे प्रसिद्धम् K. P. 7, *i. e.* a word is said to be अप्रतीत if it be used in a sense which it has in particular classes of works only (and not in general or popular use); *e. g.* सम्यग्ज्ञानमहाज्योतिर्दलिताशयताजुषः (where आशय = वासना occurs in Yogaśāstra only).

अप्रतीतिः *f.* Unintelligibleness; mistrust.

अप्रतुलः 1 Want of weight. -2 Want, necessity.

अप्रत्त (°प्रदत्त) Not given away. -त्ता A girl, one not given away in marriage.

अप्रत्यक्ष *a.* 1 Invisible, imperceptible. -2 Unknown. -3 Absent. -Comp. -शिष्ट *a.* not distinctly taught.

अप्रत्यय *a.* 1 Diffident, distrustful (with loc.); बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः Ś. 1. 2. -2 Having no knowledge. -3 (In gram.) Having no affix. -यः 1 Diffidence, distrust, disbelief, doubt; क्षेत्रमप्रत्ययानाम् Pt. 1. 191. -2 Not being understood. -3 Not an affix; अर्थवदधातुरप्रत्ययः प्रातिपदिकम् P. I. 2. 45. -Comp. -स्थ *a.* (in gram.) not pertaining to an affix.

अप्रत्यृत *a.* Not attacked.

अप्रदक्षिणम् *ind.* 1 From the left to the right. -2 unfavourable; निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः। तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम्॥ Rām. 6. 104. 17.

अप्रदुग्ध *a.* Ved. Not milked completely. आ धेनवो अप्रदुग्धाः Rv. 3. 55. 16.

अप्रधान *a.* Subordinate, secondary, inferior; आवां तावदप्रधानौ H. 2. -नम् (°ता, °त्वम्) 1 Subordinate or secondary state, inferiority. -2 A secondary or subordinate act. (The word अप्रधान usually occurs in the neuter gender either by itself, or as an attribute to a noun, or as last member of comp.)

अप्रधृष्य *a.* Unconquerable, invincible; यदाश्रौषं भीष्ममत्यंतशूरं हतं पार्थेनाहवेष्वप्रधृष्यम् Mb.; यस्याप्रधृष्यः प्रभवस्त्वमुच्चैः M. 5. 17.

अप्रपदनम् Ved. A bad place of refuge.

अप्रभ *a.* 1 Obscure, dull. -2 Mean.

अप्रभु *a.* 1 Wanting power, not powerful. -2 Having no power or control over, unable, incompetent; with gen. or loc.; आशताऽऽक्रान्तमेव पदात्यप्रभुः Rv. 9. 73. 9.

अप्रभूतिः *f.* Little effort.

अप्रमत्त *a.* Not careless or inattentive, careful, attentive, vigilant, watchful; अप्रमत्तो बले कोशे दुर्गे जनपदे तथा (भवेथाः) Rām. 2. 52. 72; 3. 33. 20; युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः Ms. 7. 142.

अप्रमद *a.* Devoid of festivities, sad, joyless; Bk. 10. 9.

अप्रमाद *a.* Careful, vigilant, cautious, steady. -दः Care, attention, vigilance. -दम् *ind.* Carefully, attentively, uninterruptedly. -ता The state of being cautious; शौचाक्रोधाप्रमादता Y. 3. 313. -दिन् *a.* careful; तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने Ms. 2. 115.

अप्रमय *a.* Imperishable; unlimited (अप्रमेय).

अप्रमा Incorrect knowledge (opp. प्रमा q. v.).

अप्रमाण *a.* 1 Unlimited, immeasurable, boundless. -2 Without authority, proof or weight, unauthorized. -3 Not regarded as an authority, not trustworthy; आजन्मनः शाठ्यमशिक्षितो यस्तस्याप्रमाणं वचनं जनस्य Ś. 5. 25. -णम् 1 That which cannot be taken as authority in actions; *i. e.* a rule, direction &c. which cannot be accepted as obligatory. -2 Irrelevancy. -Comp. -आभः, -शुभः (pl.) 'of unlimited lustre', N. of a class of deities (with Buddhists). -विद् *a.* not conversant with evidence, or incapable of weighing evidence.

अप्रमायुक *a.* [प्र-मि-उण् आत्वे युच्, स्वार्थे कन् Tv.] Not dying suddenly, very long.

अप्रमित *a.* 1 Not measured, unlimited. -2 Not proved or established by authority.

अप्रमूर, Ved. **अप्रमूर्च्छित** *a.* Not foolish, prudent, wise; ते अप्रमूरा महोभिः Rv. 1. 90. 2.

अप्रमृष्य *a.* Indestructible, unassailable (अबाध्य); सुदामन् तद् रेक्णो अप्रमृष्यम् Rv. 6. 20. 7.

अप्रमेय *a.* 1 Immeasurable, unbounded, boundless; °महिमा; येषां वेद इवाप्रमेयमहिमा धर्मे वसिष्ठो गुरुः Mv. 4. 30. -2 That which cannot be properly ascertained, understood &c.; inscrutable, unfathomable (of person or thing);

अचिन्त्यस्याप्रमेयस्य कार्यतत्त्वार्थवित्प्रभुः Ms. 1.3; 12.94. -3 Not to be proved or demonstrated (as Brahman). -यम् Brahman. -Comp. -अनुभाव *a.* of unlimited might. -आत्मन् 'of inscrutable spirit' epithet of Śiva.

अप्रमोदः, -दम् 1 Inability to remove pain. -2 Absence of delight.

अप्रयत्न *a.* Not energetic or diligent, indifferent, apathetic, not zealously devoted to (with loc.); °त्नः सुखार्थेषु Ms. 6.26. -त्नः Absence of effort or exertion, indifference, apathy, laziness.

अप्रयाणिः *f.* [अ-प्रया-अनि P. III. 3. 112, न changed to ण by P. VIII. 4. 29] Not going or progressing (used only in uttering imprecations); अप्रयाणिस्ते शठ भूयात् Sk. mayest thou not move onward or progress! See अजीवनि.

अप्रयापणि -निः *f.* Not allowing to go on or progress आक्रोशे नञ्यनिः (P. III. 3. 112; VIII. 4. 30).

अप्रयावम् *adv.* Without interruption, attentively.

अप्रयुच्छत्, अप्रयुत, अप्रयुत्वन् *a.* Ved. Unceasing, continual, not separated (अपृथग्भूत); careful, attentive.

अप्रयुक्त *a.* 1 Not used or employed, not applied. -2 Wrongly used, as a word. -3 (In Rhet.) Rare, unusual (as a word when used in a particular sense or gender though that sense or gender be sanctioned by lexicographers); अप्रयुक्तं तथाम्नातमपि कविभिर्नादृतम्; तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा। where the mas. gender of दैवत, though sanctioned (by Amara), is not used by poets and is, therefore, अप्रयुक्त. सन्त्यप्रयुक्ताः Mbh.

अप्रयोगः Non-application or bad application, non-employment. अप्रयोगः प्रयोगान्यत्वात् Mbh. 1. 1. 1.

अप्रलम्ब *a.* Prompt, quick.

अप्रवर्तक, अप्रवर्तिन् *a.* 1 Not exciting or stimulating to action, inert, abstaining from action; पूर्णमप्रवर्तीति वा अहमेतमुपास इति Bri. Up. 2. 1. 5. -2 Continuous, unbroken, uninterrupted.

अप्रवर्तनम् Not engaging in, not exciting to any action.

अप्रवृत्त *a.* 1 Not acting, not engaged in. -2 Not instigated. -3 Not proper; अप्रवृत्तं सुदुर्बुद्धे यस्मादेतत्त्वया कृतम् Mb. 5. 192. 47.

अप्रवृत्तिः *f.* 1 Not engaging in action or proceeding, not taking place. -2 Inertia, inactivity, non-excitement, absence of incentive or stimulus. -3 (In medic.) Suppression of the natural evacuations, constipation ischuria &c.

अप्रवीत *a.* Ved. Not approached; यदप्रवीता दधते ह गर्भम् Rv. 4. 7. 9. -ता 1 Not loved (अकामिता). -2 Not impregnated.

अप्रवेद *a.* Difficult to be found.

अप्रशस्त *a.* 1 Not praiseworthy, worthless, contemptible. -2 Not approved, forbidden. -3 (Ved.) Disobedient. -4 Less, deficient, decayed (क्षीण)

अप्रसक्त *a.* 1 Not attached or addicted, moderate, temperate. -2 Unconnected. -3 unobstructed; विवेश गां तोयमिवाप्रसक्ता Mb. 9. 17. 50.

अप्रसक्तिः *f.* Non-attachment, moderation. विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः Ms. 1. 89.

अप्रसङ्गः 1 Want of attachment. -2 Want of connection. -3 Inopportune time or occasion; अप्रसङ्गाभिधाने च श्रोतुः श्रद्धा न जायते।

अप्रसन्न *a.* 1 Not pleased. -2 Turbid, muddy. -न्नम् The milk of a cow milked after the 7th day of delivery. Nigh.

अप्रसादः Disfavour, displeasure.

अप्रसव *a.* Not being prolific. -वः Not being born.

अप्रसूत *a.* Barren, childless.

अप्रसहिष्णु *a.* quite unable (to); जगत्प्रभोरप्रसहिष्णु वैष्णवम् (चक्रम्) Ku. 1. 54.

अप्रसाह *a.* Not being affected by evils or ill omens; Ch. Up.

अप्रसिद्ध *a.* 1 Unknown, unimportant, insignificant अप्यप्रसिद्धं यशसे हि पुंसाम् Ku. 3. 19. -2 Unusual, uncommon; °पदम् an obsolete word.

अप्रसिद्धिः *f.* Obscurity, insignificance.

अप्रस्ताविक *a.* (-की *f.*) Not belonging to the subject-matter, irrelevant (= अप्रास्ताविक q. v.); Māl.

अप्रस्तुत *a.* 1 Uusuitable to the time or subject, not to the point, irrelevant. -2 Absurd, nonsensical; रे गोरम्भ किमप्रस्तुतं लपसि Pt. 1. -3 Accidental or extraneous. -4 Not ready. -Comp. -प्रशंसा a figure of speech which, by describing the अप्रस्तुत (what is not the subject-matter) conveys a reference to the प्रस्तुत or subject-matter; अप्रस्तुतप्रशंसा सा या सैव प्रस्तुताश्रया K. P. 10. It is of 5 kinds:- कार्ये निमित्ते सामान्ये विशेषे प्रस्तुते सति। तदन्यस्य वचस्तुल्ये तुल्यस्येति च पञ्चधा॥ *i. e.* when the subiect-matter is viewed (*a*) as an effect, information of which is conveyed by stating the cause; (*b*) when viewed as a cause by stating the effect; (*c*) when viewed as a general assertion by stating a particular instance; (*d*) when viewed as a particular instance by stating a general assertion; and (*e*) when viewed as similar by stating what is similar to it, See K. P. 10 and S. D. 706 for examples.

अप्रहत *a.* 1 Unhurt, intact. -2 Waste, unploughed, K. 326. -3 New and unbleached (as cloth); ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम्। निर्णेजकाक्षालितं चाप्रहतं वास उच्यते॥.

अप्रहन् *a.* Not destroying, favouring, aiding (अनुग्राहक) त्यमूं वो अप्रहनं गृणीषे Rv. 6. 44. 4.

अप्रहित *a.* 1 Not sent out; Av. 6. 29. 2. -2 Unattacked by foes. -3 Not stirred up, इन ऊती वो अजरं प्रहेतारमप्रहितम् Rv. 8. 99. 7.

अप्राकरणिक *a.* (-की *f.*) Not belonging to the subject-matter; अप्राकरणिकस्याभिधानेन प्राकरणिकस्याक्षेपोऽ प्रस्तुतप्रशंसा K. P. 10.

अप्राकृत *a.* 1 Not vulgar. -2 Not original. -3 Not ordinary, extraordinary; °आकृतीनाम् K. 174, अप्राकृतेषु पात्रेषु यत्र वीरः स्थितो रसः Mv. 1. 3. -4 Special. -5 Not belonging to प्राकृत language.

अप्राग्र्य *a.* Secondary, subordinate, inferior.

अप्राचीन *a.* 1 Modern. -2 Not eastern, western.

अप्राज्ञ *a.* Ignorant, unlearned. **-ज्ञता** Ignorance; दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः Ms. 4. 167.

अप्रादेशिक *a.* 1 Not pointing to, or suggestive of; Nir. 1. 13. -2 Non-provincial.

अप्राधान्य *a.* Subordinate.

अप्राण *a.* Lifeless; inanimate. **-णः** The Almighty Being.

अप्राप्त *a.* 1 Not obtained or got; अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः। Bhāshā P. -2 Not arrived or come, unaccomplished; अप्राप्तव्यवहारम् Y. 2. 243. -3 Not authorised or following, as a rule. -4 Not come to or reached; राघवो रथमप्राप्तां तामाशां च सुरद्विषाम् (चिच्छेद) R. 12. 96. -5 Not of a marriageable age; Ms. 9. 88. **-Comp. -काल** 1 inopportune, ill-timed, unseasonable; °लं वचनं बृहस्पतिरपि ब्रुवन्। लभते बुद्ध्यवज्ञानमपमानं च पुष्कलम् Pt. 1. 63. -2 under age. (**-लम्**) an irregular discussion (of any subject). **-प्रापक** *a.* 1. conveying (the sense of) what is not otherwise specified, such as the use of the Potential mood in स्वर्गकामो यजेत. -2 not yet tamed (as a young calf) **-यौवन** *a.* not arrived at puberty or who has not reached his youth; शिशुमप्राप्तयौवनम् R. 15. 42. **-व्यवहार, -वयस्** *a.* (in law) under age, not old enough to engage in public business on his own responsibility, a minor (a boy before he reaches his 16th year); अप्राप्तव्यवहारोऽसौ यावत् षोडशवार्षिकः Dakṣa.

अप्राप्तिः *f.* 1 Non-acquisition; तदप्राप्तिमहादुःखविलीनाशेषपातका K. P. 4. -2 Not being proved or established by a rule before; विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति Mīm. -3 Not taking place or occurring. -4 Not being applicable = अनुपपत्ति q. v.

अप्रामाणिक *a.* (-की *f.*) 1 Unauthoritative, unwarranted; इदं वचनमप्रामाणिकम्. -2 Untrustworthy, unreliable.

अप्रामि *a.* Ved. Unhurt, unimpaired, Rv. 8-61. 4.

अप्रायत्यम् Ved. 1 Impurity. -2 Ungovernableness.

अप्रायु *a.* Ved. Not going forth (अगन्तृ); अप्रायुवो रक्षितारो दिवेदिवे Rv. 1. 89. 1; unceasing.

अप्रायुस् *a.* Ved. With undiminished or unimpaired life or vigour; अप्रायुषे दिवातरात् Rv. 1. 127. 5.

अप्रिय *a.* 1 Disliked, disagreeable, unpleasant, offensive अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः Rām.; Ms. 4. 138; अतः समीपे परिणेतुरिष्यते तदप्रियापि प्रमदा स्वबन्धुभिः Ś. 5. 17; hated, distasteful. -2 Unkind, unfriendly. **-यः** A foe, an enemy. **-या** A sort of fish (शृङ्गीमत्स्यः). **-यम्** An unfriendly or offensive act; पाणिग्राहस्य साध्वी स्त्री......नाचरेत्किंचिदप्रियम् Ms. 5. 156. **-Comp. -कर, -कारिन्, -कारक** *a.* unfriendly, ill-disposed. **-भागिन्** *a.* ill-fated. **-वद,** (°यम्°), **-वादिन्** *a.* speaking unkind or harsh words; वन्ध्यार्थघ्न्यप्रियंवदा Y. 1. 73; माता यस्य गृहे नास्ति भार्या चाप्रियवादिनी Chāṇ. 44.

अप्रीतिः *f.* 1 Dislike, aversion. -2 Unfriendly feeling, enmity. -3 Pain. **-Comp. -कर** (-री *f.*). 1 unkind; unfavourable. -2 disagreeable, disliked.

अप्रेतराक्षसी = अपेतराक्षसी q. v.

अप्रेमन् *a.* Disliking, unfriendly. *n.* Dislike.

अप्रोक्षित *a.* Not sprinkled, not consecrated.

अप्रोटः A kind of bird (Mar. कुकुडकुंभा).

अप्रौढ *a.* 1 Not arrogant. -2 Timid, gentle, not bold. -3 Not full-grown. **-ढा** 1 An unmarried girl. -2 A girl very recently married and not arrived at puberty or womanhood.

अप्लव *a.* 1 Without a ship, Av. 19. 50. 31. -2 Not swimming.

अप्लुत *a.* Not protracted (as a vowel).

अप्व *a.* [आप् बाहु° व, पृषो° ह्रस्वः] Attainable. **-प्वा** Disease, danger; गृहाणाङ्गान्यप्वे परेहि Rv. 10. 103. 12. the region of the throat or neck. (?)

अप्सः, -प्सा *m.* (-प्साः) Ved. [अपःसनोति, सन्-ड] 1 Giving or yielding water; forming the essential portion of water (अपां सारभूतो रसः). -2 not destroying. **-प्सम्** Form, see अप्सस्.

अप्सरः [अप्-सृ-अच्] Any aquatic animal (moving in water).

अप्सरस् *f.* (-राः, -रा). [अद्भ्यः सरंन्ति उद्गच्छन्ति, सृ-असुन् Uṇ. 4. 236; cf. Rām. अप्सु निर्मथनादेव रसात्तस्माद्वरस्त्रियः। उत्पेतुर्मनुजश्रेष्ठ तस्मादप्सरसोऽभवन्॥ A class of female divinities or celestial damsels who reside in the sky and are regarded as the wives of the Gandharvas. They are very fond of bathing, can change their shapes, and are endowed with superhuman power (प्रभाव).

They are called स्वर्वेश्याः and are usually described as the servants of Indra, who, when alarmed by the rigorous austerities of some mighty sage, sends down one of them to disturb his penance, and her mission is generally successful; मेनकाऽप्सरसां श्रेष्ठा महर्षीणां पिता च ते Mb. 1. 74. 75. cf. या तपोविशेषपरिशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य V. 1. They are also said to covet heroes who die gloriously on the battle-field; cf. परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समकालमेव । अमर्त्यभावेऽपि कयोश्चिदासीदेकाप्सरः प्रार्थितयोर्विवादः ॥ R. 7. 53. Bāṇa mentions 14 different families of these nymphs (see K. 136) The word is usually said to be in pl. (स्त्रियां बहुष्वप्सरसः) but the singular, as also the form अप्सरा, sometimes occurs; नियमविघ्नकारिणी मेनका नाम अप्सराः प्रेषिता Ś. 1; एकाप्सरः &c. R. 7. 53 and see Malli. thereon; अनप्सरेव प्रतिभासि V. 1. –2 Direction or the intermediate point of the compass (दिक् च उपदिक् च). –Comp. –तीर्थम् N. of a sacred pool in which the Apsarasas bathe; probably it is the name of a place, see Ś. 6. –पतिः lord of the Apsarasas, epithet of Indra. N. of the Gandharva शिखण्डिन्; Av. 4. 37. 7.

अप्सव *a.* [अप्सं जलरसं वाति हिनस्ति, वा-क] Devoid of the essence (freshness) of water; –2 possessed of form or shape; giving water (?).

अप्सव्य *a.* [अप्सु भवः यत्] Being in, or fit for, water.

अप्सस् *n.* Ved. Form, beauty; or one possessed of beauty; cheek (?). उषा हस्नेव नि रिणीते अप्सः Rv. 1. 124. 6.

अप्सु *a.* [नास्ति प्सु रूपं यस्य Nir.] 1 Formless, shapeless. –2 Not beautiful. Note :–अप्सु forms the first member of several compounds. –क्षित् a god (dwelling within the clouds); अप्सुक्षितो महिनैकादश स्थ Rv. 1. 139. 11. –चर *a.* aquatic; moving in waters. P. VI. 3. 1. –ज, –जा *a.* born in the waters or in the atmosphere; यदमे दिविजा अस्यप्सुजा वा सहस्कृत Rv. 8. 43. 28. (–जाः) –योनिः 1 a horse. –2 a cane or reed. –जित् vanquishing the aerial Asuras. –मत् *a.* possessed of what is in water; not losing one's nature in water (as lightning); getting sufficient water. –योनि *a.* born from the waters.

अफल *a.* [न. ब.] 1 Unfruitful, fruitless, barren (lit. & fig.); याः फलिनीर्या अफलाः Rv. 10. 97. 15. °ला ओषधयः, °लं कार्यम् &c. –2 Unproductive, useless, vain; यथा षण्ढोऽफलः स्त्रीषु यथा गौर्गवि चाफला । यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः Ms. 2. 158. –3 Deprived of virility, castrated; emasculated; अफलोऽहं कृतस्तेन क्रोधात्सा च निराकृता Rām. 1. 49. 3. –लः 1 N. of a plant (Mar. झावुक) Tamarix Indica –2 A goat. –ला The Aloe plant (Mar. घृतकुमारी कोरफड); another plant (Mar. भूम्यामलकी). –Comp. –आकाङ्क्षिन्, –प्रेप्सु *a.* one who desires no reward (for his labours), disinterested; अफलाकाङ्क्षिभिर्यज्ञः क्रियते ब्रह्मवादिभिः Mb.

अफल्गु *a.* Productive, profitable; तरीषु तत्रत्यमफल्गु भाण्डम् Śi. 3. 76.

अफेन *a.* Frothless, without scum or foam. –नम् Opium (perhaps a corruption of अहिफेन; अ has here a depreciative force).

अब = अम्ब q. v.

अबद्ध, –द्धक *a.* 1 At liberty; not bound or restrained. –2 Unmeaning, nonsensical, absurd, contradictory; *e. g.* यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता । माता तु मम वन्ध्यासीदपुत्रश्च पितामहः ॥ (contradictory); जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि (v. l. मत्तकानि) । तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नगर्यां लवणस्य कोऽर्घः ॥ Rāyamukuṭa on Ak. –द्धः Improper, impossible thing; नापथ्यायैन स्पृहयेन्नाबद्धं चिन्तयेदसत् Mb. 12. 215. 9. –Comp. –मुख *a.* foulmouthed, abusive, scurrilous.

अबद्धवत् *a.* Unmeaning, ungrammatical; यस्मिन्प्रतिश्लोकमबद्धवत्यपि Bhāg. 1. 5. 11.

अबध –ध्य See अवध–ध्य &c.

अबधा *f.* Segment of the basis of a triangle. See अबाधा.

अबन्धक *a.* 1 Not binding. –2 Without any pledge.

अबन्धन *a.* Free, without bonds.

अबन्ध्र *a.* Ved. Without ligatures; falling asunder.

अबन्धु, –बान्धव *a.* 1 Friendless, lonely. त्वमेताञ्जनराज्ञो द्विर्दशाऽबन्धुना सुश्रवसोपजग्मुषः Rv. 1. 53. 9 –2 Unowned. –Comp. –कृत् *a.* causing want of companions. –कृत *a.* not brought about by relatives, growing spontaneously; त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् Ś. 4. 16.

अबल *a.* 1 Weak, feeble, unprotected. –लः N. of a plant Crataeva Roxburghii (वरुणवृक्ष) (Mar. वायवर्णी) –ला 1 A woman (as belonging to the weaker sex); नूनं हि ते कविवरा विपरीतबोधा ये नित्यमाहुरबला इति कामिनीनाम् । याभिर्विलोलतरतारकदृष्टिपातैः शक्रादयोऽपि विजितास्त्वबलाः कथं ताः ॥ Bh. 1. 10; compare also :–हृदये वहसि गिरीन्द्रौ त्रिभुवनजयिनी कटाक्षेण । अबला त्वं यदि मन्ये के बलवन्तो न जानीमः ॥Udb. °जनः *a.* woman; इष्टप्रवासजनितान्यबलाजनस्य दुःखानि...Ś. 4. 3; R. 9. 46. –2 One of the ten earths according to the Buddhists. –लम् Weakness, want of strength; see बलाबलम् also. –Comp. –अबलः N. of Śiva.

अबलास *a.* Not consumptive; Av. 8. 2. 18.

अबल्यम् 1 Weakness. स यत्रायमात्माऽबल्यं न्येत्य संमोहमिव Bṛi. Up. 4. 4. 1. –2 Sickness.

अबाध *a.* Unrestrained, unobstructed. –2 Free from pain. –धा The segment of the base of a triangle. –धः 1 Non-obstruction. –2 Non-refutation.

अबाधित *a.* Unimpeded, unrestricted, unrefuted; सहुरिः स्त्रमबाधितः Rv. 10. 92. 8.

अबाल, –अबालिश *a.* 1 Not childish, youth; Nir. IX. 10. –2 Not young, full (as the moon).

अबाह्य *a.* 1 Not exterior, internal; गाङ्गः शिवं सावरजस्य भूयादित्याशशंसे करणैरबाह्यैः R. 14. 50; -2 (fig.) Familiar or intimately acquainted with, conversant with; गीतनृत्यवाद्यादिष्वबाह्यः Dk. 155. -3 Without an exterior; तदेतद् ब्रह्मापूर्वमनपरमनन्तरमबाह्यम् Bri. Up. 2. 5. 19.

अबिन्धनः [आपः एव इन्धनं यस्य] The submarine fire (that feeds on the waters of the ocean); अबिन्धनं वह्निमसौ बिभर्ति R. 13. 4.

अबिभीवस् *a.* Ved. Fearless; इन्द्रेण सं हि दृक्षसे सञ्जग्मानो अबिभ्युषा Rv. 1. 6. 7.

अबीज (-जक) *a.* 1 Impotent, seedless; Ms. 9. 79. -2 Causeless; -जः Victory over the mind; -जा a kind of grape (Mar. बेदाणा) -जम् An unproductive seed; अबीजविक्रयी Ms. 9. 291.

अबुद्ध *a.* Foolish, unwise; अपवादमात्रमबुद्धानाम् Sān. S. -द्धः The individual soul (जीवात्मा); अथ बुद्धमथाबुद्धमिमं गुणनिधिं शृणु Mb. 12. 308. -द्धम् 1 Inanimate, lifeless matter (जड); बुद्ध्यमानं महाप्राज्ञमबुद्धपरिवर्जनात् Mb. 12. 305. 31. -2 Ignorance (अज्ञान); एवमप्रतिबुद्धत्वादबुद्धमनुवर्तते Mb. 12. 303. 1. *ind.* Inadvertantly; न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन Rām. 2. 22. 8.

अबुद्धिः *f.* 1 Want of understanding (अविद्या); अबुद्धिरज्ञानकृता प्रबुद्धया कृष्यते मनः Mb. 12. 204. 4. -2 Ignorance, stupidity; °मत् foolish, ignorant. *a.* Ignorant, dull-witted, stupid. -Comp. -पूर्व, -पूर्वक *a.* 1 not preceded by knowledge or consciousness; not wanton or intentional. -2 beginning with non-intelligence. (-र्वम् -र्वकम्) *adv.* unconsciously, ignorantly.

अबुध् -बुध *a.* Foolish, stupid; (पुत्रस्नेहयुचातुरौ) पितरावन्वतप्येतां पुत्रयोरबुधौ बलम् Bhāg. 10. 44. 17. *m.* A fool. *f.* (अभुत्) Ignorance, want of intellect.

अबुध्य *a.* Ved. Not to be perceived or awakened.

अबोध *a.* 1 Ignorant, foolish, stupid. -2 Perplexed, puzzled. -धः 1 Ignorance, stupidity, want of understanding; °धोपहताश्चान्ये Bh. 3. 2; निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः Ki. 1. 6. -2 Not knowing or benig aware of. जलदकालमबोधकृतं दिशामप रथाप रथावयवायुधः Si. 6. 41 -Comp. -गम्य *a.* incomprehensible, inconceivable.

अबोध्य, अबोधनीय *a.* 1 Unintelligible. -2 Not to be awakened.

अबुध्न *a.* Having no bottom or root, bottomless. अबुध्ने राजा वरुणो वनस्य ऊर्ध्वं स्तूपं ददते पूतदक्षः Rv. 1. 24. 7. -ध्नम् Ved. The air or intermediate region; अभिगन्धर्वमतृणदबुध्नेषु रजःसु आ Rv. 8. 77. 5.

अब्ज *a.* [अप्सु जायते, जन्-ड] Born in or produced from water Ms. 5. 112. अब्जेषु चैव रत्नेषु 8. 100 -ब्जः 1 The conch; गाण्डीवं व्याक्षिपत्पार्थः कृष्णोऽप्यब्जमवादयत् Mb. 7. 129. 38. (*n.* also). -2 The moon. -3 Camphor. -4 N. of a tree, Barringtonia Acutangula (निचुल). -5 Dhanvantari, physician of the gods, said to be produced at the churning of the ocean along with other jewels. cf. अब्जस्तु निचुले शङ्खे पद्मे धन्वन्तरावपि । वैधेन्दोरपि ... Nm. -ब्जम् 1 A lotus. -2 One thousand millions. -Comp. -कर्णिका the seed vessel of a lotus. -जः, -भवः, -भूः, -योनिः epithets of Brahmā, (being supposed to have sprung from the lotus which arose from the navel of Viṣṇu) -कान्तः a class of ten-storeyed buildings. Māna. 28. 18. -दृश्, -नयन, -नेत्र, -लोचन &c. *a.* lotuseyed, having large beautiful eyes. -बान्धवः 'a friend of lotuses,' the sun. -भोगः 1 the root of a lotus. -2. a cowrie (वराटक) as large as a conch. -वाहनः 'carrying the moon on his forehead,' epithet of Śiva. (-ना) 'having the lotus for her seat,' N. of Lakṣmī. -स्थितः N. of Brahmā. -हस्तः the sun (represented as holding a lotus in one hand).

अब्जा *m.* (ब्जाः) Ved. Born in water (P. III. 2. 67; VI. 4. 21.) अब्जा गोजा ऋतजा अद्रिजा ऋतम् Rv. 4. 40. 5. *f.* A pearl-oyster.

अब्जिनी 1 A lotus plant. -2 A collection of lotuses. -3 A place full of lotuses. -Comp. -पतिः the sun.

अब्जस् *n.* Ved. Shape, beauty.

अब्जित् *a.* Conquering waters.

अब्द *a.* [अपो ददाति, दा-क; said in Uṇ 4. 98 to be from अब; अबतीत्यब्दः] Giving water. -ब्दः 1 A cloud. -2 A year (in this sense *n.* also) ज्योत्स्नोऽब्दं भूतशाबल्यं भुवः पङ्कमपां मलम् Bhāg. 10. 24. 34. अब्दमेकं चरेद्वृक्तः Mb. 13. 17. 74. -3 N. of a grass (मुस्ता). -4 N. of a mountain. cf...अब्दो मेघे च दर्पणे । प्रभवादौ पर्वते च ...Nm. -Comp. -अर्धम् half a year. -तन्त्रम् Name of an astronomical work. -वाहनः N. of Śiva. -शतम् a century. -सारः a kind of camphor.

अब्दया *adv.* Ved. With a desire to give water.

अब्दिः Ved. A cloud; °भृत् possessed of clouds; giving water, as a cloud.

अब्दुर्गः A fortress in water, one surrounded by a moat or lake. (Mar. जंजिरा.)

अब्देवताक, -दैवत *a.* Having the waters for divinities, praising the waters; सूक्तं वा ऽब्दैवतं जपेत् Ms. 11. 133.

अब्धिः [आपः धीयन्ते अत्र, धा-कि] 1 The ocean, receptacle of water; (fig. also) दुःख°, कार्य°, ज्ञान° &c.; store or reservoir of anything. -2 A pond, lake. -3 (In Math.) A symbolical expression for the number 7; sometimes for 4. -Comp. -अग्निः the submarine fire. -कफः, -फेनः 1 froth, foam. -2 the cuttle-fish bone, being regarded as the froth of the ocean. -ज *a.* born in the ocean. (-जः) 1 the moon. -2 The conch. -जम् Salt. (-जौ) (dual) N. of the Aśvins. (-जा) 1 spirituous liquor (produced from

the ocean). -2 the Goddess Lakṣmī. -झषः a sea-fish. -डिण्डिरः froth, foam. -द्वीपा 1 the earth. 2 a portion of land surrounded by the ocean. -नगरी N. of Dwārakā, the capital of Kriṣṇa. -नवनीतकः 1 the moon (the butter of the ocean). -मण्डूकी the pearl-oyster. -शयनः N. of Viṣṇu (so called from his resting in the ocean at the destruction and renovation of the world). -सारः a gem.

अब्बिन्दुः A tear; Bhāg.

अब्भक्ष *a.* Living upon water. अब्भक्षो मासमासीत स जापी नियतेन्द्रियः Y. 3. 285. -क्षः A serpent.

अब्भक्षणम् Living upon water, a kind of fasting.

अब्भ्र &c. = अभ्र q. v.

अब्रह्मचर्य *a.* Unchaste. -र्यम्, -र्यकम् 1 Unchastity. -2 Sexual union.

अब्रह्मण्य *a.* 1 Not fit for a Brāhmaṇa; अब्रह्मण्यमवर्णं स्यात् ब्रह्मण्यं ब्रह्मणो हितम् Halāy. -2 Inimical to Brāhmaṇas. -ण्यम् An act not befitting a Brāhmaṇa; an un-Brahmanical act. In dramas usually found as an exclamation uttered by a Brāhmaṇa in the sense of 'to the rescue', 'help', 'help', 'a horrible or disgraceful deed has been committed'; अहो °ण्यं °ण्यम् Pt. 1.; Ś.6; U. 1; अत्रान्तरे ब्राह्मणेन मृतपुत्रमारोप्य राजद्वारि सोरस्ताडनमब्रह्मण्यमुद्घोषितम् U. 2 a cry of help, or distress; अथैत्य योगनन्दस्य व्याडिना क्रन्दितं पुरः । अब्रह्मण्यमनुत्क्रान्तजीवो योगस्थितो द्विजः Bṛi. Kath.

अब्रह्मन् *a.* 1 Not accompanied by devotion; wanting in sacred or divine knowledge. -2 Separated from or devoid of Brāhmaṇas; नाब्रह्म क्षत्रमृध्नोति Ms. 9. 322. -Comp. -विद् *a.* not knowing Brahman or the Supreme Spirit.

अब्रह्मता Want of devotion; अब्रह्मता यदसन् Rv. 5.33.3.

अब्राह्मण *a.* Devoid of or without Brāhmaṇas. -णः Not a Brāhmaṇa; अब्राह्मणादध्ययनमापत्काले विधीयते । ... नाब्राह्मणे गुरौ शिष्ये । वासमात्यन्तिकं वसेत् Ms. 2. 241-2; (=शूद्र) six kinds are usually mentioned.

अब्राह्मण्यम् 1 Violation of the duties of a Brāhmaṇa; breach of vows or sanctity. -2 = अब्रह्मण्यम् q. v.

अब्रूकृतम् Making a growling (or *Abrū*) sound, an indistinct speech uttered by shutting the lips.

अब्लिङ्गम् [अपां लिङ्गं ज्ञापनसामर्थ्यं यत्र] A hymn or verse [Rv. 10. 9. 1-3. addressed to the waters;] अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत् Y. 3. 30.

अभक्त *a.* 1 Not devoted or attached. -2 Not connected with, detached. -3 Not worshipping. -4 Unaccepted. -5 Not eaten. -6 Not received as a share; यस्मै धायुरदधा मर्त्यायाभक्तम् Rv. 3. 30. 7. -क्तम् Not food; °छन्दस्, °रुच् want of appetite.

अभक्तिः *f.* 1 Want of devotion or attachment. -2 Unbelief, incredulity.

अभक्षः, -भक्षणम् Not eating anything; fasting.

अभक्ष्य *a.* 1 Not to be eaten. -2 Prohibited from eating. -क्ष्यम् A prohibited article of food.

अभग *a.* Unfortunate, ill-fated; Av. 5. 31. 11.

अभङ्ग *a.* Not broken &c. -ङ्गः 1 Absence of fracture or defeat. -2 (In Rhet.) A variety of श्लेष where another meaning is obtained without dividing the words (this corresponds to अर्थश्लेष); S. D. 644.

अभङ्गुर *a.* Undisturbed, firm.

अभद्र *a.* Inauspicious, bad, evil, ill, wicked. -द्रम् 1 Evil, sin, wickedness.-2 Sorrow.

नमुचिः [न मुञ्चति] 1 N. of a demon slain by Indra; वनमुचे नमुचेररये शिरः R. 9. 22. [When Indra conquered the Asuras, there was only one called Namuchi who strongly resisted and at last captured him. He offered to let Indra go provided he promised 'not to kill by day or by night, with wet or dry'. Indra promised to do so and was released, but he cut off Namuchi's head at twilight and with foam of water (which is neither wet nor dry). According to another version Namuchi was a friend of Indra, and once drank up his strength and made him quite imbecile. The Aśvins (and Sarasvatī also, as the story goes) then supplied Indra with a *Vajra* with which he cut off the demon's head]. -2 N. of the god of love. **-Comp. -सूदनः, -द्विष्, -हन्** *m.* epithets of Indra; विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्निशं दिवः Śi. 1. 51.

नमेरुः N. of a tree (रुद्राक्ष or सुरपुन्नाग); गणा नमेरुप्रसवावतंसाः Ku. 1. 55; 3. 43; R. 4. 74.

नय् 1 Ā. (नयते) 1 To go. -2 To protect.

नय *a.* [नी भावे अच्] 1 Leading, conducting. -2 A guide. -3 Suitable, right, proper. **-यः** 1 Guiding,

leading, managing. –2 (*a*) Behaviour, course of conduct, conduct, way of life as in दुर्नय. सितोन्नतेनैव नयेन हृत्वा कैलासशैलस्य यदग्रशोभाम् Bu. Ch. 1. 3. (*b*) Prudent or righteous conduct, virtue. नयानयौ दण्डनीत्याम् Kau. A. 1. 2. –3 Prudence, foresight, circumspection; नत् तासामुपशान्तये सुमतिभिः कार्यो विशेषान्वयः Pt. 1. 371; 3. 176. –4 Policy, political wisdom, statesmanship, civil administration, state-policy; नयप्रचारं व्यवहारदुष्टताम् Mk. 1. 7; नयगुणोपचितामिव भूपतेः सदुपकारफलां श्रियमर्थिनः R. 9. 27; नयशालिभिः Mu. 1. 22. –5 Morality, justice, rectitude, equity; चलति नयान्न जिगीषतां हि चेतः Ki. 10. 29; 2. 3; 6. 38; 16. 42. –6 A plan, design, scheme; हितैः साधुसमाचारैः शास्त्रज्ञैर्मतिशालिभिः। कथंचिन्न विकल्पन्ते विद्वद्भिश्चिन्तिता नयाः॥ Pt. 1. 339; 377; Mu. 6. 11; 7. 9. –7 A maxim, principle. –8 Course, method, manner. –9 A system, doctrine, opinion. –10 A philosophical system; वैशेषिके नये Bhāṣā P. 105. –11 N. of Viṣṇu. –12 A kind of game. –Comp. –कोविद, –ज्ञ *a.* skilled in policy, prudent. –ग *a.* behaving properly or prudently. –चक्षुस् *a.* having political foresight, wise, prudent; अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे R. 1. 55. –नेतृ *m.* a master in politics. –पीठी the board or cloth on which men are moved in play. –प्रयोगः political wisdom, statesmanship. –वादिन् *m.* a politician; Pt. 3. –विद् *m.*, –विशारदः a politician, statesman; सन्धिविग्रहिको कार्यो राज्ञा नयविशारदः Matsya P. –शास्त्रम् 1 the science of politics. –2 any work on politics or political economy. –3 a work on morality. –शालिन् *a.* just, righteous; नयशालिनि श्रिय इवाधिपतौ विरमन्ति न ज्वलितुमौषधयः Ki. 5. 24.

नयकः 1 A skilful manager. –2 One versed in policy, a statesman.

नयनम् [नी-करणे ल्युट्] 1 Leading, guiding, conducting managing. –2 Taking, bringing to or near, drawing; पापापहं स्वर्नयनं दुस्तरं पार्थिवर्षभैः Rām. 1. 14. 58. –3 Ruling, governing, polity; वाक्यैः पवित्रार्थपदैर्नयनैः प्राकृतैरपि Bhāg. 10. 50. 34. –4 Obtaining. –5 The eye. –6 Passing, spending (as time). –ना, नी The pupil of the eye. –Comp. –अञ्चलः, –अन्तः 1 the eye-corner. –2 a side-glance. –अभिराम *a.* gladdening the sight, lovely to behold. (–मः) the moon. –आमोषिन् *a.* blinding the sight, obscuring. –उत्सवः 1 a lamp. –2 delight of the eyes. –3 any lovely object. –उपान्तः the corner of the eye; नयनोपान्तविलोकितं च यत् (स्मरामि) Ku. 4. 23. –गोचर *a.* visible, within the range of sight. –चरितम् the play of the eyes, ogling. –छदः an eyelid. –जम्, –जलम्, –वारि *n.* tears; देव त्वद्वैरिनारीनयननयनजैर्निर्ममे नीरधिर्नि Sūkti. 5. 117. –पथः the range of sight. –पुटम् the cavity of the eye, eye-lid. –प्रबन्धः the outer corner of the eye. –प्रीतिः lovely sight. –प्लवः the swimming of the eyes. –बुद्बुदम् an eye-ball. –विषयः 1 any visible object; नयनविषयं जन्मन्येकः स एव महोत्सवः Māl. 1. 36. –2 the horizon. –3 the range of sight. –सलिलम् tears; तस्मिन् काले नयनसलिलं योषितां खण्डितानाम् (शान्तिं नेयम्) Me. 41.

नयनत्वम् The condition of the eyes; बाष्पजलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम् Ve. 6. 39/40.

नरः [नृ-नये-अच्] 1 A man, male person; संयोजयति विधैव नीचगापि नरं सरित्। समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम्॥ H. Pr. 5; Ms. 1. 96; 2. 213. –2 A man or piece at chess. –3 The pin of a sun-dial. –4 The Supreme Spirit, the original or eternal man. –5 Man's length (= पुरुष. q.v.). –6 N. of a primitive sage. –7 N. of Arjuna; see नरनारायण below. –8 A horse. –9 (In gram.) A personal termination. –10 The individual soul (जीवात्मा); Mb. 12. 280. 50. –Comp. –अङ्गः 1 the penis. –2 eruption on the face. –अधमः a wretch, miscreant. –अधिपः, –अधिपतिः, –ईशः, –ईश्वरः, –देवः, –पतिः, –पालः a king; नरपतिहितकर्ता द्वेष्यतां याति लोके Pt. नराणां च नराधिपम् Bg. 10. 27; Ms. 7. 13; R. 2. 75; 3. 42; 7. 62; Me. 39; Y. 1. 311. –अन्तकः death. –अयनः an epithet of Viṣṇu. नराणामयनं यस्मात् तेन नारायणः स्मृतः Brav. P. –अशः a demon, goblin. –आधारः N. of Śiva. (–रा) the earth. –इतरः 1 a being higher than a man, a god; Bhāg. 4. 6. 9. –2 an animal. –इन्द्रः 1 a king; R. 2. 18. नरेन्द्रकन्यास्तमवाप्य सत्पतिं तमोनुदं दक्षसुता इवाबभुः 3. 33; 6. 80; Ms. 9. 253. –2 a physician, dealer in antidotes, curer of poisons; तेषु कश्चिन्नरेन्द्राभिमानी तां निर्वर्ण्य Dk. 51; भुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः Śi. 2. 88 (where the word is used in both senses). °मार्गः a high street, main road. –3 a mineralogist; L. D. B. –उत्तमः 1 an epithet of Viṣṇu. –2 of Buddha. –ऋषभः 'the chief of men', a prince, king. –कपालः a man's skull. –कीलकः the murderer of a spiritual preceptor. –केश(स)रिन् *m.* 1 Viṣṇu in his fourth incarnation; cf. नरसिंह below. –2 the chief of men. –चिह्नम् the moustaches. –देवः 1 the warrior class (क्षत्रिय); शिष्ट्वा वा भूमिदेवानां नरदेवसमागमे Ms. 11. 82. –2 a king. –धिः the world. –द्विष् *m.* a demon, goblin; तेन मूर्धानमध्वंसन्नरद्विषः Bk. 15. 94. –नारायणः N. of Krisna. (–णौ dual) originally regarded as identical, but in mythology and epic poetry, considered as distinct beings, Arjuna being identified with Nara and Krisna with Nārāyaṇa. [In some places they are called देवौ, पूर्वदेवौ, ऋषी or ऋषिसत्तमौ. They are said to have been practising very austere penance on the Himālaya, which excited the fear of Indra, and he sent down several damsels to disturb their austerities. But Nārāyaṇa put all of them to shame by creating a nymph called Urvaśī from a flower placed on his thigh who excelled them in beauty; cf. स्थाने खलु नारायणमृषिं विलोभयन्त्यस्तदूरुसंभवामिमां दृष्ट्वा व्रीडिताः सर्वा अप्सरस इति. V. 1.] –पशुः 'a beast-like man', a beast in human form. –पुङ्गवः 'best of men', an excellent man; शैब्यश्च नरपुङ्गवः Bg. 1. 5. –बलिः a human sacrifice. –भुज् *a.* man-eating, cannibal. –भूः *f.* the Bharatavarsa, *i. e.* India. –मानिका, –मानिनी, –मालिनी 'manlike woman', a woman with a beard, masculine woman or an amazon. –माला a girdle of skulls. –मेधः a human sacrifice. –यन्त्रम् sun-dial. –यानम्, –रथः, –वाहनम् a

vehicle drawn by men, a palanquin; नरयानादवातीर्य Par-pal. 4. 17; Bhāg. 10. 59. 37. -लोकः 1 'the world of men', the earth, terrestrial world. -2 mankind. -वाहनः an epithet of Kubera; विजयदुन्दुभितां ययुरर्णवा घनरवा नरवाहनसंपदः R. 9. 11. -विष्वणः a demon, goblin. -वीरः a brave man, hero. -व्याघ्रः, -शार्दूलः an eminent man. -शृङ्गम् 'man's horn', an impossibility, a chimera, non-entity. -संसर्गः human society. -सखः an epithet of Nārāyaṇa; ऊरूद्भवा नरसखस्य मुनेः सुरस्त्री V. 1. 3. -सिंहः, -हरिः 'man-lion', Viṣṇu in his fourth incarnation; cf. तव करकमलवरे नखमद्भुतशृङ्गं दलितहिरण्यकशिपुतनुभृङ्गम्। केशव धृतनरहरिरूप जय जगदीश हरे॥ Gīt. 1. -सिंहद्वादशी the 12th day in the light half of फाल्गुन. -स्कन्धः a multitude or body of men. -हयम् a fight or enmity between man and horse.

नरंधिः Worldly life or existence.

नरंधिपः N. of Viṣṇu.

नराशंसः 1 A sacrifice. -2 Agni.

नरी A woman; नम्या नरीभिरमरीव हि सा विरेजे Bv. 3.16.

नर्य *a.* Ved. [नृभ्यो हितं यत्] 1 Suitable to men (as food &c.). -2 Manly, strong. -3 Human. -र्यः 1 A man. -2 Indra. -र्यौ (du.) The two objects of human desire, *i. e.* Heaven and earth. -र्यम् 1 A manly deed. -2 A gift for men.

नरकः, -कम् 1 Hell, infernal regions (corresponding to the realm of Pluto; there are said to be 21 different parts of these regions where different kinds of tortures are inflicted upon sinners तामिस्र, अन्धतामिस्र, महारौरव, रौरव, नरक, कालसूत्र, महानरक, संजीवन, महावीचि, तपन, संप्रतापन, संहात, काकोल, कुड्मल, प्रतिमूर्तिक, लोहशङ्कु, ऋजीष, पन्था, शाल्मली, असितपत्रवन, लोहदारक are the 21 Narakas; cf. Ms. 4. 88-90). -2 A liquor-vessel; नरकं मद्यभाजने Nm. -कः N. of a demon, king of Prāgjyotiṣa. [According to one account he carried off Aditi's ear-rings and Krisna at the request of the gods killed him in a single combat and recovered the jewels. According to another account, Naraka assumed the form of an elephant and carried off the daughter of Viśvakarman and outraged her. He also seized the daughters of Gandharvas, gods, men and the nymphs themselves, and collected more than 16000 damsels in his harem. These, it is related, were transferred by Kriṣṇa to his own harem after he had slain Naraka. The demon was born of earth, and hence called 'Bhauma']. -Comp. -अन्तकः, -अरिः, -जित्, -रिपुः *m.* epithets of Kriṣṇa; नरकरिपुणा सार्धं तेषां सभीमकिरीटिनाम् Ve. 3. 24. -आमयः 1 the soul after death. -2 a ghost, spirit. -आवासः an inhabitant of hell. -कुण्डम् a pit in hell where the wicked are tormented (86 such places are enumerated). -देवता 'the deity of hell', Nirriti (निर्ऋति). -रूपिन् *a.* hellish. -वासः the abode in hell. -स्था the Vaitariṇī river.

नरकायते Den. Ā. To resemble a hell.

नराचः N. of a metre of sixteen syllables; भुजङ्गराजभाषितं प्रकीर्णशास्त्रसागरे लघौ गुरौ निरन्तरे सतीह षोडशाक्षरे। प्रतापतापनिर्जितप्रभाकरप्रकाशहे प्रवृत्तवृत्तराजकं नराचमेव मन्महे॥

नारिष्यन्तः N. of Vaivasvata Manu.

नरिष्टा Ved. 1 Sport, pastime. -2 A human sacrifice.

नर्कुटकम् Nose.

नर्त *a.* [नृत्-अच्] Dancing. -र्तः Dancing, a dance.

नर्तकः [नृत्-कर्तरि ण्वुल्] 1 A dancer; sometimes a dancing preceptor. -2 An actor, mime, mummer; नाराजके जनपदे प्रहृष्टनटनर्तकाः Rām. 2. 67. 15. -3 A bard, herald. -4 An elephant. -5 A king. -6 A peacock. -7 An epithet of Śiva. -8 N. of a mixed tribe (वेश्यायां रजकाज्जातो नर्तको गायको भवेत्). -की 1 A female dancer, a singing girl, an actress; रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् Sāṅ. K. 59; Ki. 10. 41; R. 19. 14, 19. -2 A female elephant. -3 A pea-hen (Mar. लांडोर).

नर्तनः [नृत्-ल्युट्] A dancer; Mb. 12. 63. 4. -नम् Gesticulation, dancing, dance. -Comp. -गृहम्, -शाला a dancing hall. -प्रियः 1 an epithet of Śiva. -2 a peacock.

नर्तयितृ *m.* A dancing-master; अद्य नर्तयितास्मि M. 2.

नर्तित *a.* 1 Danced, made to dance. -2 Dancing, moving to and fro.

नर्तु *a.* Dancing on the edge of a sword. -*f.* A female dancer or actress.

नर्द् 1 P. (नर्दति, नर्दित) 1 To bellow, roar, sound in general; अनर्दिषुः कपिव्याघ्राः Bk. 15. 35; 15. 40; 15. 28; 17. 40. -2 To go, move.

नर्द *a.* Bellowing, roaring.

नर्दटकः N. of a metre of seventy syllables.

नर्दनम् [नर्द्-भावे ल्युट्] 1 Bellowing, roaring. -2 Celebrating, praising aloud.

नर्दित *a.* 1 Sounded, bellowed. -2 Celebrated. -तः A kind of die or a throw at dice; नर्दितदर्शितमार्गः कटेन विनिपातितो यामि Mk. 2. 8. -तम् Sound, roar, bellowing.

नर्दिन् *a.* Sounding, roaring, bellowing.

नर्द्धिः (न + ऋद्धिः) Adversity; ऋद्धिर्वाऽप्यथवा नर्द्धिः पर्यायकृतमेव तत् Mb. 12. 224. 36.

नर्ब् 1 P. (नर्बति) To go, move.

नर्मः Ved. Sport, pastime.

नर्मटः 1 A pot-sherd. -2 The sun.

नर्मठः [नर्मन्-अठन्] 1 jester. –2 A lecher, rake, libertine. –3 Sport, pastime, amusement. –4 Copulation, coition. –5 The chin. –6 The nipple.

नर्मन् *n.* [नृ-मनिन्] 1 Sport, amusement; diversion, merriment, pleasure, amorous pastime or sport; जितकमले विमले परिक्रमय नर्मजनकमलकं मुखे Gīt. 12 (कौतुकजनक); R. 19. 28. –2 Jest, joke, humour, wit; सुहृत्प्रयुक्ता इव नर्मवादाः Ki. 17. 33. नर्मप्रायाभिः कथाभिः K. 70; 'jocular, humorous'. –Comp. –आलापः a jocular conversation. –उक्तिः a facetious expression. –कीलः a husband. –गर्भ *a.* humorous, full of humour, witty. (–र्भः) 1 a secret lover. –2 an action of the hero in an unrecognizable form. –द *a.* delighting, making happy; नन्दसूनुरनघे तव वत्सो नर्मदः प्रणयिनां विजहार Bhāg. 10. 35. 20. (–दः) a jester (= नर्मसचिव q. v.). –दा N. of a river which rises in the Vindhya mountain, and falls into the gulf of Cambay. –द्युति *a.* bright with joy, cheerful, merry. (–तिः *f.*) enjoyment of a joke. –साचिवः, –सुहृद् *m.* 'a pleasure-companion', an associate of the amusements of a prince or a man of rank; न नर्मसचिवैः सार्धं किंचिदप्यप्रियं वदेत् Kām. इदं नैर्दपर्यं यदुत नृपतेर्नर्मसचिवः सुताढानामित्रं भवतु Māl. 2. 7; तां याचते नरपतेर्नर्मसुहृन्नन्दनो नृपमुखेन 1. 11; Śi. 1. 59. –साचिव्यम् 1 amusement; flattery. –2 superintendence of a prince's amusements. –स्फूर्जः (in drama) the first meeting of lovers beginning with joy but ending in alarm. –स्फोटः the first symptoms of love.

नर्मय् Deno. To entertain; Kau. A. 1. 21.

नर्मवत् *a.* Humorous, witty. –*n.* A kind of drama.

नर्मायितम् Sport, pastime.

नर्मरा 1 A valley, cavity. –2 A bellows. –3 An old woman past menstruation. –4 The plant *Sarala*.

नर्य See under नर.

नल् 1 P. (नलति) 1 To smell. –2 To bind.

नलः 1 A kind of reed; Bhāg. 1. 6. 13; एरण्डभिण्डार्कनलैः प्रभूतैरपि संचितैः । दारुकृत्यं यथा नास्ति तथैवाज्ञैः प्रयोजनम् ॥ Pt. 1. 96. –2 N. of a celebrated king of the Niṣadhas and hero of the poem called 'Naiṣadhacharita'. [Nala was a very noble-minded and virtuous king. He was chosen by Damayantī in spite of the opposition of gods, and they lived happily for some years. But Kali—who was disappointed in securing her hand—resolved to persecute Nala, and entered into his person. Thus affected he played at dice with his brother, and having lost everything, he, with his wife, was banished from the kingdom. One day, while wandering through the wilderness, he abandoned his wife, almost naked, and went away. Subsequently he was deformed by the serpent Karkoṭaka, and so deformed he entered the service of king Ṛituparṇa of Ayodhyā as a horse-groom under the name of Bāhuka. Subsequently with the assistance of the king he regained his beloved and they led a happy life; see ऋतुपर्ण and दमयन्ती also.] –3 N. of a monkey-chief, son of Viśvakarman, who, it is said, built the bridge of stones called Nalasetu or 'Adam's bridge' over which Rāma passed to Laṅkā with his army. –4 N. of a year (Nm.) –5 A measure of length (equal to 4 हस्त); वेदीमष्टनलोत्सेधाम् Mb. 7. 70. 16. –6 N. of divine being (पितृदेव). –लम् 1 A blue lotus; नलनीलमूर्तेः Śrikaṇṭhacharita 1. 33. –2 Smell, odour. –Comp. –कीलः the knee. –कूब (व) रः N. of a son of Kubera. –तूला a variety of the hides of aquatic animals; Kau. A. 2. 11. –दम् 1 a fragrant root (उशीर); Ki. 12. 50; N. 4. 116. कतकं नक्रनखरं नलदं नागकेसरम् Śiva. B. 30. 14. –2 the honey of a flower. –3 the flower of Hibiscus Rosa Sinensis (Mar. जास्वंद). –पट्टिका a sort of mat made of reeds. –मीनः a shrimp or prawn; Rām. 3. 73. 14.

नलकम् 1 Any long bone of the body; Mv. 1. 35; जङ्घानलकमुदयिनीमंजधाराः पिबन्ति Māl. 5. 17. –2 The radius of the arm. –3 A particular ornament for the nose.

नलकिनी 1 The knee-pan. –2 The leg.

नलिका 1 A tube. –2 A tubular organ of the body (नाडी). –3 A quiver. –4 A kind of fragrant substance.

नलिनः The (Indian) crane. –नम् 1 A lotus-flower, water-lily. –2 Water. –3 The Indigo plant. (नलिनेशयः an epithet of Viṣṇu.)

नलिनी 1 A lotus-plant; न पर्वताग्रे नलिनी प्ररोहति Mk. 4. 17; नलिनीदलगतजलमतितरलम् Moha M. 5; Ku. 4. 6. –2 An assemblage of lotuses. –3 A pond or place abounding in lotuses; राजन्तीं राजराजस्य नलिनीमिव सर्वतः Rām. 2. 95. 4; नलिन्यो यत्र क्रीडन्ति प्रमदाः सुरसेविताः Bhāg. 8. 15. 13. –4 A lotus or the stalk of it. –5 The celestial Ganges. –6 The intoxicating juice of the cocoa-nut. –7 A myst. –8 N. of one of the nostrils. –9 the city of Indra (शक्रपुरी); 'वस्वौकसारा श्रीदस्य शक्रस्य नलिनी पुरी' इति हरिः; Rām. 2. 94. 26. –Comp. –खण्डम्, –षण्डम् a group or assemblage of lotuses. –दलम्, –पत्रम् a leaf of the lotus plant. –रुहः an epithet of Brahmā. (–हम्) a lotus-stalk, the fibres of a lotus.

नली *f.* A kind of perfume or red arsenic.

नल्वः A measure of distance equal to 400 *hastas* or cubits. –Comp. –वर्त्मगा the orange tree.

नव *a.* 1 New, fresh, young, recent; चित्तयोनिरभवत्पुनर्नवः R. 19. 46; एते वयं पुनर्नवीकृताः स्मः Ś. 5; क्लेशः फलेन हि पुनर्नवतां विधत्ते Ku. 5. 86; U. 1. 19; R. 1. 83; 2. 47; 3. 53; 4. 3, 11; Śi. 1. 4; नववयसि Mu. 3. 3.; Śi. 3. 31; Ki. 9. 43. –2 Modern. –वः 1 A crow. –2 Praise. –3 A young monk, novice; Buddha. –वम् *-ind.* Recently, newly, lately, not long ago. –Comp. –अङ्गी a woman. नवाङ्गी कुरङ्गी दृगङ्गीकरोतु Jagannātha. –अन्नम् 1 new rice or grain.

-2 a ceremony performed on first eating the new rice. -अम्बु n. fresh water. -अहः the first day of a fortnight. -इतर a. old; न च योगविधेर्नवेतरः स्थिरधीरा परमात्मदर्शनात् (विरराम); R. 8. 22. -उद्धृतम् fresh butter. -ऊढा, -पाणिग्रहणा 1 a newly married woman, a bride; आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः H. 1. 185. Bh. 1. 4; नवपाणिग्रहणां वधूमिव (सदयं बुभुजे) R. 8, 7. -2 a kind of heroine (in dramas); "लज्जाभरपराधीनरतिर्नवोढा"; बलान्नीता पार्श्वं मुखमनुमुखं नैव कुरुते, धुनाना मूर्धानं क्षिपति वदनं चुम्बनविधौ। हृदि न्यस्तं हस्तं क्षिपति गमनारोपितमना, नवोढा वोढारं रमयति च सन्तापयति च॥ Ras. M. -कारिका, -कालिका, -फलिका 1 a woman newly married. -2 a woman in whom menstruation has recently commenced. -छात्रः a fresh student, novice, tyro. -द्वीपः N. of a place (modern Nuddea, at the confluence of भागीरथी and जलङ्गी). -नी f., -नीतम् fresh butter; अहो नवनीतकल्पहृदय आर्यपुत्रः M. 3. दुग्धोत्थं नवनीतं तु चक्षुष्यं रक्तपित्तनुत् Ayurveda. °धेनुः A cow made of butter fit to be offered to a Brahmaṇa. -नीतकम्, -नीतजम् 1 clarified butter. -2 fresh butter. -पाठकः a new teacher. -प्रसूता a woman who has lately brought forth (a child). -प्राशनम् eating of new rice. -मल्लिका, -मालिका a kind of jasmine. -यज्ञः an offering of the first fruits of the harvest. -यौवनम् fresh youth, bloom or prime of youth. (-ना) a young woman. -रजस् f. a girl who has recently menstruated. -वधूः, -वरिका 1 a newly-married girl. -2 a daughter-in-law. -वल्लभम् a kind of sandal. -वस्त्रम् new cloth. -शस्यम् the first fruits of the year's harvest. -शशिभृत् m. an epithet of Śiva; रक्षाहेतोर्नवशशिभृता वासवीनां चमूनामत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः Me. 45. -श्राद्धम् a श्राद्ध performed on odd days after death i. e. on the third, fifth, seventh, ninth, eleventh. -सारः a kind of Ayurvedic decoction; नवसारो भवेच्छुद्धश्चूर्णतोयैर्विपाचितः। दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये॥ Vaidyachandrikā. -सूतिः f., -सूतिका 1 a milch-cow. -2 a woman recently delivered.

नवता, -त्वम् Freshness, novelty; क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः Śi. 4. 17.

नवनम् The act of praising or extolling.

नवीकृ 8 U. 1 To make new, renew, revive. -2 To refresh.

नवीन, नव्य a. 1 New, fresh, recent नवीननीरदश्यामं रक्तपङ्कजलोचनम् Brav. P. 2. 16; 3. 36. -2 Modern.

नवीभावः Becoming new, renovation.

नवन् num. a. (always pl.). Nine; नवतिं नवाधिकाम् R. 3. 69; see comp. below. (At the begining of comp. नवन् drops its final न्). -Comp. -अङ्गः a kind of Ayurvedic mixture; विश्वामृताब्दभूनिम्बैः पञ्चमूलीसमन्वितैः। कृतः कषायो हन्त्याशु वातपित्तोद्भवं ज्वरम् Vaidyakam. -अशीतिः f. eighty-nine. -आर्चिस् m., -दीधितिः the planet Mars. -कपालः (नवकपालेषु संस्कृतः) a cake-offering prepared and presented on nine potsherds; Ait. Br. 1. 15; -कृत्वस् ind. nine times. -ग्रहाः m. (pl.) the nine planets. (the sun, the moon, 5 planets, राहु and केतु); see under ग्रह. -ग्व nine-fold, consisting of nine. -चण्डिका f. the nine चण्डिकाs (शैलपुत्री, ब्रह्मचारिणी, चन्द्रघण्टा, कूष्माण्डा, स्कन्दमाता, कात्यायनी, महागौरी, कालरात्रि, सिद्धिदा); Chaṇḍī Pāṭha. -चत्वारिंश a. forty-ninth. -चत्वारिंशत् f. forty-nine. -छिद्रम्, -द्वारम् the body (having nine apertures; see ख). नवद्वारे पुरे देही नैव कुर्वन् न कारयन् Bg. 5. 13. -त्रिंश a. thirty-ninth. -त्रिंशत् f. thirty-nine. -दश a. nineteenth. -दशन् (pl.) nineteen. -दुर्गा Durgā in her nine forms. i. e. (कुमारिका, त्रिमूर्ति, कल्याणी, रोहिणी, काली, चण्डिका, शांभवी, दुर्गा, भद्रा). -धातु m. Nine metals; हेमताराऽरनागाश्च ताम्ररङ्गे च तीक्ष्णकम्। कांस्यकं कान्तलोहं च धातवो नव कीर्तिताः॥ -नवतिः f. ninety-nine. -निधि m. (pl.) the nine treasures of Kubera. i. e. महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ। मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव॥ -पञ्चमम् an inauspicious combination of ग्रहs a particular type of राशिकूट; पाणिग्रहो यदि भवेन्नवपञ्चमर्क्षे सन्तानहानिमतुलां मुनयो वदन्ति Jyotistattvam. -पञ्चाश a. fifty-ninth. -पञ्चाशत् f. fifty-nine. -रत्नम् 1 the nine precious jewels; i. e. मुक्तामाणिक्यवैदूर्यगोमेदा वज्रविद्रुमौ। पद्मरागो मरकतं नीलश्चेति यथाक्रमम्॥ -2 'the nine gems' or poets at the court of king Vikramāditya:— धन्वन्तरिक्षपणकामरसिंहशङ्कुवेतालभट्टघटकर्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य॥ -रसाः m. (pl.) the nine sentiments in poetry; see under अष्टरस and रस also. -रात्रम् 1 a period of nine days. -2 the first nine days of the month of Āśvina held sacred to Durgā. -विंश a. twenty-ninth. -विंशतिः f. twenty-nine. -विध a. nine-fold, of nine kinds or sorts. °अन्नानि n. (pl.) = सूप, शाक, मिष्टान्न, जेमन (ओदनादि), उपदंश (मूलकादि), वितर्दंश (pickles etc.), सन्धान (मद्यादि), रोचन (pickled raw fruit, Mar. कोशिंबीर), व्यञ्जन (flower boiled in buttermilk etc.). -व्यूहः an epithet of Viṣṇu. -शतम् 1 one hundred and nine. -2 nine hundred. -शार्ङ्गिः m. N. of Viṣṇu or Śiva. -शक्तयः f. (pl.) nine शक्तिs i. e. प्रभा, माया, जया, सूक्ष्मा, त्रिशुद्धा, नन्दिनी, सुप्रभा, विजया, सिद्धिदा. -शायकः N. given to nine inferior tribes; they are:— गोपो माली तथा तैली तन्त्री मोदकवारुजी। कुलालः कर्मकारश्च नापितो नवशायकाः॥ Parāśara. -षष्टिः f. sixty-nine. -सप्ततिः seventy-nine. -सरः, -रम् a kind of ornament consisting of nine pearls.

नवक a. consisting of nine. -कम् The aggregate of nine.

नवत a. (-ती f.) Ninetieth. -तः 1 An elephant's painted housings. -2 A woollen cloth, blanket. -3 A cover, wrapper in general.

नवतिः f. Ninety; नवनवतिशतद्रव्यकोटीश्वरास्ते Mu. 3. 27; R. 3. 69.

नवतिका 1 Ninety. -2 A paint-brush (said to contain 90 hairs).

नवधा ind. In nine ways, ninefold.

नवम *a.* (-मी *f.*) Ninth. -मी The ninth day of a lunar fortnight.

नवशः *ind.* By nines.

नश् I. 4 P. (नश्यति, ननाश, अनशत्, नङ्क्ष्यति, नशिष्यति नष्ट; *caus.* नाशयति; *desid.* निनङ्क्षति, निनशिषति) 1 To be lost, to disappear, vanish, become invisible; ध्रुवाणि तस्य नश्यन्ति H. 1; तथा सीमा न नश्यति Ms. 8. 247; Y. 2. 58; क्षणनष्टदृष्टतिमिरम् Mk. 5. 24. -2 To be destroyed, to perish, die, be ruined; जीवनाशं ननाश च Bk. 14. 31; Ms. 8. 166; 7. 40; Mu. 6. 8. -3 To run away, fly away, escape; नश्यन्ति वृन्दानि ददर्श कपीन्द्रः Bk. 10. 12; नेशुश्चित्रा निशाचराः 14. 112; Ratn. 2. 3. -4 To be frustrated, become unsuccessful. -*Caus.* 1 To cause to disappear. -2 To destroy, remove, efface, drive away, cause to fly away. -3 To violate (as a virgin). -4 To cause to be lost, lose. -5 To forget. -6 To extinguish, put out (as fire). -II. 1 U. (नशति-ते) Ved. 1 To reach, attain. -2 To meet with, find.

नश् *f.*, **नशः, नशनम्** Destruction, perishing, loss, disappearing; प्रतीक्षन्गिरिशादेशं स्ववीर्यनशनं क्रुधः Bhāg. 10. 62. 12.

नश्यत्प्रसूतिका A woman who brings forth a dead child.

नश्वर *a.* (-री *f.*) [नश्-क्वरप्] 1 Perishable, transitory, evanescent, transient, frail; निखिलं जगदेव नश्वरम् R. G. -2 Destructive, mischievous.

नष्ट *p. p.* [नश्-क्त] 1 Lost, disappeared, vanished, invisible; गगनमिव नष्टतारम् Pt. 5. 6; 2. 167. -2 Dead, perished, destroyed. -3 Spoiled, wasted. -4 Fled or run away; नष्टं वर्षधरैर्मनुष्यगणनाभावादकृत्वा त्रपाम् Ratn. 2. 3. -5 Deprived of, free from (in comp.) -6 Depraved, corrupted, debauched. -ष्टम् 1 Destruction, loss. -2 Disappearance. -Comp. -अग्निः a householder who has lost his consecrated fire (it being extinguished). -अर्थ *a.* reduced to poverty (having lost one's wealth). -आतङ्कम् *ind.* without anxiety or fear; नष्टातङ्कं हरिणशिशवो मन्दमन्दं चरन्ति Ś. 1. 15 (v. l.). -आत्मन् *a.* deprived of sense or mind. -आसिसूत्रम् booty, plunder; -आशङ्क *a.* fearless, secure, free from fear; Ś. 1. 15. -इन्दुकला the day of new moon. -इन्द्रिय *a.* deprived of senses. -क्रिय *a.* ungrateful. -कोण *a.* devoid of angles (Mar. पैलू नसलेला); Kau. A. 2. 11. -चन्द्रः The fourth तिथि, bright and dark, of the month of Bhādrapada when it is considered inauspicious to look at the moon. -चर्या playing of hide and seek. -चेतन, -चेष्ट, -संज्ञ *a.* one who has lost his senses, unconscious, insensible, fainted. -चेष्टता universal destruction. -जन्मन् *n.*, -जातकम् subsequent calculation of a lost nativity. -दृष्टि *a.* sightless, blind. -धी *a.* unmindful, forgetful; अकरोद्दुष्ट-दोषाणां तेषामेव च नष्टधीः Raj. T. 5. 300. -बीज *a.* impotent. -रूप *a.* invisible -स्मृति *a.* forgetful.

नष्टिः *f.* Loss, destruction; रक्षःपतिः स्वबलनष्टिमवेक्ष्य रुष्टः Bhāg. 9. 10. 21.

नशाकः A kind of crow.

नस् 1 Ā. (नसते) Ved. 1 To approach, go towards. -2 To copulate. -3 To be crooked or curved, to bend.

नस् *f.* The nose (a word optionally substituted for नासिका after acc. dual); यथा गावो नसि प्रोताः Bhāg. 1. 13. 41. -Comp. -क्षुद्र *a.* small-nosed.

नसा The nose.

नस्तः The nose. -स्तम् A sternutatory, snuff. -स्ता A hole bored in the septum of the nose. -Comp. -ऊतः an ox led by a string through the nose.

नस्तस् *ind.* From the nose; Y. 3. 127.

नस्तकम् A hole bored in the septum of the nose (of cattle).

नस्तित *a.* Nozzled (with a string through the nose).

नस्य *a.* [नासिकायै हितं तत्र भवं वा यत् नसादेशः] Nasal. -स्यम् 1 The hairs in the nose. -2 A sternutatory; कुरुते मूढ एवं हि यः श्रेयो नाधिगच्छति । धूपैरञ्जनयोगैश्च नस्यकर्मभि-रेव च ॥ Mb. 12. 14. 34. -स्या 1 The nose. -2 The string through the nose of an animal; नस्यागृहीतोऽपि धुवन्विषाण-योर्युगम् Śi. 12. 10.

नह् 4 U. (नह्यति-ते, नद्ध; *desid.* निनत्सति-ते) 1 To tie, bind, bind on or round or together, gird, round; शैलेयनद्धानि शिलातलानि Ku. 1. 56; R. 4. 57; 16. 41. -2 To put on (oneself), to dress, arm oneself (Ātm). -*Caus.* To cause to put on. -*With* अप to untie. -अपि (अपि being often changed to पि) 1 to fasten, gird round, bind; अतिपिनद्धेन वल्कलेन Ś. 1; मन्दारमाला हरिणा पिनद्धा Ś. 7. 2. -2 to put on, wear; कवचं पिनह्य Bk. 3. 47. -3 to cover, envelop; कुसुममिव पिनद्धं पाण्डुपत्रोदरेण Ś. 1. 19.

नहि *ind.* Surely or certainly not, by no means, not at all; आशंसा नहि नः प्रेते जीवेम दशमूर्धनि Bk. 19. 5

नहुस् *m.* 1 A neighbour. -2 A man.

नहुषः N. of a king of the lunar race, son of Āyus and grandson of Purūravas and father of Yayāti. [He was a very wise and powerful king, and when Indra lay concealed under waters to expiate the sin of having killed the demon Vṛitra, a Brāhmaṇa, he was asked to occupy his seat. While there he thought of winning the love of Indrāṇī and caused the seven sages to convey him in a palanquin to her house. On his way he asked each of them to be quick using the words '*sarpa*', '*sarpa*', (move on, move on), when one of the sages (Agastya?) cursed him to be a '*sarpa*' (serpent). He fell down from the sky, and remained in that wretched state till he was relieved from it by Yudhiṣṭhira.]

नहुष्य *a.* Ved. Human, आदीं विश्वा नहुष्याणि जाता Rv. 9. 88. 2. **–ष्यः** A man.

ना No, not (= न q.v.).

नाक *a.* [न कम् अकं दुःखम्; तन्नास्ति यत्र नभ्राडित्यादि नि० प्रकृतिभावः] Happy, painless; तन्नाकं तद्विशोकम् Ch. Up. 2. 10. 5. **–कः** 1 Heaven; आनाकरथवर्त्मनाम् R. 1. 5; 15. 96. –2 Vault of heaven, upper sky, firmament. –3 The sun. **–Comp.** **–आपगा** the heavenly Ganges. **–ईशः**, **–ईश्वरः** N. of Indra. **–ओकस्** *m.* a god. **–चरः** 1 a god. –2 a demigod; **–नदी** the heavenly Ganges. **–नाथः**, **–नायकः** an epithet of Indra; नाकनायकनिकेतनगाप N. **–नारी** an *Apsaras*. **–पृष्ठम्** 1 the uppermost heaven. –2 the vault of heaven. **–लोकः** the heavenly world. **–वनिता** an *Apsaras*. **–सद्** *m.* 1 a god; सन्तर्पणो नाकसदां वरेण्यः Bk. 1. 4. –2 a Gandharva; शिलाघनैर्नाकसदामुरःस्थलैः Ki. 8. 32.

नाकिन् *m.* A god; Śi. 1. 45; इत्येवमुक्तः स नरेन्द्रनाकी Rām. 7. 77. 21. *–a.* Dwelling in heaven.

नाकुः 1 An ant-hill. –2 A mountain. –3 A sage. मुनिवल्मीकयोः शैले नाकुः स्यात् Nm. **–Comp.** **–सद्मन्** *m.* a snake.

नाकुली The ichneumon plant (Mar. मुंगुसवेल).

नाक्षत्र *a.* (**–त्री** *f.*) [नक्षत्राणामिदम्-अण्] Starry, sidereal. **–त्रः** an astronomer or astrologer; आह्वायका देवलका नाक्षत्रा ग्रामयाजकाः । एते ब्राह्मणचाण्डाला महापथिकपञ्चमाः ॥ Mb. 12. 76. 6. **–त्रम्** A month computed by the moon's passage through the 27 lunar mansions, a month of 30 days of six Ghaṭīs each; नाडीषष्ठ्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम् Sūrya S.

नाक्षत्रिक *a.* (**–की** *f.*) [नक्षत्रादागतः-ठञ्] Sidereal. **–कः** A month of 27 days (each day being the period of the moon's passage through a lunar asterism). **–की** The state (दशा) which a man suffers agreeably to the asterism presiding over his nativity.

नाग *a.* (**–गी** *f.*) Serpentine, formed of snakes, snaky. –2 Elephantine. **–गः** [न गच्छति इत्यगः न अगो नागः] 1 A snake in general, particularly the cobra; नासुरोऽयं न वा नागः Ki. 15. 12. –2 A fabulous serpent-demon or semi-divine being, having the face of a man and the tail of a serpent, and said to inhabit the Pātāla; अनन्तश्चास्मि नागानाम् Bg. 10. 29; R. 15. 83. –3 An elephant; दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् Me. 14, 36; Śi. 4. 63; V. 4. 25. –4 A shark. –5 A cruel or tyrannical person. –6 (At the end of comp.) Any pre-eminent or distinguished person, *e. g.* पुरुषनागः. –7 A cloud. –8 A peg projecting from a wall to hang anything upon. –9 N. of several plants as Mesua Roxburghii, Rottlera Tictoria, Piper betel; (Mar. नागचाफा, नागकेशर, पानवेल, नागरमोथा etc.); Bhāg. 8. 2. 18; Rām. 7. 42. 4. –10 One of the five vital airs of the body, that which is expelled by eructation. –11 The number 'seven'. –12 A trumpet (see नागवेला). **–गम्** 1 Tin. –2 Lead. –3 One of the astronomical periods (Karaṇas) called ध्रुव. –4 The effects of that period on anything done during it. –5 The asterism called आश्लेषा. –6 A captivating act of females (स्त्रीबन्धः), gesticulation; L. D. B. –7 A kind of coitus; Nm. **–गी** 1 A female Nāga. –2 A female elephant; **–Comp.** **–अङ्गम्** Hastināpura. **–अङ्गना** 1 a female elephant. –2 the proboscis of an elephant. **–अञ्चला**, **–अञ्जना** = **नागयष्टि** q. v. **–अञ्जना** a female elephant. **–अधिपः** an epithet of Śeṣa **–अन्तकः**, **–अरातिः**, **–अरिः** 1 an epithet of Garuḍa. –2 a peacock. –3 a lion. **–अशनः** 1 a peacock; Pt. 1. 159. –2 an epithet of Garuḍa. –3 a lion. **–आख्यः** = **नागकेसर** q. v. **–आननः** an epithet of Gaṇeśa. **–आनन्दम्** a drama by Śrīharṣa. **–आरूढ** *a.* Riding upon an elephant. **–आह्वः** Hastināpura. **–इन्द्रः** 1 a lordly or superior elephant; नागेन्द्रहस्तास्त्वचि कर्कशत्वात... कदलीविशेषाः Ku. 1 36. –2 Airāvata, Indra's elephant; कुथेन नागेन्द्रमिवेन्द्रवाहनम् Śi. –3 an epithet of Śeṣa. **–ईशः** 1 an epithet of Śeṣa. –2 N. of the author of Paribhāṣenduśekhara and several other works. –3 N. of Patañjali. **–उदम्**, **–उदरम्** 1 a breast-plate. –2 a peculiar disease of pregnancy (गर्भोपद्रवभेद). **–कन्यका**, **–कन्या** a serpent-virgin. **–कर्णः** the castor-oil plant. **–किंजल्कः** = नागकेसर q. v. **–कुमारी** Rubia Munjiṣṭa (Mar. मंजिष्ठ). **–केतुः** An epithet of Karṇa (?); समरमधिगतार्थः प्रस्थितो नागकेतुः Karṇabhāra 1. 3. **–केसरः** N. of a tree with fragrant flowers, Mesua Roxburghii; कतकं नक्रनखरं नलदं नागकेसरम् Śiva B. 30. 14. **–रम्** a kind of steel. **–गर्भम्** red lead. **–चूडः** an epithet of Śiva. **–जम्** 1 red lead. –2 tin. **–जिह्विका** red arsenic. **–जीवनम्** tin. (**–नः**) orpiment. **–दन्तः**, **–दन्तकः** 1 ivory. –2 a peg or bracket projecting from a wall and used to hang things upon; N. 18. 15. **–दन्ती** 1 a kind of sun-flower. –2 a harlot. **–द्वीपम्** N. of a द्वीप in Bharatavarṣa. **–नक्षत्रम्**, **–नायकम्** the constellation called Āśleṣā. (**–कः**) the lord of serpents; अनन्तो वासुकिः पद्मो महापद्मोऽपि तक्षकः । कर्कोटः कुलिकः शङ्ख इत्यष्टौ नागनायकाः ॥ Trikāṇḍaśeṣa. **–नामकम्** Tin. **–नामन्** *m.* holy basil (तुलसी). **–नासा** the proboscis of an elephant. **–निर्यूहः** a large pin or bracket projecting from a wall. **–पञ्चमी** 1 N. of a festival on the fifth day in the bright half of Śrāvaṇa. –2 the fifth day in the dark half of Āṣāḍha. **–पतिः** an epithet of (1) Airāvata. (2) Śeṣa. **–पदः** a mode of sexual enjoyment (रतिबन्ध). पादौ स्कन्धे तथा हस्ते क्षिपेल्लिङ्गं भगे लघु । कामयेत् कामुको नारीं बन्धो नागपदो मतः ॥ Ratimañjarī. **–पर्णी** the betel plant. **–पाशः** 1 a sort of magical noose used in battle to entangle an enemy. –2 N. of the noose or weapon of Varuṇa. **–पाशकः** a kind of coitus (रतिबन्ध). स्वजङ्घाद्वयमध्यस्थां हस्ताभ्यां धारयन् कुचौ । रमेन्निःशङ्कितो नारीं बन्धोऽयं नागपाशकः ॥ Ratimañjarī. **–पुरम्** 1 Hastināpura. –2 N. of a city in Pātāla. **–पुष्पः** 1 the Champaka tree. –2 the Punnāga tree. **–बन्धः** 1 a snake as a chain. –2 N. of a metre, resembling the coilings of a snake. **–बन्धकः**

an elephant-catcher. –बन्धुः the holy fig-tree. –बलः an epithet of Bhīma. –भूषणः an epithet of Śiva. –मण्डलिकः 1 a snake-keeper. –2 a snake-catcher. –मल्लः an epithet of Airāvata. –मारः a species of pot-herb (Mar. माका). –यष्टिः *f.*, –यष्टिका 1 a graduated pole or post for showing the depth of water in a newly-dug pond. –2 a boring-rod driven into the earth. –रक्तम्, –रेणुः red lead. –रङ्गः the orange. –राजः 1 an epithet of Śeṣa. –2 a large elephant; अधस्तान्नागराजाय सोमायोर्ध्वं दिशं ददौ Hariv. –रिपुः (see नागान्तकः) Garuḍa; शार्ङ्गचक्रायुधः खड्गी सर्वनागरिपुध्वजः Mb. 13. 147. 15. –रुकः the orange tree. –लता 1 the penis. –2 the piper betel. –वल्लरी, –वल्ली piper betel. –वेला the hour when a serpent-like instrument is blown; नागवेलायामागन्तव्य......। यस्मिन् ग्रामे न नागाः......तस्मिन्नपि स एव कालः। तत्र हि आगमनं क्रियते। ŚB. on MS. 10. 8. 69. –लोकः the world of serpents, the race of serpents collectively, one of the regions below the earth called Pātāla. –वारिकः 1 a royal elephant. –2 an elephant-driver. –3 a peacock. –4 an epithet of Garuḍa. –5 the chief of a herd of elephants. –6 the chief person in an assembly. –वीथी that part of the moon's path which contains the asterisms अश्विनी, भरणी and कृत्तिका; अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता V. P. –संभवम्, संभूतम् red lead.......मञ्जिष्ठां नागसंभवम् Śiva. B. 30. 19. –साह्वयम् Hastināpura.

नागिन् *m*. An epithet of Śiva.

नागर *a*. (–री *f*.) [नगरे भवः अण्] 1 Town-born, town-bred. –2 Relating to a town, civic. –3 Spoken in a town. –4 Polite, civil. –5 Clever, sharp. –6 Bad, vile, one who has contracted the vices of a town. नागनागरयोर्मध्ये वरं नागो न नागरः। नागो दशति कालेन नागरस्तु पुनः पुनः॥ Subhāṣita. –7 Nameless. –रः 1 A citizen (पौर); यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणामुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि Me. 25; Śānti. 4. 19; Bhāg. 10. 56. 17. –2 A husband's brother. –3 A lecturer. –4 An orange. –5 Fatigue; hardship, toil. –6 Desire of final beatitude. –7 A term applied to a prince engaged in war under certain circumstances and also to a planet when in opposition to other planets (in astrol.) –8 Denial of knowledge. –रम् 1 Dry ginger; खर्जूरं मरिचं पूर्णं देवदारु च नागरम् Śiva B. 30. 16. पिप्पली सैन्धवं चैव नागरं च गुडान्वितम्। प्रातर्दत्तं तुरङ्गाणां नस्यं श्लेष्मविनाशनम्॥ Śālihotra. –2 A kind of coitus. –3 One of the three styles of architecture; it is quadrangular in shape; चतुरस्राकृतिं यत्तु नागरं तत् प्रकीर्तितम् Māna. 18. 94. –री 1 The character in which Sanskrit is generally written; cf. देवनागरी. –2 A clever, intriguing or shrewd woman; हन्ताभीरीः स्मरतु स कथं संवृतो नागरीभिः Ud. D. 16. –3 The plant स्नुही. –Comp. –आह्वम् dry ginger.

नागरक, नागरिक *a*. [नगरे भवः वुञ्] 1 Town-bred, town-born. –2 Polite, courteous, courtly; नागरिकवृत्त्या संज्ञापयैनाम् Ś. 5; साधु आर्य नागरिकोऽसि V. 2. –3 Clever, shrewd, cunning (विदग्ध). –कः 1 A citizen. –2 A polite or courteous man, a gallant, one who shows exaggerated attention to his first mistress while he is courting some one else. –3 One who has contracted the vices of a town. –4 A thief. –5 An artist. –6 The chief of the police; V. 5; Ś. 6. –7 A city-superintendent; cf. नागरिकप्रणिधिः Kau. A. –8 A kind of coitus; ऊरुमूलोपरि स्थित्वा योषिदूरुद्वयं रमेत्। ग्रीवां धृत्वा कराभ्यां च बन्धो नागरको मतः॥ Ratimañjarī. –9 (*pl.*) planets opposite to each other. –कम् 1 Dry ginger. (–रिकम्) The toll levied from a town. –Comp. –वृत्तिः a courtly manner or style; नागरिकवृत्त्या संज्ञापयैनाम् Ś. 5. 1/2.

नागरता Cleverness, dexterity.

नागरेयक *a*. (–की *f*.) [नगर्यां भवः ठकञ्] Belonging to a town, civic.

नागरीटः, –नागवीटः 1 A libertine, rake. –2 A paramour. –3 A match-maker.

नागरुकः Orange.

नागर्यम् Shrewdness, cleverness.

नागार्जुनः N. of an ancient Buddhist teacher of the rank of बोधिसत्त्व.

नागोजीभट्टः N. of a grammarian.

नाचिकेतः 1 Fire; ततो मया नाचिकेतश्चितोऽग्निरनित्यैर्द्रव्यैः Kaṭha 1. 2. 10. –तम् N. of an उपाख्यान; नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्। उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते॥ Kaṭh. 1. 3. 16.

नाटः [नट्-घञ्] 1 Dancing, acting. –2 N. of the Karnāṭaka country.

नाटकम् [नट्-ण्वुल्] 1 A play, drama (in general). –2 The first of the 10 principal kinds of dramatic composition; for definition and other information see S. D. 277, where 36 लक्षणs of a नाटक are given. –कः An actor, a dancer; वधूनाटकसंघैश्च संयुक्तां सर्वतः पुरीम् Rām. 1. 5. 12. –की The court of Indra. –Comp. –प्रपञ्चः the arrangement of a drama. –विधिः dramatic action.

नाटकीय *a*. [नाटक–छ] Pertaining to a drama, dramatic; पूर्वरङ्गः प्रसंगाय नाटकीयस्य वस्तुना Śi. 2. 8. –या An actress or dancing girl.

नाटारः [नटपा अपत्यं आरक्] The son of an actress.

नाटिका A short or light comedy, one of the Uparūpakas, q. v.; *e. g.* the Ratnāvalī, Priyadarśikā or Viddhaśālabhañjikā. The S. D. thus defines it:— नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका। प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः॥ स्यादन्तःपुरसंबन्धा संगीतव्यापृताऽथवा। नवानुरागा कन्याऽत्र नायिका नृपवंशजा॥ संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः। देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा॥ पदे पदे मानवती तद्वशः संगमो द्वयोः। वृत्तिः स्यात् कौशिकी स्वल्पविमर्शाः संधयः पुनः॥ 539.

नाटितकम् A mimic representaion, a gesture, gesticulation; भीतिनाटितकेन S. 5.

नाटेयः, -रः [नटघा अपत्यं ढक् ढ्रक् वा] The son of an actress or dancing girl.

नाट्यम् [नटस्येदं कृत्यं ष्यञ्] 1 Dancing. -2 Dramatic representation, gesticulation, acting; नाट्ये च दक्षा वयम् Ratn. 1. 6; नूनं नाट्ये भवति च चिरं नोर्वशी गर्वशीला Vikr. 18. 29. -3 The science or art of dancing or acting, scenic art; नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् M. 1. 4. -4 The costume of an actor; न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा Bhāg. 1. 8. 19. -**ट्यः** An actor. -**Comp.** -**अङ्गानि** n. (pl.) ten अङ्ग्s of नाट्य *i. e.* गेयपद, स्थितपाठ्य, आसीन, पुष्पगण्डिका, प्रच्छेदक, त्रिगूढक, सैन्धव, द्विगूढक, उत्तमोत्तमक, उक्तप्रत्युक्त. -**आगारम्** a dancing room. -**आचार्यः** a dancing preceptor. -**उक्तिः** *f.* dramatic phraseology (as : स्वगत, प्रकाश, अपवाहित, जनान्तिक). -**धर्मिका, -धर्मी** the rules of dramatic representation. -**प्रियः** an epithet of Śiva. -**रासकम्** a kind of play consisting of one act; S. D. -**वेदः** the science of drama and dancing. -**वेदी** a stage, scene. -**शाला** 1 a dancing-hall. -2 a theatre. -**शास्त्रम्** 1 the dramatic science, dramaturgy. -2 a work on dramatic representation.

नाड = नाल q. v.

नाडिः, -डी *f.* 1 The tubular stalk of any plant. -2 The hollow stalk of a lotus &c; स इत्थमुद्वीक्ष्य तदब्जनालनाडीभिरन्तर्जलमाविवेश Bhāg. 3. 8. 19. -3 Any tubular organ of the body (such as an artery, vein); षडधिकदशनाडीचक्रमध्यस्थितात्मा Māl. 5. 1, 2. -4 A pipe, flute. -5 A fistulous sore, fistula, sinus. -6 The pulse at the hand or foot. -7 A measure of time equal to twenty-four minutes. -8 A period of time = $\frac{1}{2}$ Muhūrta. -9 A sort of bent grass. -10 A juggling trick. -11 A leather-string; L. D. B. -12 A weaver's implement; L. D. B. -**Comp.** -**चक्रम्** a group of tubular organs of the body such as : मूलाधार, स्वाधिष्ठान, मणिपुर, अनाहत, विशुद्धि, आज्ञाचक्र, सहस्राधार; Pātañjala; षडधिकदशनाडीचक्रमध्यस्थितात्मा Māl. 5. 1. -**चरणः** a bird. -**चीरम्** 1 a small reed. -2 a tube round which the woof is wound. -**जङ्घः** 1 a crow. -2 a kind of crane; नाडीजङ्घो निजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन Nag. 4. 15. -**तरङ्गः** 1 an astrologer. -2 a debaucher, ravisher. -**नक्षत्रम्** = जन्मनक्षत्र q. v. -**परीक्षा** feeling the pulse. -**पात्रम्** a kind of water-clock. -**मण्डलम्** the celestial equator. -**यन्त्रम्** any tubular instrument. -**वलयम्** equinoctical circle. -**व्रणः** sinus, an ulcer, a fistula. -**स्वेदः** steam-bath through tubes.

नाडिका 1 A tubular organ &c.; see नाडि. -2 A Ghaṭikā or 24 minutes; नाडिकाविच्छेदपटहः Māl. 7; Bhāg. 3. 11. 8; K. 13. 70; दशनाडिकाः पूर्णाः। अतिकामति स्नानवेला। Abhiṣeka 1. -3 A hollow stalk in general. -4 A fistulous sore. -5 A ray of the sun. -6 A gong (on which the hours are struck). -7 A measure of length = $\frac{1}{2}$ Daṇḍa.

नाडिं (डीं) धम *a.* Causing a movement of the tubular organs (as fright &c.); नाडिंधमेन श्वासेन K. 353; कथं नाडिंधमान् मार्गानागनौ विषमोपलान् Bk. 6. 94. -**मः** A goldsmith.

नाडिंधय *a.* Drinking or sucking through a tube.

नाडीका The wind-pipe or throat.

नाडिकेलः = नारिकेल q. v.

नाणकम् A coin, anything stamped with an impression; एषा नाणकमोषिका मकशिका Mk. 1. 23; Y. 2. 240. -**Comp.** -**परीक्षा** the testing of coin, assaying. -**परीक्षिन्** an assayer.

नातिचिर *a.* Of no long duration, not very long.

नातिदूर *a.* Not very far or distant.

नातिवादः Avoiding abusive language.

नात्रः 1 Śiva. -2 A sage. -**त्रम्** 1 Praise. -2 Surprise, wonder.

नाथ् 1 P. (नाथति, but sometimes Ā. also) 1 To ask, beg, solicit for anything (with dat. or two acc.); मोक्षाय नाथते मुनिः Vop.; नाथसे किमु पतिं न भूभृतः Ki. 13. 59; संतुष्टमिष्टानि तमिष्टदेवं नाथन्ति के नाम न लोकनाथम् N. 3. 25; वनं न यायादिति नाथमानः Bu. Ch. 2. 54. -2 To have power, be master, prevail. -3 To harass, trouble. -4 To bless, wish well to, give blessings to; (said to be Ātm. only in this sense); धृत्या नाथस्व वैदेहि ... Bk. 8. 120; नाथितशमे Mv. 1. 11; (Mammaṭa quotes the line दीनं त्वामनुनाथते कुचयुगं पत्रावृतं मा कृथाः to show that नाथ् here only means 'to ask or beg', and says that नाथते should, therefore, be नाथति); सर्पिषो नाथते Sk.

नाथः [नाथ्-अच्] 1 A lord, master, leader; नाथे कुतस्त्वय्यशुभं प्रजानाम् R. 5. 13; 2. 73; 3. 45; त्रिलोक°, कैलास° &c. भर्तृनाथा हि नार्यः Pratima 1. 25; विजनेऽपि च नाथवानिवास्मि Bu. Ch. 5. 69. -2 A husband. -3 A rope passed through the nose of a draft-ox. -4 A possessor. -5 A protector; अनाथाया हि नाथस्त्वं कौसल्याया भविष्यसि Rām. 2. 53. 17. -**Comp.** -**हरिः** a beast (पशु).

नाथवत् *a.* 1 Possessed of a lord or protector; नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे U. 1. 43. -2 Dependent, subject; ब्राह्मणा भुञ्जते नित्यं नाथवन्तश्च भुञ्जते Rām. 1. 14. 12.

नाथितम् Supplication, demand, request.

नादः [नद्-घञ्] 1 A loud roar, cry, shout, sounding, roaring; सिंहनादः, घन° &c. -2 A sound in general; Māl. 5. 20; न नादेन विना गीतं न नादेन विना स्वरः। न नादेन विना रागस्तस्मान्नादात्मकं जगत्॥ Saṅgītadāmodara. -3 (In Yoga phil.) The nasal sound represented by a semicircle. -4 One who praises. -**Comp.** -**मुद्रा** *f.* A kind of Tāntrika Mudrā.

नादवत् *a.* Sonant, resounding.

नादि *a.* Sounding, roaring.

नादिन् *a.* 1 Sounding, resonant; अम्बुदवृन्दनादी रथः Mb.; R. 3. 59; 19. 5. –2 Bellowing, roaring; खर°, सिंह° &c.

नादेय [नद्या नदस्य वा ढक्] River-born, aquatic, marine; Rām. 4. 39. 12. –यम् Rock-salt; नादेयं नादेयं शरदि वसन्ते च नादेयम् Vaidyakam. –यी N. of several plants (Mar. भुइजांभळी, टाहाकळ, बोरू etc.).

नाद्य *a.* Belonging to a river, river-born. –द्यम् A lotus; (नमो) नाद्योपहारलुब्धाय Mb. 12. 284. 93.

नाध् = नाथ् q. v.

नानर्दमान *a.* Sounding loudly, roaring lustily.

नाना *ind.* 1 In different places, in different ways, manifoldly, variously; मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। –2 Distinctly, separately. –3 Without (= विना; with acc., instr. or abl.); नाना नारीं निष्फला लोकयात्रा Vop.; (विश्वं) न नाना शंभुना रामात् वर्षेणाभोक्षजोवर; *ibid.* –4 (Used as an adjective at the beginning of comp.) Manifold, various, sundry, different, diverse; नानाफलैः फलति कल्पलतेव भूमिः Bh. 2. 46; नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः Bg. 1. 9; Ms. 9. 148. –Comp. –अत्ययः *a.* of different kinds, manifold, diverse. –अर्थ *a.* 1 having different aims or objects. –2 having different meanings, homonymous (as a word). –आत्मवादिन् *a.* maintaining the Sāṅkhya doctrine that each individual has a soul distinct from the universal spirit. –आश्रय *a.* of many abodes; नानाश्रया प्रकृतिः Sāṅ. K. 62. –कारम् *ind.* having done variously; P. III. 4. 62. Kāśi. –ग्रहः taking separately. –जातीय *a.* of diverse kinds or sorts. –धर्मन् *a.* having different customs. –ध्वनिः a musical instrument producing more than one sound. –भाव *a.* various, manifold. –रस *a.* of different or varying tastes; त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते M. 1. 4. –रूप *a.* of different forms, diverse, multiform, various. –वर्ण *a.* of different colours. –विध *a.* of various sorts, diverse, manifold. –विधम् *ind.* in various ways. –वीर्य *a.* having manifold energy.

नानात्वम् The state of diversity or plurality; नानात्वं बाह्यभेदाश्च Sāṅ. K. 27.

नानानम् *ind.* Ved. Differently, separately &c.

नानान्द्रः A husband's sister's son.

नान्त *a.* Endless, infinite.

नान्तरीयक *a.* Inseparable, invariably connected; अविनाभावः संबन्धमात्रं न तु नान्तरीयकत्वम् K. P. 2. (नान्तरीयकत्वम् = तदभावे तदभावरूपा व्याप्तिः); cf. also यत्र च संबन्धो विधीयते तत्रान्यतरस्यान्यत्र विधानम्, संबन्धो नान्तरीयकः यद् वा संबन्धस्य विधानं नान्तरीयकौ संबन्धिनौ ŚB. on MS. 3. 3. 21.

नान्त्रम् Praise, eulogy.

नान्दन *a.* Gladdening, pleasing; सैषा विदितर्नाम द्वास्तेदेतन्नान्दनम् Ait. Up. 3. 12. –नम् A pleasure-garden, paradise.

नान्दिकरः, नान्दिन् *m.* The speaker of the नान्दी or benediction.

नान्दी [नन्दन्ति देवा अत्र नन्द्–घञ् पृषो॰ वृद्धिः ङीप्] 1 Joy, satisfaction, delight. –2 Prosperity; ततो राजकुले नान्दी संजज्ञे भूयसा पुनः Mb. 12. 82. 66. –3 Praise of a deity at the commencement of a religious rite or observance. –4 Particularly, the benedictory verse or verses recited as a sort of prologue at the beginning of a drama, benediction; आशीर्वचनसंयुक्ता नित्यं यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥ or देवद्विजनृपादीनामाशीर्वचनपूर्विका। नन्दन्ति देवता यस्यां तस्मान्नान्दीति कीर्तिता॥ –5 Loud noise of a dozen drums; L. D. B. –Comp. –करः see नान्दिन्. –निनादः, –नादः, –रवः a shout of joy or rejoicing; नान्दीनादप्रभृति हि कृतं मङ्गलं तैस्तदानीम् Mv. 2. 4. (v. l.) –पटः the lid or cover of a well. –मुख *a.* (the class of manes or deceased ancestors) to whom the नान्दीमुखश्राद्ध is offered. (–खम्), °श्राद्धम् a Śrāddha ceremony performed in memory of the manes, preliminary to any festive occasion such as marriage &c. (–खः) the cover or lid of a well. (–खी) a female ancestor entitled to a share in the above Śrāddha. –वादिन् *m.* 1 the speaker of a prologue to a drama. –2 a drummer. –श्राद्धम् see नान्दीमुखम् above.

नान्दीकः 1 A post in a door-way set up for good luck. –2 = नान्दीश्राद्ध see above.

नापितः A barber, shaver. –Comp. –उच्छिष्टता the act of not bathing after the shave; पारदार्यमनायुष्यं नापितोच्छिष्टता तथा Mb. 13. 104. 40. –गृहम्, –शाला a barber's shop, shaving-house.

नापितायनिः The son of a barber; P. IV. 1. 158.

नापित्यम् The trade of a barber. –त्यः The son of a barber.

नाभकः A myrobalan.

नाभागः N. of the son of Vaivasvata Manu. °अरिष्टः N. of the son of Vaivasvata Manu.

नाभस *a.* (–सी *f.*) Heavenly, celestial.

नाभस्वत *a.* Relating to the wind; अहो यत्र वने घोरे नैव नाभस्वती कथा Śiva. B. 19. 17.

नाभि, –भी *m., f.* [नह्–इञ् भश्चान्तादेशः cf. Uṇ. 4. 125] 1 The navel; गङ्गावर्तसनाभिर्नाभिः Dk. 2 &c.; निम्ननाभिः Me. 84, 28; R. 6. 52; अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम् Praśn. Up. –2 Any navel-like cavity. –*m.* 1 The nave of a wheel; अरैः संधार्यते नाभिर्नाभौ चाराः प्रतिष्ठिताः। स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्तते॥ Pt. 1. 81. –2 The centre, focus, chief point; समुद्रनाभ्यां शाल्वोऽभूत् सौभमास्थाय शत्रुहन् Mb. 3. 20. 17. –3 Chief, leader, head; कृत्स्नस्य नाभिर्नृपमण्डलस्य R. 18. 20. –4 Near relationship, community (of race &c.); as in सनाभि q. v. –5 A paramount sovereign or lord; उपगतोऽपि च मण्डलनाभिताम्

R. 9. 15. –6 A near relation. –7 A Kṣatriya –8 Home. –9 A field; Nm. –भिः *f.* Musk (*i. e.* मृगनाभि). [*N. B.* नाभि at the end of Bah. comp. becomes नाभ when the comp. is used as epithet; as पद्मनाभः.] –Comp. –आवर्तः the cavity of the navel. –कण्टकः, –कूपिका, –गु (गो) लकः ruptured navel. –गन्धः the odour of the musk; नाभिगन्धैर्मृगाणाम् Me. 54. –जः, –जन्मन् *m.*, –भूः epithets of Brahmā. –नाडी, –नालम् 1 the umbilical cord; तदङ्कशय्याच्युतनाभिनाला R. 5. 7. –2 rupture of the navel. –मूलम् the part of the body immediately under the navel. –वर्धनम् 1 cutting or division of the umbilical cord. प्राङ् नाभिवर्धनात् पुंसो जातकर्म विधीयते Ms. 2. 29. –2 rupture of the navel. –3 corpulency. –वर्षम् N. of one of the nine वर्ष्s belonging to Jambudvīpa and named after Nābhi, the son of Agnīdhra. –वीथिः a road proceeding from the central part of a village or town; Kāmikāgama 25. 1.

नाभिका A cavity shaped like a navel.

नाभिल *a.* [नाभिरस्त्यस्य सिध्मा० लच्] Relating to or coming from a navel.

नाभीलम् 1 The cavity of the navel. –2 Pain. –3 A ruptured navel. –4 The groin of a woman.

नाभ्य *a.* [नाभि-यत्] Relating to, proceeding from, being in, the navel, umbilical. –भ्यः An epithet of Śiva.

नाभोगः 1 A god. –2 A snake; नाभोगभोज्यो हरिणाधिरूढः सोऽयं गरुत्मानिव राजतीन्दुः Rām. Ch. 6. 84. (Mark the paranomasia in the words नाभोगभोज्य and हरिणाधिरूढ).

